In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतपरिषत् ग्रन्थमाला-६०

संस्कृतवैजयन्ती

(A Collection of Sanskrit Essays)

By

Prof. R. SRI HARI

(Former Vice-Chancellor, Dravidian University, Kuppam, A.P.)

प्रधानसम्पादिका

आचार्या के. कमला

संस्कृतपरिषत्

उस्मानिया विश्वविद्यालयः

हैदराबाद्-५०० ००८.

२००६

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतपरिषत् ग्रन्थमाला-६०

संस्कृतवैजयन्ती

(A Collection of Sanskrit Essays)

By

Prof. R. SRI HARI

(Former Vice-Chancellor, Dravidian University, Kuppam, A.P.)

प्रधानसम्पादिका

आचार्या के. कमला

संस्कृतपरिषत्

उस्मानिया विश्वविद्यालयः

हैदराबाद्-५०० ००८.

२००६

In Public domain. Digitization Muthulakshmi Research Academy

ग्रन्थोऽयं राष्ट्रियसंस्कृतसंस्थानस्य द्रव्यानुदानेन प्रकाशितः

सर्वेऽधिकाराः स्वायत्तीकृताः

प्रथमावृत्तिः : २००६

प्रतयः : ५००

मूल्यम् : ५०-००

प्रकाशिका
संस्कृतपरिषत्
उस्मानियाविश्वविद्यालयः
हैदराबाद् - ५०० ००७
दूरवाणी - ०४०-२७०७०२८१

टङ्कणकार्यम्
बालाजी ग्राफिक्स्
१-८-३५०, चिक्कड्पल्ली,
हैदराबाद् - ५०० ०२०
दूरवाणी - २७६०७१२५

मुद्रणकार्यम्
कलाञ्जलि ग्राफिक्स्
३-५-५२३, विठलवाडी,
हैदराबाद् - ५०० ०२९
दूरवाणी - २३२२९८३१

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series – 60

SAMSKṚTA VAIJAYANTĪ

(A Collection of Sanskrit Essays)

By

Prof. R. SRI HARI

(Former Vice-Chancellor, Dravidian University, Kuppam, A.P.)

Chief Editor

Prof. K. Kamala

SANSKRIT ACADEMY

Osmania University,

Hyderabad - 500 007.

2006

In Public domain. Digitization Muthulakshmi Research Academy

(This publication has been brought out with the financial assistance of Rashtriya Samskrit Sansthan, Ministry of H.R.D., Govt. of India, New Delhi)

All Rights Reserved

First Edition 2006

Copies : 500

Price : Rs. 50-00

Published by :
SANSKRIT ACADEMY
Osmania University,
Hyderabad - 500 007.
Phone : 040-27070281

Typesetting :
BALAJI GRAPHICS
1-8-350, Chikkadpally,
Hyderabad - 500 020.
Phone : 27607125

Printed at :
KALANJALI GRAPHICS
3-5-523, Vittalwadi,
Hyderabad - 500 029.
Phone : 65599381

In Public domain. Digitization Muthulakshmi Research Academy

FOREWORD

Sanskrit Academy, Osmania University, Hyderabad is happy to present "Samskrita Vaijayanti", a collection of sanskrit essays giving a graphic picture of cultural links between the hoary traditions of Sanskrit and Telugu extending into the fields of literature, grammar, linguistics and art. These essays are written by Prof. R. Sri Hari, Former Vice-Chancellor, Dravidian University, Kuppam, Andhra Pradesh. The author is a scholar well-versed in Sanskrit and Telugu grammars, literature and linguistic studies. He is a lexicographer who has added thirty two thousand entries to "Suryarayandhra-nighantu" and called it Srihari Nighantu. Prapanchapadi, Firdausi, Tailapayika and Matrugeetam are the Sanskrit lyrics and Annamacharya Suktisudha (a collection of Annamacharya's subhashitas translated into Sanskrit) are the sanskrit books already published by Prof. R. Sri Hari.

Sanskrit Academy thanks Prof. V. Kutumba Sastry, Vice-chancellor, Rashtriya Samskrit Sansthan, New Delhi by recognising Sanskrit Academy as a research Institute and extending all necessary financial aid. His encouragement is a source of inspiration and breathes life into the activities of Sanskrit Academy. I also thank Dr. C. Giri, Registrar, R.S. Samsthan, Sri C.S. Kaniyal, Dy. Registrar. R.S. Samsthan and the staff of R.S. Sansthan for extending all necessary support to the activities of Sanskrit Academy.

Sanskrit Academy takes this opportunity to thank H.E. Sri Rameshwar Thakur, Governor, A.P., Chancellor, Osmania University and President, Executive Board, Sanskrit Academy for his patronage and guidance.

I thank Prof. Suleman Siddiqui, Vice-chancellor, Osmania University and Prof. M. Mutha Reddy, Registrar, O.U. who as executive heads have extended all necessary support to Sanskrit Academy. This

In Public domain. Digitization Muthulakshmi Research Academy

institute established in the year 1954 could complete a period of fifty years persuing sanskrit studies with the help of the Executive Heads like the Chancellor, Vice-chancellor and Registrar and with distinguished services rendered by former directors like Prof. Aryendra Sarma, Prof. B.R. Shastri, Prof. P. Sriramachandrudu, Prof. P.G. Lalye, Prof. M. Gopal Reddy and Prof. B. Narasimhacharyulu.

I thank Smt. Madhavi and Sri Venkateshwara Rao, Balaji Graphics as well as the management of Kalanjali Graphics for doing a good printing work.

Finally a sahridaya or a discerning reader judges the guna or dosha in a book. I draw his attention to this book.

1-12-2006 **K. KAMALA**
गीताजयन्ती Sanskrit Academy

In Public domain. Digitization Muthulakshmi Research Academy

नावैयाकरणविदुषो वाक्यमेवंविधं भवेत्

– K. Kamala

Sanskrit Academy, Osmania University, Hyderabad, is presenting **"संस्कृतवैजयन्ती"** in its series No. 60 with great pleasure. **Samskrita Vaijayanti** is a collection of essays written by Prof. Ravva Sri Hari, Ex-Vice Chancellor, Dravidian University, Kuppam on many medieval and modern Sanskrit poets, grammarians and artists who lived in Andhradesa. Some Sanskrit books travel fast and spread their gospel throughout the length and breadth of the country and reach distant overseas lands as well, while others are restricted to their respective regions. Some are propagated by particular religious sects like Jaina, Bauddha, Saiva and Vaishnava schools of thought. Many south Indian sanskrit poets, saints and music composers are not known in North India because these books are copywritten and published in South Indian scripts like Telugu, Kannada, Tamil and Malayalam which are unknown to North Indians. Even a Telugu man cannot read Tamil script and vice versa. It was therefore generally agreed to publish all sanskrit books in Telugu script for the benefit of south indians. Telugu alphabet is complete and served as a counterpart to the north Indian devanagari script. Even north indian regions like Sindh and Punjab published few Sanskrit books in Kharosthi (urdu) script for the benefit of readers. Such is the varied picture of India presenting various scripts within a single cultural unit.

It is therefore necessary to propagate Sanskrit books in a common Nagari script. Prof. Sri Hari with his astute scholarship in Sanskrit and Telugu grammars, literature, comparitive study has added a golden leaf to the treasury of sanskrit studies with his Samskrita Vaijayanti. This book establishes a link between Telugu and Sanskrit and explains the contributions of sanskrit scholars and poets who lived in Andhra Desa. They are Annambhatta, Mallinathasuri, Jayasenani,

In Public domain. Digitization Muthulakshmi Research Academy

Sayana Madhava and Akbar Shah of medieval period when Kakatiya and Vijayanagar dynasties rendered great service in the field of art, literature, philosophy and vedic studies. Less-known poets of Kakatiya period, who contributed their might in stone inscriptions have also been evaluated in this book. A vide range of subjects such as literature, Dharmasastra, painting, dance, music, linguistics and grammar are dealt in these essays. Grammar is dear to the heart of Prof. Sri Hari eventhough he discusses many other subjects. Other essays can be written by a good sanskrit scholar. But the essays on sanskrit grammar and those linking Telugu and Sanskrit languages by a linguistic and semantic survey can be written only by Prof. Sri Hari. He is one of the very few of such breed who retained the best of both Telugu and Sanskrit among contemporary scholars. It is therefore apt for Sanskrit Academy to present such a unique collection of essays to the lovers of knowledge.

Prof. Sri Hari's essays do not suffer redundence, drudgery, repitions and flaws of Ativyapti and Avyapti. Since he is a grammarian aiming at precision and living to know. Since these essays are in Sanskrit, their contents are, discussed here briefly to create interest among general readers on the above subjects.

The list of contents is as follows:

(1) The first essay sums up Telugu kavyas translated into Sanskrit.

(2) Poetic beauty of Sanskrit inscriptions laid during Kakatiya period (from thirteenth to fifteenth centuries A.D.) is described.

(3) The life-sketch of Bellamkonda Rama Raya Kavi who lived in Pamidipadu of Guntur district in Andhra died at the age of 39 in the year 1914 A.D. wrote a hundred and forty small and big

In Public domain. Digitization Muthulakshmi Research Academy

sanskrit books including his Sankarasankara-bhashyavichara, Sariraka-chatussutri-vichara, Bhagavadgita-bhashyarka-prakasika and Saradratri. Saradratri is a commentary on Siddhanta Kaumudi. He is considered as an incarnation of Adisankara and was an ardent devotee of Hayagriva.

(4) The law and justice described in the text "Sukranitisara" which is applicable to the present day service conditions as well is discussed.

(5) Akbarshah who belonged to the family of royal priests and gurus of the Bahamani King Abul Hasan Tana Shah who ruled over Golconda was a contemporary of the great saint and musician Ramadas. Akbarshah Hussaini wrote "Sringaramanjari" an alamkara text in Telugu and translated the same into Sanskrit. He was also known as Bade Saheb. He claimed that he has the three elements of Brahma, Vishnu and Maheshwara in him. Akbar is shown as अ–क–ब–र–"अ" representing Brahma, "क" Vishnu and the title Badesaheb stands for Maheshwara.

(6) Art of painting described in Vishnudharmothara Puranam.

(7) Mitakshara commentary of Vijnaneshwara on Yajnavalkyasmriti is a well-known law digest held with great reverence - Annambhatta who lived in Garikapadu, a village of Andhra is well-known as the revered author of "Tarkasangraha" to sanskrit students. Among his many sanskrit books, a "Mitakshara" commentary on Mimamsa and another "Mitakshara" on panini's Astadhyayi are well known. The present essay explains the contents of his Vyakarana Mitakshara.

(8) Bhattikavya (VII cen. A.D.) describing the Ramayana story is

In Public domain. Digitization Muthulakshmi Research Academy

a test for a reader who is required to be adept in grammar and other sastras to understand the poetic contents of this kavya. Mallinatha and Jayamangala have written "Sarvapathina" and "Jayamangala" commentaries on this kavya testifying their own scholarship of grammar – The present essay of Prof. Sri Hari explains grammatical nuances shown by Mallinatha in "Sarvapathina" commentary. Incidentally this paper was read in a seminar conducted on "Mallinatha" by the Dept. of Sanskrit, Osmania University (1986).

(9) Kalidasa's muse lifts the reader to great aesthetic heights where the word and its meaning blend together like milk and water. A grammarian alone stops to examine if the poet has used some words which do not testify to paninian standards. Mallinatha was one such grammarian who discussed such un-paninian forms in Kalidasa's poetry and Sri Hari is his modern counterpart.

(10&11) These two essays study "Saraswata Vyakarana" and "Sakatayanavyakarana" by Anubhutiswaroopacharya and Sakatayana respectively. The later is not the ancient author of unadisutras and the grammarian quoted by Yaska in his "Niruktam". This Sakatayana is a jaina scholar belonging to the ninth cen-A.D.

(12) Madhaviyadhatuvritti is a very useful text explaining various derivations of about two thousand verbal roots of Sanskrit language. The active, passive, causal, desiderative and frequentative forms along with Atmanepada and Parasmaipada prakriya are explained in this text making this an indespensable companion to a serious student of sanskrit grammar as well as a scholar who wishes to coin new technical terminology in any Indian language. This is like Greek and Latin terminology

In Public domain. Digitization Muthulakshmi Research Academy

used by any european language. Prof. Sri Hari's study of this Dhatuvritti is explained in this essay.

(13) Linguistics is a study of language. It is a relatively recent branch of learning developed by European scholars headed by Sir William Jones in the nineteenth century A.D. Languages are divided into different families with Indo-european group of languages spreading over Europe, Persia and India. Prof. Sri Hari traces the beginnings of the study of this discipline in Panini's Ashtadhyayi and various Siksha texts based on the Pratisakhyas of veda, making a phonetic study of the language. The word "phone" and sanskrit word "swana" are identical. The search for identical words in Sanskrit, Persian and European languages is a continuous and interesting process. Nirukta of Yaska is another vedanga in which the roots of linguistic study can be traced. Yaska lined much before Panini.

(14) Telugu language has 60% of sanskrit words. Telugu poets are fond of using lengthy compounds in their poetry vying with Banabhatta. Many sanskrit words are used in Telugu with a slightly changed shade of meaning making this an interesting semantic study. This present essay of Prof. Sri Hari makes a survey of such semantic changes. A scholar well-versed in both Sanskrit and Telugu languages alone can do such work.

(15) This is an essay on the "Nritta Ratnavali" of Jaya-Jayapa senani who was an army commander during the period of Ganapati-rudra-deva, the founder of Kakatiya dynasty. He ruled over Andhra in the thirteenth cen. A.D. Jaya senani was a poet, musician, artist and army commander with amazing qualities. This essay describes the contents of "Nrittaratnavali" by bringing an aesthetic finale to this very useful collection of sanskrit essays.

In Public domain. Digitization Muthulakshmi Research Academy

After describing the contents, a few remarks and observations can be made about these essays.

The first essay describes sanskrit translations of Telugu poetry. When a Telugu word is chosen by a poet on which he bases his slesha or double entendre, it creates a problem for the translator. Vasucharitra by Rama-raja-bhushana kavi (XV Cen. A.D.) is a Praudha Prabandha in Telugu using slesha freely. Kalahasti Kavi (XVI cen. A.D.) has translated this into Sanskrit. One example can be quoted here. The Telugu verse transliterated in nagari is as follows "पल्गोम्मल जेन्दुवारलु तगुल्विरियाटलु नेरकुन्दुरे" (3-138). Here पल्गोम्मलु can be split as पलु+कोम्मलु (पल्गोम्मल is a genitive form). कोम्मलु in Telugu has two meanings (1) branches (2) lovely damsels. Kalahasti Kavi translated it into Sanskrit as "विटपालि" (1) विट+पालि (2) विटप+अलि. Vita (विट) means a suitor, who is loved by women and विटप means a branch which serves as a resting place for अलि or a bee. This slesha is a great feat indeed.

Kakatiya inscriptions are spread all over Andhra. The following verse is laid in a village called Budapura of Mahabubnagar district in A.P. The author is Iswarabhattopadhyaya who is a great grammarian. It runs as follows:

"सद्धातुवृद्धपृथ्वादि समासालीसमन्वित:
नदीपूरणसम्पूर्णः पाणिनीयमते च यः"।

Here a tank full of water is compared with Paninian grammar. Words like सत्संज्ञा, धातुसंज्ञा, वृद्धसंज्ञा, पृथ्वादिगण, समासः, नदीसंज्ञा and पूरणार्थकाः are well-known grammatical terms in Panini's grammar. These adjectives can be explained to describe a tank also. The tank-water increases (वृद्ध=) when many minerals (धातव:) are mixed. It is wide (पृथु). It has a small bank (समासालीसमन्वितः). Water is filled in a tank when a river overflows (नदीपूरणसंपूर्णः).

In Public domain. Digitization Muthulakshmi Research Academy

In his essay on Bellamkonda Rama Raya Kavi, the author indulges in a discussion on grammar while discussing the samasya given to the illustrous poets, "Tirupati Venkata Kavulu" by Ramaraya Kavi. The samasya is, "पश्यपश्यौ न पश्यति" – This was rejected by Tirupati Venkatakavulu as a grammatical mistake. They argued that "श" is appended to the root दृश् to form the noun पश्य. श cannot be appended for a root which is not prefixed by an उपसर्ग. Therefore पश्यपश्यौ is an असाधुरूप according to them. Ramarayakavi justified the formation of the compound "पश्यपश्यौ" on the ground that the neo-grammarian school followed by Bhattoji Dikshita does not think that the अनुवर्तन or follow up of the earlier sutra "आतश्चोपसर्गे" is necessary. Therefore "श" can be appended to दृश् which may not have any prefix.

While explaining the contents of Sukranitisara the following sloka quoted here is attractive. "मालाकार इव ग्राह्यो भागो नाङ्गारकारवत्" A king should collect taxes like a garland maker who plucks flowers and allows the tree to grow, and not like a man who collects fuel and burns the wood without giving any chance to the tree to grow. Quotations like "अन्नं न निन्द्यात् सुस्वस्थः स्वीकुर्यात् प्रीतिभोजनम्" are apt. It is added that payment of fifteen days salary as additional bonus and addition of gifts as an incentive to the employees ensures proficiency and commitment among workers. This tradition is continued in the form of payment of bonus to the employees in the present day. The following verse from Vishnudharmottara Purana sums up the art of painting.

हसतीव च माधुर्यं सजीव इव दृश्यते।
सश्वास इव यच्चित्रं तच्चित्रं शुभलक्षणम्॥

The painting should appear as if it is smiling and sweet. It should appear as if it is breathing life. The painting should be full of life.

In Public domain. Digitization Muthulakshmi Research Academy

The essayist on his essay on Mitakshara observes that Annambhatta follows the views of sage Patanjali's Mahabhashya faithfully and contradicts the views of "Kasika" if they are against Mahabhashya.

The final essay on Jayasenani's "Nrittaratnavali" explains the versatile character of the author along with the contents of the sanskrit text. Jaya or Jayapa has attached equal importance to Desi forms of dance along with the well-known Bharatanatya tradition. He states, "भूपालैरुपलालिता बहुकलैः प्रौढेव वाराङ्गना, देशी संप्रति दन्तिसैन्यपतिना सान्द्रादरं वर्ण्यते" (नृ.र.5-2). This desi form of art is patronised by many kings. Their patronage can be compared with the patronage extended to a harlot. It is being patronised by Jaya, the lord of elephant army.

Jaya thinks that it is difficult to find an accomplished danseuse even among many young and beautiful doe-eyed damsels. He states

"रूपयौवनयुक्तानां सहस्रेऽपि मृगीदृशाम्।
कलागुणसमेतानां नर्तकी नैव लभ्यते॥" (नृर.7-161)

Kavichakravarti, a poet living in the court of Ganapatirudra deva praises Jayana in the following sloka laid on a stone inscription.

"वर्धते खलु वसुन्धरापते
स्तस्य सिन्धुरचमूधुरन्धरः।
जायनः सकलनाट्यवैदिक
ग्रामणीः कविसखाशिखामणिः॥

It is hoped that Samskrita Vaijayanti will be welcomed by sanskrit scholars.

– K. Kamala

23-11-2006
व्ययनाम संवत्सरस्य
मार्गशीर्षशुक्लतृतीया।

In Public domain. Digitization Muthulakshmi Research Academy

ग्रन्थकर्तुर्निवेदनम्

ममायं महान् प्रमोदविषयो यदियं 'संस्कृतवैजयन्ती' सुप्रतिष्ठया 'संस्कृत अकाडेमी' संस्थया प्रकाश्यत इति।

अस्मिन्निबन्धसमुच्चये पञ्चदश निबन्धा ग्रथिता वर्तन्ते। ते च प्रधानतया भाषा, साहित्य, व्याकरण, अलङ्कारशास्त्र, कलासम्बन्धिविषयाणां प्रतिपादकाः सन्ति।

'संस्कृतभाषायामनूदितानि आन्ध्रकाव्यानि', 'काकतीयशिलालेखेषु कवितासौन्दर्यम्' इति निबन्धद्वयं साहित्यविषयान्, 'मल्लिनाथस्य सर्वपथीना-केचन व्याकरणविशेषाः', 'कालिदासकृतिषु केचन अपाणिनीयाः प्रयोगाः', 'अन्नम्भट्टस्य मिताक्षरा व्याख्या' इति निबन्धत्रयं भाषाप्रयोगविशेषान्, 'माधवीया धातुवृत्तिः-एको विमर्शः', 'शाकटयनव्याकरणस्य वैशिष्टयम्', 'सारस्वत व्याकरणे संक्षेपसारल्ये' इति निबन्धत्रयं तत्तद्व्याकरणग्रन्थानां वैशिष्ट्यम्, 'बेल्लङ्कोण्डरामरायस्य जीवनरेखा' इति निबन्धः शताधिक ग्रन्थकर्तुः आन्ध्रदेशीयविद्वत्तल्लजस्य श्रीमतो बेल्लङ्कोण्ड रामरायकवीन्द्रस्य जीवनविशेषान्, तद्रचितग्रन्थविशेषान्, 'शुक्रनीतिसारस्य वैशिष्ट्यम्', 'अक्बर्शाप्रणीता शृङ्गारमञ्जरी' इत्येतन्निबन्धद्वयं क्रमशो राजनीतिग्रन्थस्य, अलङ्कारशास्त्रग्रन्थस्य च वैशिष्ट्यम्, 'विष्णुधर्मोत्तरपुराणे चित्रकलाविवरणम्' इत्ययं निबन्धो विष्णुधर्मोत्तरपुराणे निरूपितान् प्राचीन-भारतीयचित्रकला विशेषान्, 'पाणिनीयादिषु आधुनिकभाषाशास्त्रविषयाः' इति निबन्धः पाणिनीये अष्टाध्यायीग्रन्थे वर्तमानानाधुनिक भाषाशास्त्रविषयान्, 'आन्ध्रभाषायां प्रयुज्यमानाः संस्कृतशब्दाः-तेषामर्थविपरिणामः' इति निबन्धः आन्ध्रभाषायां प्रयुज्यमानानां संस्कृतशब्दानां अर्थविपरिणामम्, 'जायसेनापतेर्नृत्तरत्नावली' ति निबन्धः काकतीयसेनापतिना संस्कृते च विदुषा जायपाख्येन रचितस्य नृत्तरत्नावलीनामकस्य नृत्तशास्त्रग्रन्थस्य वैशिष्ट्यं च निरूपयन्ति। नैके निबन्धा आन्ध्रदेशीयैर्विद्वत्तल्लजैः संस्कृतभाषाविषये कृतं योगदानं सुष्ठु

In Public domain. Digitization Muthulakshmi Research Academy

स्पष्टीकुर्वन्ति। यद्यप्ययं ग्रन्थकर्ता सर्वास्वपि सारस्वतप्रक्रियासु समानप्रेमा तथापि बाल्ये गुरुमुखतः अधीते शब्दशास्त्रे ग्रन्थकर्तुर्विशिष्टं प्रेमेति सं-सूचयति अत्रस्थं भाषाव्याकरणसम्बन्धि निबन्धाष्टकम्।

संस्कृत अकाडेमीपक्षतः अस्य ग्रन्थस्य प्रकाशनविषये स्वीयमङ्गीकारं दत्त्वा अत्रस्थानां निबन्धानां विवृतिपूर्विकाममूल्यां पीठिकाञ्च विरच्य ग्रन्थ प्रकाशने महतीं श्रद्धां प्रकटितवत्यै, संस्कृतपरिषदः अभिवृद्धये निरन्तरं श्रमं विदधत्यै, अस्याश्च परिषदो डैरेक्टरपदे विराजमानायै प्रोफेसर् के. कमला (Head, Dept. of Sanskrit (Rtd) Osmania University) महाभागायै, एवं संस्कृत परिषदो शोधकविद्वद्भ्यां डा. श्रीनिवासशर्म, सूर्यप्रकाशशर्मभ्यां मम कार्तज्ञ्यं प्रकटीकरोमि।

संस्कृतविद्वद्भिरयं ग्रन्थः समुचितरीत्या आद्रियत इत्याशासे।

रव्वा श्रीहरिः
विश्रान्तः उपकुलपतिः
द्राविडविश्वविद्यालयः
कुप्पम् (आं.प्र.)

In Public domain. Digitization Muthulakshmi Research Academy

विषयसूचिका

1. संस्कृतभाषायामनूदितानि आन्ध्रकाव्यानि 1
2. काकतीयशिलालेखेषु कवितासौन्दर्यम् 11
3. बेल्लङ्कोण्ड रामरायकवीन्द्रस्य जीवनरेखा 18
4. शुक्रनीतिसारस्य वैशिष्ट्र्यम् 26
5. अक्बर्शाप्रणीता शृङ्गारमञ्जरी 33
6. विष्णुधर्मोत्तरपुराणे चित्रकलाविवरणम् 39
7. अन्नम्भट्टस्य मिताक्षराव्याख्या 45
8. मल्लिनाथस्य सर्वपथीना–केचन व्याकरणविशेषाः 49
9. कालिदासकृतिषु केचन अपाणिनीयाः प्रयोगाः 54
10. सारस्वतव्याकरणे संक्षेप सारल्ये 61
11. शाकटायनव्याकरणस्य वैलक्षण्यम् 70
12. माधवीया धातुवृत्तिः – एको विमर्शः 76
13. पाणिनीयादिषु आधुनिकभाषाशास्त्रविषयाः 83
14. आन्ध्रभाषायां प्रयुज्यमानाः केचन संस्कृतशब्दाः – तेषामर्थविपरिणामः 90
15. जायसेनापतेः नृत्तरत्नावली 100

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतभाषायामनूदितानि आन्ध्रकाव्यानि

वेदव्यासमहाभारतस्य अनुवादेनैव आन्ध्रभाषायां साहित्योद्भवः सञ्जातः। अनन्तरं च संस्कृतसाहित्यसम्बन्धिनां पुराणादीनामनुवादेनैव तत् वर्धितञ्च। अतः प्राचीनस्य आन्ध्रभाषासाहित्यस्य संस्कृतभाषा सम्बन्धिता महती दृश्यते। अद्यत्वे सर्वासु भाषास्वपि अनुवादस्य महत् स्थानं परिदृश्यते। अत्र तत्तद्भाषाभाषिणां तथा साहित्यकाराणां च मध्ये परस्परं भावविनिमयः साहित्यविनिमयश्च कारणे वर्तेते।

यद्यपि पूर्वस्मिन् काले आन्ध्रभाषायाः संस्कृतभाषायामनूदितानि काव्यानि विरलानि दृश्यन्ते अद्यत्वे तु नैकैः कविभिः संस्कृते अनूदितानि काव्यानि नैकानि दृश्यन्ते। तथानूदितेषु काव्येषु पञ्चदश शताब्दीयेन गुरुराजकविना संस्कृते अनूदितं पण्डिताराध्यचरित्रं प्रथममिति वक्तुं शक्यते। पण्डिताराध्यचरितं च पाल्कुरिकिसोमनाथेन कविना रचितं शैवमतकाव्यं वर्तते। इदं च द्विपदवृत्ते रचितं काव्यम्। अस्यैव अपरोऽनुवादः आधुनिकैः श्री शिववरपु राजलिङ्गसूरिभिः कृतो लभ्यते। अयं तु न समग्रः। किन्तु पण्डिताराध्यचरित्रगतदीक्षाप्रकरणरूप एकदेशस्य अयमनुवादः।

संस्कृते अनूदितेषु ग्रन्थेषु अनन्तरं निर्देशार्हं कालहस्तिकवि रचितं वसुचरित्रनामकं काव्यम्। रामराजभूषणाख्येन कविना आन्ध्रभाषायां रचितं विशिष्टं प्रबन्धनामकं काव्यं वर्तते यत्र च कथा अतिलघ्वी भवति पुनर्वर्णनादिकं अतिदीर्घं भवति। उपरिचरवसोः कथाऽत्र वर्ण्योंऽशः। अस्य च काव्यस्य आन्ध्रसाहित्ये विशिष्टं स्थानं वर्तते। श्लेषालङ्कार प्रयोगस्य, व्यङ्ग्यवैभवस्य, शब्दालङ्कारवैचित्र्यस्य च इयं महती निधिर्दृश्यते। अस्य प्रबन्धस्य अनुवक्ता कालहस्तिकविः षोडशशताब्दीयः। मूलगतानां आन्ध्रभाषानिबद्धानां श्लेषचमत्काराणां, तथा शब्दचमत्काराणां च संस्कृतभाषया प्रकाशनं यद्यपि क्लेशसाध्यं तथापि कालहस्तिकविस्तावत् स्वीयानुवादे यावदवकाशं आनेतुं प्रयत्य कृतार्थः सञ्जातः।

मूलगतपद्ये निबद्धः श्लेषः यदि संस्कृतपदनिबद्धः तर्हि तादृशं श्लेषं

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतानुवादे सुलभतया आनेतुं शक्यते तस्यैव प्रयोगस्य अनुवादे ग्रहणेन। यदि तु श्लेषः आन्ध्रपदनिबद्धः भवेत् तस्य संस्कृते आनयनं अती दुष्करं भवति। प्रतिभावान् कालहस्तिकविः आन्ध्रभाषापद निबद्धानि श्लेषान् संस्कृते अतीव निपुणतया निरूढवानिति वक्तुं शक्यते। उदाहरणमे पश्यन्तु

"पल्गोम्मल जेन्दुवारलु तगुल्विरियाटलु नेरकुन्दुरे" (3-138)

अस्मिन् पद्यपादे "कोम्मलु" इति पदं शिलष्ट मुपयुक्तम्। अस्य वृक्षशाखा इति, स्त्रिय इति अर्थद्वयं वर्तते। इमं च श्लेषं कालहस्ति कवि "विटपालि" इति प्रयोगेन अतीव निपुणतया साधितवान्। विट+पालि इ विभागे विटपरत्वेन (नाम स्त्रीपरत्वेन) विटप+अलि इति विभागे भ्रमरपरत्वे (नाम-शाखापरत्वेन) च अर्थद्वयं सुकरमेव खलु।

न केवलमेवंरीत्या श्लेषार्थान् परन्तु शब्दालङ्कार वैचित्रीमपि मूलगत संस्कृतानुवादे कालिहस्तिकविः आनीतवान्। पश्यत मूलपद्यम्

तरुवुलपोंत बोंचि वसुधावरमित्रुडु गांचे नच्चटन्
तरुणि तमोविनीलकच तामरसोदर सोदरप्रभन्
तरलविलोचनन् ततनितम्बतटिन्निभगात्रवल्लरिन्
तरुणशशाङ्कफाल नोक तन्वि तरङ्गवलिं दलोदरिन् (2-25)

आन्ध्रकवी रामराजभूषणः अस्मिन् पद्ये तकारादीन् शब्दान् दश क्रमतः प्रयु शब्दचित्रतां आकलितवान्। संस्कृतकविनापि स्वीयसंस्कृतानुवादे तादृशी शब्दचित्रता कल्पिता दृश्यते।

तारानाथमुखीं तमोघनकचां तालस्तनीं पद्मभां
ताम्रोष्ठीं तरलेक्षणां ततगुरुश्रोणीं तटिद्भासुराम्।
तन्वीं मध्यतनुं तरङ्गवलिकान्तर्व्याप्तरेखालिकां
तत्रैकां तरुणीं ददर्श स तदा तादृक्तरुच्छादितः॥ (2-3

मूलादप्यधिका शब्दचित्रता अत्र संस्कृतकविना प्रकल्पिता दृश् यतो मूले तकारस्य दशवारमावृत्तौ वर्तमानायामनुवादे च त्रयोदशवारमावृ दृश्यते।

 In Public domain. Digitization Muthulakshmi Research Academy

मूले विद्यमाना शब्दालङ्कारचित्रता अनुवादे यदि न सुकरा भाव्यते तर्हि कयापि भङ्ग्या या काचित् शब्दचित्रता तत्र प्रकल्पिता दृश्यते।

इममान्ध्रपद्यं पश्यत

मेरुगोप्पु नेरिगोप्पु नेरगप्पु तरिगप्पु
जलदमालिक चोप्पु तेलुपलेदो (3-69)

मूलगतशब्दचित्रता कालहस्तिकविना स्वीयानुवादे भङ्ग्यन्तरेण कथं वा आनीता सहृदयाः पश्यन्तु-

धम्मिल्लोज्ज्वलनीलिमैव तनुते धाराधरालिप्रभां
नेत्रश्रीर्नितरां करोति नियतां नीलोत्पलालीविभाम्।
कन्यायाः स्मितकान्तिरेव कुरुते कामं सुधाब्धिद्युतिं
गात्रश्रीर्गणनाधिकां कलयते गाङ्गेयवल्लीरुचिम्॥

अत्र मूलगतः शब्दालङ्कारः यद्यपि न अनुवादे प्रकल्पितस्तथापि मूलकर्त्रा शब्दलङ्कार प्रयोगेण या वैचित्री परिकल्पिता तत्सदृशी वैचित्री भङ्ग्यन्तरेण निर्दिष्टस्थले समानवर्णप्रयोगरूपयत्यक्षर प्रयोगेण साधिता दृश्यते।

प्राचीनकविषु एतावन्निर्दिष्टा एव कवयः आन्ध्रकाव्याना मनुवक्तृषु दृश्यन्ते। आधुनिकेषु कुण्टिमद्दिशेषशर्मा, सन्निधानं सूर्यनारायणशास्त्री, गिडुगु सीतापतिः, श्री चिङ्गिगुडूरु वरदाचार्याः, गुण्डेरावु हर्कारे, लङ्का कृष्णमूर्तिः, रव्वा श्रीहरिः इत्यादयो वर्तन्ते।

आन्ध्रकाव्यानां संस्कृतानुवादेषु वसुचरित्रानन्तरं मनुचरित्रप्रबन्धो निर्देष्टव्यः। आन्ध्रभाषायामयं प्रबन्धः आन्ध्रकवितापितामहेन अल्लसानि पेद्दनकवीन्द्रेण लिखितः। श्रीमद्भिः कुण्टिमद्दि शेषशर्म महोदयैर्मनुसम्भवः इति नाम्ना संस्कृतभाषाया मनूदितः। उत्पलमाला, चम्पकमाला, मत्तेभनामकानि वृत्तानि यद्यपि संस्कृतवृत्तान्येव तथापि तेषां संस्कृतभाषायां अतीव विरलतयैव प्रयोगो दृश्यते। शिशुपालवधकाव्ये तु चम्पकमालावृत्त निबद्धः श्लोकः एको दृश्यते (3-82)। इमानि वृत्तानि श्री शर्मभिः बाहुल्येन उपयुक्तानि। अत्रायं विशेषः छन्दःप्रयोगे दृश्यते यत् अत्र श्रीमद्भिः शर्मभिः सीसं, आटवेलदि,

In Public domain. Digitization Muthulakshmi Research Academy

तेटगीति इत्यादिका आन्ध्रभाषीया देशीयच्छन्दोविशेषा:प्रवेशिता:। एकमुदाहरणं दृश्यताम्

"निड्डुद पेन्नेरिगुंपु जडगट्ट सगरु मुम्मनुमंडु तपमु गैकोनिन चोट्ट" इत्ययं सीसाख्य वृत्तविशेषे निबद्धः। इदं पद्यं संस्कृतभाषायां अस्मिन्नेव सीसवृत्ते अनूदितं सत् विलक्षणतां प्रदर्शयति।

जटति दीर्घशिरोजपाशोऽत्र सगरस्य
नप्ता तपश्चर्कराञ्चकार
दर्शयन्ती जरत्कमठकर्परमत्र
नागापगा जगत्यवततार
मदनतापेन विव्यथे पावकोऽत्र
तापसकलत्रसौंदर्यदर्शनेन
शरवणमसूत देवसेनान्यमत्र
नन्विति ददर्श भूसुरः कौतुकेन (1-58)

श्रीमद्भिः शर्ममहोदयैः श्रीकृष्णदेवरायैरान्ध्रभाषायां रचितः आमुक्तमाल्यदानामकः विष्णुचित्तीयापरनामकः प्रबन्धः श्रीविष्णुचित्तीयमिति नाम्ना संस्कृतीकृतः। आन्ध्र मनुचरित्र प्रबन्धस्य संस्कृत तत्समपदभूयिष्ठत्वेन तस्य संस्कृते अनुवादः सुकरः। परन्तु देश्य पदभूयिष्ठस्य, अप्रसिद्धपदभूयिष्ठस्य च आमुक्तमाल्यदानामकप्रबन्धस्य संस्कृतीकरणं नातिसुलभमेव। अयं विषयः अनुवक्तृभिः शर्ममहाभागैः स्वयमेव आविष्कृतः "मनुसम्भववन्नेदं सुलभ परिवर्तनाय सुखदमिदम्" इति वाक्येन। किन्तु प्रतिभावद्भिः श्रीमद्भिः शर्मभिः अतीव समर्थतया अस्य अनुवादः कृतः। अतिदीर्घ संस्कृतसमास घटितानामान्ध्रपद्यानां संस्कृतीकरणेऽपि मूलग्रन्थे उपयुक्तस्यैव छन्दसः प्रयोगेण अनुवादे स एव पादः पुनरुक्त इव दृश्यते। एकमुदाहरणम्-

मूलम्

खनटत्पयोब्धिवीक्ष्य रसातलान्योन्य
पिण्डीकृताङ्गभीताण्डजमुलु
धृतकुलायार्थखण्डितसमिल्लवरूप
चरणान्तिकभ्रमत्तरुवरमुलु (1-3)

 In Public domain. Digitization Muthulakshmi Research Academy

अनुवादः

खनटत्पयोब्धिवीक्ष्य रसातलान्योन्य
पिण्डीकृताङ्गभीताण्डजानि
धृतकुलायार्थ खण्डितसमिल्लवरूप
चरणान्तिकभ्रमत्तरुवराणि (1-3)

अत्र केवलं विभक्तिरेव भाषान्तरीकृता परिदृश्यते।

अप्रसिद्ध आन्ध्रशब्दैः, असुलभसंस्कृतसमानार्थकशब्दैश्च निबद्धस्य पद्यस्य संस्कृतीकरणं तु पुनर्न सुकरम्। तथापि श्रीमद्भिः शर्मभिः एतादृश्मपि पद्यजालं अतीव सुकरतया अनूदितम्।

गुरुगुंजेंचलि दुम्मि लेदगिरिसाकुंदिन्त्रिणी पल्लवो
त्करमुंगूड बोरंटिनूनियलतो (4-134)

इत्यस्मिन्नान्ध्रपद्ये गुरुगु, चेञ्चलि, तुम्मि, तगिरिस इत्यादि देश्य शब्दानामपि असुलभप्राप्यसंस्कृतसमानार्थकानां संस्कृतीकरणं पश्यत।

भूरण्डी कुणुज प्रपुन्नटदलान्याम्लच्छदैर्व्यञ्जनं
पक्वीकृत्य कृतं सतैलमजहद्बाष्पं च जग्ध्वौदनम् (4-170)

पिङ्गलि सूरनाख्येन कविना आन्ध्रभाषायां कलापूर्णोदयनामकं अद्वितीयं काव्यं लिखितम्। इदं कथाकल्पनस्य, नाटकीयतायाः, देश्य पदबन्धानां, लोकोक्तीनां च निधिरिति वक्तुं शक्यते। संस्कृतान्ध्रभाषयोः समप्रज्ञाः श्रीमन्तः सन्निधानं सूर्यनारायणशास्त्रि महाभागा इदं काव्यं सस्कृते परिवर्तयामासुः। मूलकवेः सूरनार्यस्य कविताशिल्पं समग्रतया अनुवादे प्रकल्पितमित्यत्र न सन्देहलेशः। एतेषामनुवादविधानस्य एकमुदाहरणम्। आन्ध्रपद्ये आन्ध्रगृहिणीनां कलहरीतिर्यादृशी भवेत् सा अतीव रम्यतया द्वयो रम्भयोः कलहसन्दर्भे वर्णिता। श्री शास्त्रिवर्याणां मूलगतं पद्यरचनाशिल्पं साम्ग्रयेण अनुवादे समानीतम्

आन्ध्रपद्यम्
ओट्टु सुमी यन्न नोट्टु सुमी यंचु
नेमेमि यनिन नेमेमि यनुचु

In Public domain. Digitization Muthulakshmi Research Academy

कानीगदे यन्न कानीगदे यंचु
निंकेल यनिन निंकेल यनुचु
ओसि पोवे यन्न नोसि पोवे यंचु
नौनंटिवनिन नौनंटिवनुचु (3.206,207)

संस्कृतानुवादः
त्वं पिधेहि मुखमित्युदीरिते
त्वं पिधेहि मुखमित्युदीरितम्
मा दृपस्त्वमिति भाषिते पुन
र्मा दृपस्त्वमिति भाषितं पुनः
हञ्जे_पेहीति रसिते हञ्जे_पेहीति रासितम्
कियती त्वमिति प्रोक्ते कियती त्वमितीरितम्

सूरनकविना प्रयुक्ताः आन्ध्रदेशीयपदबन्धाः लोकोक्त्यश्च यथातथं संस्कृतीकृता अनुवादे प्रयुक्ताः। एतेषां कानिचन उदाहरणानि।

नीरुकोलदि तामर सुम्मी (2-95)
जलावधि जलेरुहम् (29)
चेविटिकि बट्टिनट्टि शंकुनु बोलेन् (2-96)
गीतं वा बधिरश्रुतौ (29)
कण्टिकि रेप्पवले
नेत्रं पक्ष्मेव
पेदकोपमेन्दु पेदवुल चेटु
निर्वीर्यस्य क्रोध ओष्ठदंशनायैव कल्पते
इल्ललिकिन पंडुगगुने
गृहलेपेनैव किं सर्वं सम्पन्नम्
साधकबाधकालु
साधकबाधकानि (189)

एते प्रयोगाः शास्त्रिवर्याणां नूत्नप्रयोगप्रवणतां एवं तत्प्रयोगे दाक्ष्यं च सूचयन्ति।

In Public domain. Digitization Muthulakshmi Research Academy

पिङ्गलि सूरनार्यस्य प्रतिभाविलसितं काव्यान्तरं प्रभावती प्रद्युम्ननामकम्। बहुभाषाकोविदै र्वाचस्पतिबिरुदाञ्चितैः श्रीमद्भिः गुण्डेरावु हर्कारे महाभागैः स्वनवतितमे वर्षे शरीरस्य अस्वास्थ्यदशायां, तथा नेत्राणां दृष्टिलोपदशायामपि अयमनुवादः कृत इति तेषां सारस्वते दृढां आस्थां सूचयति।

आन्ध्रसाहित्ये भक्त कवेः सहजपाण्डित्य बिरुदाञ्चितेन बम्मेर पोतनाख्येन महाकविना विरचितस्य आन्ध्रमहाभागवतस्य यावान् प्रचारो विश्वजनीनता च वर्तते न तावान् प्रचारः विश्वजनीनता च ग्रन्थान्तरस्य दृश्ये। एतस्य पोतन कवेः मधुरमञ्जुला शैली एवं भक्तिमयं वस्तु च कारणं भवेत्। अस्माद्ग्रन्थात् कांश्चन भागान् गृहीत्वा सन्निधानं सूर्यनारायणशास्त्रिमहाभागाः "आन्ध्रभागवतानुवादः" इति नाम्ना संस्कृते परिवर्तितवन्तः।

अत्र एकः प्रश्नः समुदेति। पोतनकृतं आन्ध्रमहाभागवतं संस्कृत-श्रीमद्भागवतस्य अनुवादग्रन्थः। पुनस्तस्य संस्कृते अनुवादस्य का वा सङ्गतिः इति। अत्रेदं समाधानम्। पोतनकविः प्रकृत्या महान् भक्तः। अतो व्यासभागवतं न यथातथं अपितु भक्त्याविष्टः सन् आन्ध्रमहाभागवतं मूलादपि विस्तृतं चकार। अतः तस्य संस्कृतीकरणं समुचितमेवेति भावितुं शक्यते। गजेन्द्रमोक्षः, वामनावतारः, प्रह्लादकथा, कंसवधः, उद्धवसन्देशः, भ्रमरगीतानि इति रसवत्तरानेतान् भागान् श्रीमन्तः शास्त्रि वर्याः अतीव रम्यतया अनूदितवन्तः। शास्त्रिवर्याणां शैलीपरिशीलनार्थं एकमुदाहरणम्।

क्षीणं मेऽङ्गबलं धृतिर्विचलिता स्थानाच्च्यवन्ते ऽसवः
सम्मुग्धोऽस्मि भृशं कृशोऽस्मि नितरां स्विन्नोऽस्मि भिन्नोऽस्मि च।
न त्वद्वेद्म्यपरं शरण्यमव मां क्षान्त्वापराधान् रया-
दायाहीश्वर पाहि मां वरद भो संरक्ष सर्वेश्वर! (90 पृष्ठम्)

पोतनमहाकविना वृत्त्यनुप्रासादिशब्दालङ्कारैः परिपोषितं रामणीयकं अनुवादेऽपि सम्यक् सम्पोषितं दृश्यते।

In Public domain. Digitization Muthulakshmi Research Academy

अन्यदेकमुदाहरणम्
ताटङ्काचलनम्बुतो भुजनटद्धम्मिल्लबन्धम्बुतो
शाटीमुक्तकुचम्बुतो नदृढचञ्चत्कान्तितो शीर्णला-
लाटालेपमुतो मनोहरकरालग्नोत्तरीयम्बुतो
कोटीन्दुप्रभतो नुरोजभरसङ्कोचद्वलग्नंबुतो (8-102

संस्कृतानुवादः
इत्यान्दोलितकर्णिका कुचतटीस्रस्तोत्तरासङ्गिका
स्कन्धालम्बितवेणिका विगलितप्राञ्चन्मणीकाञ्चिका।
स्वेदस्विन्नललाटिका रुचिरभालानर्तिनीलालका
भर्त्राकृष्टकुचांशुका स्खलितगत्यैत्यम्बुधेः कन्यका॥ (56 पृष्ठम्)

मूलपद्ये विद्यमानं शब्दसौन्दर्यं समग्रतः अनुवादे आनीतं दृश्यते।

आन्ध्रसाहित्ये कविब्रह्मबिरुदाञ्चितेन तिक्कनमहाकविना उत्तररामायण कथां गृहीत्वा निर्गद्यं 'निर्वचनोत्तररामायण' मिति काव्यं निर्मितम्। श्री लङ्क कृष्णमूर्तिशर्माणः इदं काव्यं संस्कृते परिवर्तितवन्तः। परं तु न मुद्रितम्।

गिडुगु सीतापति महाभागाः प्राचीनाधुनिक आन्ध्रकाव्येभ्यः कांश्च भागान् गृहीत्वा कवितोदयचन्द्रिकेति नाम्ना गैर्वाण्या मनूदितवन्तः। मनुचरित्र आमुक्तमाल्यदा, वसुचरित्रं, पारिजातापहरणम् इत्यादि प्रांचीन काव्यानां ए गुरजाड अप्पारावु, रायप्रोलु सुब्बारावु इत्याद्याधुनिकानां च ग्रन्थानां भाग अत्र अनूदिताः। एवं क्षेत्रयपदानां, सुमति-वेमन शतकयोः पद्यानां अ अनुवादो दृश्यते। "नाहं संस्कृतपण्डितो न च कविः किन्त्वेष यत्नः कृतः इति वाक्येन स्वीयं विनयं प्रकटितवन्तः। किन्तु सरसकवितारचने तेषामती प्रज्ञावैभवं दृश्यते।

एकमुदाहरणं पश्यत
का त्वं भीतमृगेक्षणेऽत्र विहरस्येकाकिनी निर्भयं
कान्तारे मदगर्वितोऽहमिह मे भ्रष्टोऽस्मि मार्गादहो।
नालं गन्तुमितः परं मम पुरं मार्गं न जानाम्यये
मार्गं दर्शय सद्गुणे करुणया श्रेयांसि भूयांसि ते। कवितोदयचन्द्रिका 4 पृ

 In Public domain. Digitization Muthulakshmi Research Academy

'एव्वते वीवु भीतहरिणेक्षण' इति मनुचरित्रकाव्यपद्यस्य इदं संस्कृतीकरणम्।

उदाहरणान्तरं आमुक्तमाल्यदापद्यानुवादं पश्यत।

पक्षाभ्यन्तरगुप्तशीर्षवलितं केदारकुल्यान्तरे
निद्रायोगसमेतहंसनिवहं दृष्ट्वा तदारक्षके।
स्नातब्राह्मणपिण्डिताम्बरमिति भ्रान्त्या तदाप्तुं गते
प्रोड्डीना विहगास्त एव जहसुः केदारगोपांङ्गनाः॥

अयं श्लोकः 'तल बक्षच्छट गृच्चि बातुवुलु, इति आमुक्तमाल्यदा पद्यस्य अनुवादः।

प्रथितयशोभिः विद्वत्कविभिः चिट्टिगुडूरु वरदाचार्यमहाभागैः सुमति शतकादीनि नैकानि आन्ध्रशतकानि संस्कृते ललितशैल्यां परिवर्तितानि।

सीतापतिमहाभागा न केवलं प्राचीनच्छन्दोनिबद्धामान्ध्रकवितां अपितु आधुनिकानां गेयछन्दोनिबद्धामपि कवितां संस्कृतभाषायां परिवर्तयामासुः। एकमुदाहरणं पश्यन्तु

स्वदेशधर्मे भव रागबद्धः
संवर्धय त्वं सुकृतं वरेण्यम्
अलं प्रसङ्गेन निरर्थकेन
सङ्कल्पय त्वं परमोपकारम् (पृ.9)

अयं श्लोकः

देशमुनु प्रेमिंचुमन्ना
मंचि अन्नदि पेंचुमन्ना
वट्टिमाटलु गट्टिपेट्टोय्
गट्टिमेल् तलपेट्टवोय्

इत्यस्य आन्ध्रगेयस्य अनुवादः।

आधुनिकान्ध्रसाहित्ये कवितारङ्गे मूर्धन्या वर्तन्ते डा. सि. नारायण

In Public domain. Digitization Muthulakshmi Research Academy

रेड्डि महाभागाः। एतेषां नैकासु कृतिषु 'प्रपञ्चपदी' नाम्नी न केवलमन्यतम
अपि तु विलक्षणा। अत्र अन्याय्यं, स्वार्थः, द्रोहः, वञ्चना, दौर्जन्यं, अहंकार
कृतघ्नता इत्यादयो नैके लोकप्रवृत्तयो वर्णिताः शतकपद्धत्या। अत्रायं परम
विशेषो यदत्र च्छन्दोविषये कापि नूत्ना रीतिः समाश्रिता मूलकविन
उर्दूपारसी भाषयोः रुबायीति प्रसिद्धं छन्दो दृश्यते। अस्मिन् चत्वारः पाद
निर्दिष्टलयात्मका भवन्ति। प्रथमद्वितीय चतुर्थपादेषु अन्त्यप्रासनियतिः स्यात
तृतीयपादे अन्त्यप्रासो न भवति। तृतीयपादः प्रथमद्वितीय पादयो रनुसन्धायक
वा, तयोर्भावं आचतुर्थपादं नयन् तस्य विशेषेण रञ्जको वा भवति। सू
विशेषः, अधिक्षेपः, कविताचमत्कृति रित्यादिष्वन्यतमः कश्चन गुणविशे
पञ्चमपादे भवति।

एतादृशस्य रुबायीनाम्नश्छन्दसः चतुष्पादपरिमितस्य पञ्चममधि
पादं समायुज्य कविना पञ्चपदीति नूत्नं छन्दः कल्पितम्। एषु पञ्चसु पादे
विना तृतीयं पादं सर्वत्र अन्त्यप्रासो भवति। मूलकर्त्रा अनुसृतोऽ
नियमः अनुवक्त्रापि नियमेन अनुसृतः। अस्य काव्यस्य अनुवक्ता एतद्ग्रन्थस
रचयिता रव्वा श्रीहरिः। अनुवाद परिशीलनायं पञ्चपदीद्वयं उदाह्रियते-

पूर्णपरिषदि मानहरणे पण्डिता अद्यापि सन्ति
विदितसत्या अनृतवाचो धर्मजा अद्यापि सन्ति
पूर्वभारतचरितमधुनाप्यस्ति नो वा पुरोऽस्माकम्?
पापसन्तत्यवनचतुरा नायका अद्यापि सन्ति
शिष्यधिषणाकर्तका ननु देशिका अद्यापि सन्ति (3)

विटप एव स्थितो गगनं सञ्जिहीर्षसि मानव!
तीर एव स्थितो जलधिं व्याजिघृक्षसि मानव!
त्वं तु मानव हस्तमात्रो व्याममात्रं त्वीषणम्
कोशमस्पृष्ट्वैव दातुः कीर्तिमिच्छसि मानव!
त्यागमविधायैव नेतुः ख्यातिमिच्छसि मानव! (5)

एतदनुवादस्य रचयित्रा रव्वा श्रीहरिणा केन्द्र साहित्य अकाडेमीत
2002 तमे वर्षे पुरस्कारो लब्धः।

In Public domain. Digitization Muthulakshmi Research Academy

काकतीयशिलालेखेषु कवितासौन्दर्यम्

अशेषमप्यान्ध्रदेशं एकच्छत्रतया प्रजारञ्जकत्वेन च चिरकालं परिपालितवत्सु राजन्यवंशेषु काकतीयानां वंशः अतीव प्रख्यात इति सर्वेषामपि विदितचर एव विषयः। एतद्वंशीयानां राजन्यानां परिपालनकाले संस्कृतान्ध्रभाषयोः शिल्पसङ्गीतादिकलानाञ्च महानादरः आसीत्। प्रतापरुद्र यशोभूषणस्य कर्ता विद्यानाथः, उदारराघवस्य प्रबन्धा शाकल्य मल्लिकार्जुनभट्टः, चतुस्सप्तति काव्यानां निबन्धा अगस्त्यपण्डितः इत्यादयो बहवः कवयः एतेषां राजन्यानां काले विराजिता दृश्यन्ते। काकतीयचक्रवर्तिनामन्यतमस्य गणपतिदेवस्य चमूपतिना जायपाख्येन नृत्तरत्नावलीति प्रशस्तो नाट्यशास्त्रग्रन्थो व्यरचि। अनेनैव गीतरत्नावलीति, वाद्यरत्नावलीति च सङ्गीतवाद्य ग्रन्थौ रचिताविति ज्ञायते। किन्तु तावद्य अलब्धावेव। एवं काकतीय चक्रवर्तिनां काले शिल्पकलाऽपि अत्युच्चदशायां विराजमाना आसीदित्यत्र तैर्निर्मिता अनुपमशिल्पवैभवेन विराजमानाः सहस्रस्तम्भदेवालयाद्याः साक्ष्यं वहन्ति। विशालजलाशयादीनां निर्माणं विधाय प्रजासंक्षेमतत्पराश्च आसन्। तेषां परिपालनकालः आन्ध्रदेशचरित्रे स्वर्णयुग आसीदित्यत्र न कापि संशीतिः।

विदितमेवेदं यत् प्राचीनराजन्याः स्ववंश क्रमादिकं, स्वीयजैत्र यात्रादिकं, देवालयेभ्यो भूदेवेभ्यश्च कृतं दान धर्मादिकं च शिलालेखेषु विलेख्य समकाले उत्तरकाले च स्वीयां कीर्तिं व्यापितवन्तः। काकतीय राजन्या अपि आन्ध्रदेशे बहून् शिलालेखान् बहुत्र प्रतिष्ठाप्य काकतीयवंशस्य तत्कृतानां सत्कृत्यानाञ्च प्रकटनेन महान्तमुपकारमकार्षुः। इमे च शिलालेखाः गैर्वाण्यामेवमान्ध्रभाषायां च विरचिता वर्तन्ते। एतेन काकतीयानां संस्कृतभाषायां, तथा प्रजानां व्यवहारभाषायामान्ध्रभाषायां च विद्यमानो बहुमानः ज्ञातुं शक्यते।

एतेषाञ्च शिलालेखानां रचयितारः न साधारणाः अपितु महाकाव्य रचने समर्थाः कविवरेण्या इति वक्तुं शक्यते। ते च इमान् शिलालेखान् न केवलं विषयविवरणप्रधानान् अपि तु काव्यशोभाकरै रसालङ्कारादिभिरंशै र्विलसतः काव्यखण्डानिव रचयामासुरित्यत्र न सन्देहः।

In Public domain. Digitization Muthulakshmi Research Academy

काकतीयराजन्यैः प्रतिष्ठितेषु नैकेषु संस्कृत शिलालेखेषु द्वित्रा परिगृह्य तत्र परिदृश्यमानां काव्यशोभां, तथा तत्कर्तृणां कवितल्लजा कवितानिर्माणचातुरीं च अस्मिन्निबन्धे परिशीलयामः।

सहस्रस्तम्भदेवालयशिलालेखः (1163)

अयं च शिलालेख आन्ध्रदेशीये ओरुगल्लु (वरङ्गल् इत्यधुनात व्यवहारनाम) नाम्नि काकतीयानां राजधानीनगरे विद्यमाने सहस्रस्तम देवालये काकतीयचक्रवर्तिना काकतिरुद्रदेवेन ११६३ तमे क्रिस्त्वब प्रतिष्ठापितः। काकतिरुद्रदेवः सहस्रस्तम्भदेवालयं निर्माप्य तत्र स्वनाम रुद्रेश्वरं देवं एवं वासुदेवञ्च प्रतिष्ठाप्य तद्देवता पूजानिर्वहणाद्यर्थं 'मद्दिचेरुवुल नामकं ग्रामं दानरूपतया प्रददावित्यंशः अत्र प्रधानः। तथाप्यत्र काकतिरु देवस्य विजयादिकमपि वर्णितमस्ति। अस्य शिलालेखस्य रचयित भारद्वाजगोत्रिकः, रामेश्वरदीक्षितस्य पुत्रः, अद्वयामृतयतेश्च शिष्यः विद्वत्कवि अचिन्तेन्द्रयतिः। अयं शिलालेखमिमं कथं वा काव्यखण्डरूपेण जग्रन्थेति परिशीलयामः।

शिलालेखस्य आदौ कविरचिन्तेन्द्रयतिः स्वजिह्वाग्रे वाग्देवी सत वसत्विति प्रार्थयमानस्तामेवं स्तौति–

जातेव दुग्धलहरीभिरुदञ्चतीव
दुग्धोदधेरमृतदीधितिनिर्मितेव।
श्रीखण्डपिण्डपरिपाण्डुरपुत्तलीव
वक्त्रे वसत्वविरतं तु सरस्वती नः॥

अमृतदीधितिनिर्मितेव प्रतिभासमाना सरस्वती अस्माकं मुखे अनवरतं निवसत्विति वदन् स्वकवितापि रसामृततुन्दिलेति संसूचयति।

रुद्रदेव स्तत्तद्गुणेषु ब्रह्मणा सम इति श्लेषालङ्कारप्रयोगेण सम्यक वर्णितः अधोनिदिष्टे श्लोके।

न्यग्भूतीकृतराजहंसनिकरः पद्मोद्भवैकाश्रयः
श्रीरुद्रश्चतुराननो बुधवरानन्दैकहेतुर्भृशम्।

In Public domain. Digitization Muthulakshmi Research Academy

नानाशास्त्रविचारणैकचतुरो ब्राह्मीविलासाश्रयः
कल्पाक्लृप्तगतिः क्षिताविह शतानन्दः स्वयं पार्थिवः ॥

अत्र राजहंस (राजहंसपक्षिणः-राजश्रेष्ठाः), पद्मा (कमलम्-लक्ष्मीः), चतुराननः (चतुर्भिराननैर्युक्तः-चतुरेण अननेन युक्तः), बुधवर (देवताश्रेष्ठाः-पण्डितवराः) ब्राह्मी (सरस्वतीदेवी-वाक्), कल्प (युगः-कल्पशास्त्रम्) इत्येतेषां श्लिष्टपदानां प्रयोगेण काकति रुद्रदेवस्य ब्रह्मणा समनता अतीव चारुतया वर्णिता।

एवमेव रुद्रदेवः विष्णुदेवश्च तत्तद्गुणेषु समानाविति श्लेषाश्रयेण सुष्ठु वर्णयति। पश्यत-

सत्यासक्तमना निरस्तनरकक्लेशश्च लक्ष्म्याश्रयः
पृथ्वीभृद्यदनन्तभोगनिलयः शश्वद्द्विजेन्द्रप्रियः।
दुष्टारिष्टविमर्दनः सुमनसामभ्यर्थितार्थप्रदो
गोत्रप्रोद्धरणः सुदर्शनकरो रुद्रः स्वयं केशवः ॥

अत्रापि सत्या-सत्य (सत्यभामा-सत्यम्), नरक (नरकासुरः-नरकलोकः) अनन्तभोग (अनन्तस्य शरीरम्-बहुभोगाः) द्विजेन्द्र (गरुडः, बाह्मणश्रेष्ठाः) सुमनस् (देवताः-विद्वांसः) गोत्र (गोवर्धनगिरिः-वंशः) सुदर्शन (सुदर्शनाख्यं विष्णोरायुधम्, समीचीनं दर्शनम्) - इत्येवं - रूपश्लिष्टपदानां प्रयोगेण रुद्रस्य विष्णुतुल्यत्वं रमणीयतया वर्णितम्। श्लेषालङ्कारार्थं प्रयुक्ताः शब्दाः अपि सरलाः, सुलभमर्थावगाहनसमर्थाश्च।

रुद्रदेवस्य रणरङ्गशूरता एवं वर्णिता।

पादन्यासशिलाः शिरांसि समरे कृत्तानि खड्गेन य -
च्छत्रूणां पतितानि मांसविलसत्पङ्केऽशङ्के ह्यहम्।
रक्तस्रोतसि रुद्रदेवजयिनो नृत्यत्कबन्धाः प्लवाः
आयान्त्या विजयश्रियश्च सविधं कीर्तेः प्रयान्त्या दिशः ॥

समराङ्गणे विजृम्भितो रुद्रदेवः स्वखड्गेन वीराणां कण्ठान् समुच्छिनत्ति स्म। तदा सर्वाऽपि रणभूमिः रक्तमांसैः पङ्किला सञ्जाता। कृत्तानि च शत्रूणां

In Public domain. Digitization Muthulakshmi Research Academy

शिरांसि तत्र तत्र शिला इव दृश्यन्ते। कबन्धास्तु प्राणावशेषतया इतस्ततश्चलन्तो वर्तन्ते। इमं च दृश्यं कविरचिन्तेन्द्रयतिरेवमुत्प्रेक्षते। युद्धे विजेतारं श्रीरुद्रदेवं वरीतुं तत्समीपमागन्तुं प्रवृत्ताया विजयलक्ष्म्या आगमनाय, एवं रुद्रदेवात् चतुर्ष्वपि दिक्षु व्याप्नुवत्याः कीर्तिकान्ताया गमनाय च पङ्किलायां भूमौ कृत्तानि शिरांसि पादन्यासशिलाः इव, कबन्धाश्च उडुपानीव आसन्निति उत्प्रेक्षापरिणामालङ्काराभ्यां वर्णितो विषयः अतीव हृदयङ्गमो वर्तते।

रुद्रदेवस्य कीर्तिमाहात्म्यमचिन्तेन्द्रयतिरेवं वर्णयति।

स्फायत्कैरवतीन्दुरम्बुजपतिः स्पष्टाम्बुजत्यम्बरं
लोलं नीलसरोजति स्फुटयशोदुग्धोदधौ सम्प्रति।
ज्योतींषि स्फुटबुद्बुदन्ति हरितः कूलन्ति लोकास्त्रय
श्चञ्चद्वीचिचयन्ति यस्य जयति श्रीरुद्रदेवोऽद्भुतम्।

रुद्रदेवस्य यशोदुग्धाम्बुधौ मग्नं विविधं वस्तुजातं कथं वा प्रतिभातीत्यंशं कैरवति, अम्बुजति, सरोजति, बुद्बुदन्ति, कूलन्ति, वीचिचयन्ति इति नैकेषामाचारक्विबन्तशब्दानां प्रयोगेण वर्णयन् श्लोकस्य किंचन विलक्षणं सौन्दर्यमापादयति कविः।

एवमचिन्तेन्द्रयतिः कवीश्वर इमं शिलालेखं मार्कि पञ्चाशच्छ्लोक घटितं रसालङ्कारादिकाव्यगुणशोभितमेकं मनोहरं लघुकाव्यं निर्माय सहृदयानां विदुषां कवीनाञ्च परमानन्दं जनयति।

बूदपुरशिलालेखः (1272)

संस्कृतभाषायां निबद्धः अयं शिलालेखः आन्ध्रप्रदेशीयमहबूब्नगर मण्डलान्तर्गते 'बूदपुरी' नामके ग्रामे काकतीयवंश्याया रुद्रमदेवीराज्ञ्याः परिपालनकाले १२४२ तमे क्रिस्त्वब्दे प्रतिष्ठापितः। अस्य च कर्ता पदक्रमयुतयजुर्वेदपारगः, शब्दविद्याविशारदः कवीश्वरः ईश्वरभट्टोपाध्यायः। अस्य पिता मयूरसूरिः, पितामहः ईश्वरभट्टश्च विद्वत्कवी। ईश्वरभट्टोपाध्यायः अस्मिन् शिलालेख रचने स्वीयचित्र कवितानिर्माणदक्षतां नैकधा प्रकटीकरोति। कानिचन उदाहरणानि परिशील्यन्ताम्।

 In Public domain. Digitization Muthulakshmi Research Academy

पोत्री धात्री सलीलोद्धरणपरिणतः श्रीधरः पातु युष्मान्
ईषत्सोष्मक्षणोत्थश्वसनपरिहृतापारनीरप्रपूरः।
यद्दंष्ट्रादण्डलग्ना क्षिति रति लसति प्रस्फुरद्गर्ववप्र-
क्रीडासंसक्तरेणुः श्रियमियमुररीकुर्वती पर्वताङ्का॥

अयं च श्लोकः स्रग्धराच्छन्दसि निबद्धः। अत्र पादादिस्थानां पोत्री, ईषत्, यत्, क्रीडा इति पदानां निरासेन इदं आर्याछन्दो भवति। अतोऽयं श्लोकः आर्यागर्भः।

एवमत्र शिलालेखे निर्दन्त्यतया, निष्कण्ठ्यतया च चित्रकविता निबन्धनं दृश्यते।

निर्दन्त्यताया उदाहरणम् -
श्रीबाहाबहुरागकारि रुचिरक्रीडाकरः श्रीकरः
श्रेयश्श्रेणिमरङ्कपिष्ट परमां युष्माकमीशः श्रियः।
धर्मिप्रक्रमडम्बराम्बरपरप्राचुर्यचर्याक्षर-
क्षीरापारगभीरकूबरपयोराशिप्रकाशाशयः॥

निष्कण्ठ्यताया उदाहरणम् -
निरीतिनीति सुप्रीति भूरिभूतिनुतिद्युति
सुरीनिधीधृतिस्फूर्तिः श्रीसूतिर्भुवि विद्विषि

अत्र न केवलं निष्कण्ठ्यता अपितु शब्दालङ्कारवैभवोऽपि अधिकतया निविष्टः।

शिलालेखस्य रचयिता ईश्वरभट्टोपाध्यायः पाणिनीय शब्दशास्त्रे विद्वान्। अतः स्वीयपाणिनीयव्याकरणप्रीतिमेवमाविष्करोति।

सद्धातुवृद्धपृथ्वादि समासालीसमन्वितः।
नदीपूरणसम्पूर्णः पाणिनीयमते च यः।

अत्र तटाकवर्णनं प्रस्तुतो विषयः। तटाकं पाणिनीय शास्त्रेण उपमित्य वर्णनं कृतमित्यत्र विशेषः। पाणिनीये सत्संज्ञा, धातुसंज्ञा, वृद्धसंज्ञा,

In Public domain. Digitization Muthulakshmi Research Academy

पृथ्वादिगणः, समासाः, नदीसंज्ञा, पूरणार्थकाश्च प्रसिद्धाः। तटाकपक्षे च सद्धातु वृद्धः = उत्तम धातुजलेन वृद्धः-वृद्धिं गतः इति, पृथुः = महान् इति; समासाली समन्वितः = लघुना तटेन सहित इति, नदीपूरणसम्पूर्णः = नदीजलेन सम्पूर्ण इति च अर्थः। सुन्दरः श्लेषालङ्कारप्रयोगः।

अपरमुदाहरणं पश्यत-

शत्रूनाशु पिपेष वीरनिरतान् बन्धून् पुपोषात्मनो
दारेष्वेव तुतोष नित्यविलसन्नीत्योन्मिमेष क्षितौ।
सौन्दर्यं च मुमोष शम्बररिपोर्विश्वं विशेषत्विषा
सद्धर्मं विशिशेष यः परहितं तोषादियेष प्रभुः॥

अत्र काकतीयचक्रवर्तिनं गणपतिदेवं वर्णयन्, कविर्नैकान्, लिट्लकारान् प्रयुञ्जानः श्लोकस्य कामपि शाब्दिकीं शोभामापादयति।

वर्धमानपुरशिलालेखः (1245 A.D.)

शिलालेखोऽयं काकतीयचक्रवर्तिनो गणपतिदेवस्य चमूपतिष्वन्यतमेन मल्यालगुण्डयाख्येन, तस्य धर्मपत्न्या कुप्पाम्बिकानाम्न्या च आन्ध्रदेशीय महबूबनगर् (पाल़मूरु) मण्डलान्तर्गते वर्धमानपुराख्ये ग्रामे १२४५ तमे क्रिस्त्वब्दे देवालयप्रतिष्ठासन्दर्भे प्रतिष्ठापितः। अस्य च रचयिता ईश्वरार्यस्य पुत्रः मयूरसूरिः। अयं पदवाक्यप्रमाण प्रमेयविचित्रकवित्वतत्त्वज्ञ इति प्रसिद्धः। आत्रेयगोत्रिकः अभिनवमयूरसूरिरिति निर्दिष्टोऽयं प्रसिद्धमयू कवेरनुकर्तृत्वेन वा कवितारचने मयूरतुल्यत्वेन वा अनेन अभिनवमयूरसूरिरिति बिरुदमुपलब्धं भवेत्। अलङ्कारादिसामग्र्या काव्यशैल्यां निबद्ध्दोऽयं सहृदय हृदयावर्जको दृश्यते। अलङ्कारप्रयोगे कवयितुर्मयूरसूरेर्नैपुण्य प्रदर्शयितुमेकमुदाहरणं परिशील्यताम्।

आकारतो रतिपतिः स्वयमेव योऽसौ
वीरः प्रचण्डचरितः परमेष भेदः।
अस्त्रीकरोति मदनः समराङ्गणे स्त्री-
र्वीरानयं तु कुरुतेऽस्त्रधरानपि स्त्रीः।

गुण्डयसेनापतेर्वर्णनपरोऽयं श्लोकः। स्वयं रतिपतितुल्यः। एवं वीर

In Public domain. Digitization Muthulakshmi Research Academy

प्रचण्डचरितश्च। परन्त्वयं भेदः। समराङ्गणे स्त्रीः अस्त्रीकरोति (अस्त्राणि करोतीत्यर्थः)। अयं तु गुण्डयाख्यः अस्त्रधरानपि स्त्रीः अबलान् = शक्ति हीनान् करोति। उपमानादपि उपमेयस्य आधिक्योक्त्या अत्र व्यतिरेकालङ्कारः। स च चमत्कारावहः।

एवमस्य शब्दालङ्कारप्रयोगेऽपि महत् दाक्ष्यं दृश्यते।

चञ्चच्चामरचारुचन्द्रकरुचिप्राचुर्यचर्योज्ज्वलाः
पीनोत्तुङ्गकुचाग्रचूचुकचलच्चीनाञ्चलाचञ्चलाः।
वारस्त्रीनिजलोचनोचितरुचोऽराजन्त यस्याग्रतो
जातः श्रीमहदेवभूपतिलकस्तस्मात्समग्रौजसः॥

अत्र श्लोकद्वयेऽपि कविना निबद्धः अनुप्रासः सहृदयमनांसि नून मावर्जयति।

अजनि रजनिकान्तानन्तभोगानुरागः
कपटसुभटभूपाटोपभीष्मादमुष्मात्।
गणपतिरतिवीरारातिभूपालकालः
कदनसदनकृत्तोन्मत्तशुण्डालदण्डः॥

मयूरसूरिश्चित्रकवितानिर्माणेऽपि दक्ष आभाति। पश्यत तस्य इमौ श्लोकौ।

नित्यं गुम्भितमत्र नाम सदृशाकारप्रचारस्पृशा
न क्रोडद्विपयूपगेषु सरसक्ष्माचित्रसानु ह्रदम्।
मन्ये वीर्यकरप्रशस्तिसदनं नीतं यशोति क्षमा
मानाख्या नियमं नयस्थमलिकं शाखिष्वदन्तं रमा॥

हृदयानन्दकन्दो यः सन्नुतं प्रततत्विषाम्।
मदध्वानं स्वकं प्रायस्तनुते प्रथितत्विषाम्॥

अत्र प्रथमश्लोके चक्रबन्धः, द्वितीयश्लोके गोमूत्रिकाबन्धश्च निबद्धौ।

एवमन्येष्वपि काकतीयशिलालेखेषु नैकान् कविताविशेषान् द्रष्टुं शक्यते।

In Public domain. Digitization Muthulakshmi Research Academy

बेल्लङ्कोण्ड रामरायकवीन्द्रस्य जीवनरेखा

हयग्रीवमन्त्रोपासनासम्प्राप्तसमस्तविद्यः, शताधिकग्रन्थनिर्माणदक्षः प्रथितयशाः श्रीमान् बेल्लङ्कोण्डोपाह्वयो रामरायकवीन्द्रः आन्ध्रप्रदेशान्तर्गत गुण्टूरुमण्डलान्तर्गते पमिडिपाडुनामके अग्रहारे बेल्लङ्कोण्डाख्ये वंशे 27-12-1875 तमे दिने जनिं लेभे। हनुमाम्बा, मोहनरायश्च अस्य पितरौ। बेल्लङ्कोण्डवंशीयानां न केवलं पमिडिपाडु अग्रहारः अपितु दोण्डपाडु, गुण्डगार्लपाडु नामकावग्रहारावप्यास्ताम्। नैकेषु ग्रामेषु भूस्वामित्वेन ते प्रभुसम्मिता आसन्। बेल्लङ्कोण्डवंशः बहोः कालात् पण्डितानां, दातॄणां, व्यायाम विद्यापारङ्गतानां, गानविद्याकुशलानां, व्यवहारदक्षाणां च महदालवाल व्यराजत। एतद्वंशीयेषु यद्यपि सर्वेऽपि पण्डिताः तथापि केचिच्छिष्यान् संस्कृतभाषामध्यापयन्तः साहित्यचक्रवर्तिनः आसन्। रामरायस्य पितृपादाः श्रीमन्तः मोहन्राय महोदयाः विद्यार्थिनः संस्कृतविद्यां बोधयन्तः दुर्दैववशात् पञ्चविंशतिवर्षवयस्येव दिवमगमन्। प्रथममाङ्गलविद्याभ्यासे कृतमतयः तृतीयफारं पर्यन्तं पठित्वा अनारोग्यवशात् मध्ये एव आङ्गलविद्याभ्यासं परित्यज्य गृहं निवृत्ताः। ततः तत्रैव अग्रहारे वर्तमानानां सीतारामय्यपण्डित वराणां सविधे रामरायः शब्दमञ्जरीमारभ्य किरातार्जुनीयकाव्य प्रथमसर्गं यावत् अभ्यस्तवान्। सीतारामय्यपण्डितवर्या एव रामरायस्य प्रथमगुरवः।

एवं स्वपुरोहितानां सविधे नमकचमकादीन्, तत्तदुपनिषद्गतान् मन्त्रांश्च अभ्यस्य परम्परया आगतां हयग्रीवसालग्रामसहितां देवतार्चनां नित्य भक्त्या निर्वहन्तः हयग्रीवाराधनं विद्याभिवृद्ध्यै मुख्यं कारणमिति मन्वानास्तमेव दैवं ध्यायन्तः संस्कृतविद्याभ्यासं निरन्तरमकुर्वन्। रामरायस्य दैवभक्त्या चित्तशुद्ध्या च परितुष्टो भगवान् कदाचिद्रात्रौ ब्राह्मणरूपेण साक्षाद्भूय हयग्रीवमन्त्रमुपदिश्य मन्त्राङ्गभूतानि कवचादीनि वैखानसश्रेष्ठानां रत्नमाचार्य महोदयानां सकाशे प्राप्तुं शक्यन्ते इत्युक्त्वा अन्तर्दधौ। तदनुसारं रामरायः रत्नमाचार्याणां सविधे हयग्रीवकवचं सम्पाद्य स्वयमुद्बुध्दया कविताशक्त्या रमावल्लभशतकम्, स्तुतिः एवमादीन् ग्रन्थान् व्यरचयत्। तदनन्तरं सीतारामय्य

In Public domain. Digitization Muthulakshmi Research Academy

सकाशे रघुवंशकुमारसम्भवकाव्ये, मेघसन्देशकाव्यं च अधीत्य अनन्तरं स्वयमेव विद्याध्ययने प्रवृत्तः षोडशवर्षवयस्येव रामरायः नैषधादि काव्यानि, कुवलयानन्दादीनलङ्कारशास्त्रग्रन्थांश्च अधीयाय। तस्मिन्नेव वयसि स रुक्मिणीपरिणयचम्पूः, रमापरिणयचम्पूः, कन्दर्पदर्पविलासभाणम्-इत्यादीन् ग्रन्थान् रचयितुं प्रारेभे। एवं ज्योतिश्शास्त्रेऽपि प्रज्ञां सम्पाद्य जातकफलान्यपि वक्तुं समर्थः आसीत्। क्रमेण रामरायस्य कीर्तिर्दशसु दिक्षु व्याप्तुमारभत।

रामरायकविः प्रत्यहमुषःकाले एव प्रबुद्धो वाप्यां स्नात्वा तत्र जले स्थित्वा सन्ध्यावन्दनं, सहस्रगायत्रीं, हयग्रीवसहस्रमन्त्रानुष्ठानं च साङ्गं विधाय अनन्तरं हयवदनादि पञ्चायतनं अभिषिच्य मध्याह्ने भोजनादिकं कृत्वा अपराह्णे विद्यार्थिनो नैषधादिकाव्यानि, कुवलयानन्दरसगङ्गाधरादी नलङ्कारशास्त्रग्रन्थांश्च पाठयित्वा पुनः सायन्तने काले सन्ध्यावन्दनं कृत्वा विद्यार्थिभिश्चिन्तनादिकं कारयित्वा ग्रन्थरचनादिकार्यं कृत्वा स्वीयनित्यकृत्यानि नियमानुसारं अनुतिष्ठन् आस्त। तदानीं तस्य व्याकरणशास्त्रस्य, न्यायशास्त्रस्य च अध्ययने प्रगाढा इच्छा समजनि। तस्मिन्नेव समये आन्ध्रप्रदेशान्तर्गत गद्वाल नामकपत्तने विद्वत्परीक्षायायां समन्वेतुं ततो गच्छन्तौ रामशास्त्रिसुब्रह्मण्य शास्त्रिनामकौ विद्वांसौ रामरायकवीन्द्रस्य गृहमागतौ। एतयोराद्यो रामशास्त्री व्याकरणशास्त्रे, द्वितीयश्च न्यायशास्त्रे च विद्वांसौ। तयोः सन्निधौ रामरायकविः सिद्धान्त कौमुद्यां पूर्वभागं, न्यायशास्त्रे प्राथमिकग्रन्थांश्च अधीत्य न्यायव्याकरणयोः समीचीनमभिनिवेशं समपादयत्। द्वावपि गुरू मासत्रयानन्तरं स्वाग्रामौ प्रतिनिवृत्तौ। ततो रामरायकविः स्वयमेव व्याकरणतर्कशास्त्रग्रन्थेषु परिश्रमं कृत्वा तयोः शास्त्रयो र्विशेषं ज्ञानं समवाप। तदैव स व्याकरण सिद्धान्त कौमुद्याः 'शरद्रात्रि' नामकं व्याख्यानं, एवं कुवलयानन्दीय श्लोकानां केषाञ्चन व्याख्यानमपि सुगमया शैल्या व्यरचयत्।

तर्कव्याकरण साहित्यशास्त्राणामध्ययनेन साकं रामरायः विशिष्टाद्वैत शास्त्रग्रन्थानपि अधीत्य तत्रापि वैदुष्यं सम्पादितवान्। रामरायकवीन्द्रस्य अप्रतिमां प्रतिभां, निरर्गलं च वैदुष्यं ज्ञातवतः पूर्वगुरुद्वयस्य सूचनानुरोधं अभिनवकालिदासबिरुदाञ्चितेन वेल्लालचिदम्बरशास्त्रिणा विरचितस्य 'प्रतिपदं ध्वनेर्जृंभित' मिति प्रथितस्य भागवतचम्पू काव्यस्य 'व्याख्यातुं

In Public domain. Digitization Muthulakshmi Research Academy

नवकालिदासकविताभीति स्तथाप्यस्ति मे' इति तद्व्याख्या रचने स्वस्य भीति संसूचयन्नपि वेङ्कटरायकविः शब्दालङ्कारध्वन्यादिविशेषाणां प्रख्यापनपूर्वकं सुन्दरं व्याख्यानं व्यरचयत्। अनन्तरं समुद्रमथन, कृष्णलीलातरङ्गिण्यादयो बहवो ग्रन्थाः, मुरारेरनर्घराघवनाटकस्य व्याख्या च तेन रचिताः। स्वयं पण्डितकविः रामरायकविः विद्वत्कविषु गौरवेण प्रतिवर्षं तान् पारितोषिकादिदानेन सम्मानयति स्म।

नित्यजिज्ञासुर्विद्याव्यसनी अयं विशिष्टाद्वैतप्रतिपादकं श्रीभाष्यं अद्वैतप्रतिपादकं शाङ्करभाष्यं, उपनिषत्सूत्रभाष्यादिकं च अधीत्य तुलनात्मकं विमृश्य च क्रमेण विशिष्टाद्वैत मते अनिष्टतावृतमनस्को बभूव। ततो रामरायकविः अद्वैतविशिष्टाद्वैतसिद्धान्तप्रतिपादकानां गीतोपनिषत्सूत्र भाष्याणां तद्व्याख्यानानां च विमर्शपूर्वकमध्ययनं कृतवान्। एतस्मिन्नेव अवसरे स्वसन्निधौ गीताभाष्यमधीतवतां राल्लबण्डि नरसिंहशास्त्रिणां प्रार्थनानुसारं गीताभाष्यार्कप्रकाशिकाख्यां व्याख्यां विरचितवन्तः। एषा च व्याख्या विद्वत्प्रशंसायाः पात्रमभूत्। एवं ग्रन्थरचने निरन्तरमेव निमग्नः रामरायकविः माकिं 146 ग्रन्थान् लघून् बृहतश्च विरच्य अनुपमं यशः अधिजगाम।

कदाचित् गुण्टूरुमण्डलान्तर्गते नरसरावुपेट नामके पत्तने निरूढे सुगृहीत नामधेययोः अवधानविद्याचतुराननयोः तिरुपति, वेंङ्कट कव्योरवधान कार्यक्रमे रामरायकविवर्येण 'पश्य पश्यौ न पश्यति' इति काचन समस्या प्रदत्ता। तदा अवधानिवर्यौ इयं समस्या असाधुः, अतः पूरयितुमियमनर्हेति निराचक्रतुः। अत्र निराकरणे अवधानिनोरिदं तात्पर्यम्-'आतश्चोपसर्गे' (3-1-136), पाघ्राध्माधेट्दृशश्च (3-1-137) इति पाणिनीयं सूत्रद्वयं शप्रत्ययविधायकम्। दृश्धातोः 'श' प्रत्ययविधायके पाघ्राध्मेति सूत्रे 'आतश्चोपसर्गे' इति पूर्व सूत्रात् उपसर्गे इत्यस्य अनुवर्तनेन शप्रत्ययः उपसर्ग पूर्वकादेव दृश्धातोर्भवेत् नतु निरुपसर्गकात्। अतो निरुपसर्गं पश्य इति शप्रत्ययान्तं रूपं असाधु इति तेषामभिप्रायः।

अस्मिंश्च विषये रामरायकवेरिदं समाधानम्-अत्र 'आतश्चोपसर्गे' इति सूत्रात् 'उपसर्गे' इति पदस्य 'पाघ्राध्मे' ति उत्तर सूत्रे अनुवर्तने

In Public domain. Digitization Muthulakshmi Research Academy

प्राचीनवैयाकरणसम्मतम्। किन्तु भट्टोजिदीक्षितादीनां नवीनवैयाकरणानां मतानुसारेण उत्तरसूत्रे उपसर्गे इति पदस्य अनुवर्तनं न भवति। अतो नवीन वैयाकरण मतानुसारं 'पश्य' इति 'श' प्रत्ययान्तं रूपं साध्वेव इति। अनेन रामरायकवेः व्याकरणशास्त्रवैदुष्यमवगन्तुं शक्यते।

एवं निरन्तरं शास्त्रविचारे, रचनाव्यासङ्गे च बध्दादरो रामराय कविः शताधिकान् ग्रन्थान् विरच्य संस्कृतसरस्वत्या गलसीमानमलमकार्षीत्। सर्वे प्येते ग्रन्था देववाण्यामेव विरचिताः। तेषां ग्रन्थरचने यावानुत्साहः न तावानुत्साहस्तेषां प्रकाशने। कदाचित्कविवरस्य शिष्याणामन्यतमेन "यदि भवद्भी रचिता ग्रन्था न प्रकटीक्रियन्ते कालक्रमेण तेषां विनाश एव भवति खलु" इति पृष्टः कविरित्थं समादधौ- "अहं सर्वदैव ब्रह्मविचारणतत्परः। निरन्तरं ब्रह्मविचारेणैव कालक्षेपं कर्तुमिच्छामि। मद्ग्रन्थरचनस्य फलं ब्रह्मविचार एव न यशःप्राप्त्यादिकम्। व्यासशङ्करकालिदासादयः प्रथमं मुद्रणालयान् संस्थाप्य किं ग्रन्थरचनमारब्धवन्तः? तेषां ग्रन्था अद्यापि सजीवा एव खलु वर्तन्ते। एवमेव मदीया अपि ग्रन्थाः सत्तासत्वे चिरं जीवन्ति। अनपत्योऽहमग्रहारस्य क्रयेणापि ग्रन्थान् किमर्थं न मुद्रापयामि इति युष्माकं सन्देहो भवेत्। तथा करणं गा हत्वा तच्चर्मणा क्रियमाणानां पादरक्षाणां दानेन समानम्। किन्तु पुरुषार्थप्रदायकं नैव भवति। आशरीरपतनमद्वैतग्रन्थानां रचनरूपेण ब्रह्मविचारं करिष्यामि। अपरोक्षसाक्षात्कारस्य अधिगम एव जीवनस्य फलं खलु" इति अहो रामरायस्य ऐहिकयशःप्राप्तौ बलवती निरीहा?

अद्वैतामृतम्, वेदान्तसङ्ग्रहः, वेदान्तदीपिका, वेदान्ततत्त्वामृतम्, मोक्षप्रसादः इत्यादयो ग्रन्थाः रामरायकवीन्द्रस्य जीवनकाल एव मुद्रिताः। भगवद्गीताभाष्यार्थप्रकाशिका, शारीरकचतुस्सूत्रीविचारः, अद्वैतविजयः, चम्पूभागवतम्, वेदान्तमुक्तावली, शरद्रात्रिः (सिद्धान्तकौमुद्या व्याख्या) – एते ग्रन्थास्तज्जीवनकालसमनन्तरमेव मुद्रिताः। एते सर्वेऽपि ग्रन्था रामरायकवीन्द्रस्य कीर्तिपताका विलसन्ति।

आबाल्यमेव अनुसरता अजीर्णताव्याधिना, मधुमेह व्याधिना च

In Public domain. Digitization Muthulakshmi Research Academy

बाधितो निरन्तरग्रन्थरचनपरिश्रमेण च विश्रमरहितो रामरायकविर्भिषक्समी
नीतः। तदा स भिषक् "यदि नित्य ग्रन्थरचनव्यासङ्गः कञ्चित्कालं विरम्य
तर्हि अहं व्याधिं दूरीकरोमि" इति रामरायकविमवदत्। तदा रामरायकवि
"एषा व्याधिस्तु स्थूलशरीरमेव कृशीकर्तुं समर्थः। सूक्ष्मशरीरं बाधितुं अस
शक्तिर्नास्ति खलु। अतो ग्रन्थरचनव्यासङ्गस्य यथा भङ्गो न भवेत् तथ
चिकित्स्ये" इति समाधत्तवान्। तदा "ब्रह्मविचाररूपरसायनमेव भव
परमौषधम् नान्यत्" इति भिषजा उक्ते रामरायकवीन्द्रः स्वग्रामं प्रतिन्यवर्तत
अनन्तरं कर्कटकेन दष्टः तत्कारणेन च सञ्जातेन राजव्रणेन 27.10.1914 त
दिवसे दिवमलञ्चकार। अहो दुर्दैवविलसितमिदं यत् रामरायकविः केवलं 3
वर्षाण्येव जीवित्वा परलोकमवापुरिति। रामरायकवीन्द्रेण लिखितेषु 14
ग्रन्थेषु यद्यपि केचन मुद्रिताः बहवो ग्रन्थास्तत्र तत्र प्रकीर्णाः सन्ति। ग्रन्था
वैशिष्ट्यमजानद्भिः केचन ग्रन्थाः वणिग्भ्यः सम्पुटीकरणाय विक्रीता इ
ज्ञायते। अहो सरस्वत्याः कीदृशमपमानम्। कविता वेङ्कटसुब्रह्मण्यमहाभाग
रामराय कवीन्द्रस्य ग्रन्थानां सम्पादने महान्तं प्रयत्नं कृत्वा किञ्चिदि
सफलीभूतः। कवीन्द्रस्य नैके ग्रन्था अद्यापि अलब्धा एव वर्तन्त इ
विषादकारणमेव।

एवमान्ध्रप्रदेशे गुण्टूरुमण्डलान्तर्गते 'पमिडिपाडु' नामके अग्रह
लब्धजन्मानः बेल्लङ्कोण्डरामरायकवीन्द्राः निरन्तरं ग्रन्थनिर्माणे बद्धाद
विरचितशताधिकग्रन्थाः, सततं ब्रह्मविद्याविचारेणैव जीवनं सार्थकं कृतवन्त
कीर्तिकाया अस्माकं चिरस्मरणीयाः।

बेल्लङ्कोण्डरामरायकवीन्द्रेण विरचितानां ग्रन्थानां पट्टिक
विद्वज्जनोपयोगाय दीयते।

1. अद्वैतान्यमतखण्डनम्
2. अद्वैतामृतम्
3. अद्वैतविजयः
4. अद्वैताष्टकम्
5. अग्न्यष्टकम्
6. अम्बाष्टकम्
7. अश्वत्थामाष्टकम्
8. अर्चाष्टकम्
9. अमरावतीश्वराष्टकम्
10. आञ्जनेयाष्टकम्

In Public domain. Digitization Muthulakshmi Research Academy

11. आत्माष्टकम्
12. आशयहितोपदेशाष्टकम्
13. ईश्वरीरूपसङ्ग्रहाष्टकम्
14. उपनिषदष्टकम्
15. कल्क्यष्टोत्तरशतनामावली (सव्याख्या)
16. कलिभूषणम्
17. कविताष्टकम्
18. काममीमांसा
19. कुमारस्वाम्यष्टकम्
20. कुवलयानन्दकतिपयश्लोक व्याख्या
21. कूर्माष्टोत्तरशतनामावली (सव्याख्या)
22. कृष्णाष्टोत्तरशतनामावली (सव्याख्या)
23. कृष्णोद्धवसंवादव्याख्या
24. कृष्णलीलातरङ्गिणी
25. कृपाष्टकम्
26. कोटीशाष्टकम्
27. कन्दर्पदर्पविलासभाणम्
28. गरुडसन्देशः
29. गणपत्यष्टकम्
30. गङ्गाष्टकम्
31. गुञ्जागर्वभञ्जनम्
32. गोदावर्यष्टकम्
33. चन्द्राष्टकम्
34. चित्रप्रभोपोद्घातः
35. जनन्यष्टकम्
36. जनार्दनस्तुतिः
37. जयाष्टकम्
38. त्रिपुरासुरसंहारान्तरार्थ प्रतिपादकमेकं पद्यम्
39. त्रिमतसम्मतम्
40. त्रिमूर्त्यष्टकम्
41. तुलस्यष्टकम्
42. दत्तात्रेयाष्टकम्
43. दीक्षिताष्टकम्
44. देहदेहिभावनिर्मूलनम्
45. द्वैताद्वैतविशिष्टाद्वैत सांख्या-चलमतसम्मताष्टकम्
46. धनवर्णनम्
47. धर्मप्रशंसा
48. नारसिंहाष्टोत्तर शतनामावली (सव्याख्या)
49. नियोगिवैदिकजनहितोपदेशः
50. पञ्चाननपलायनम्
51. परमात्मसहस्रनामावली
52. परशुरामाष्टोत्तरशतनामावली
53. पश्यशब्दमीमांसा
54. प्रदक्षिणस्तवराजः
55. पिनाकिन्यष्टकम्
56. ब्राह्मणशब्दविचारः
57. बोद्धाष्टोत्तरशतनामावली (सव्याख्या)

In Public domain. Digitization Muthulakshmi Research Academy

58. भगवद्गीता (शाङ्कर) भाष्यार्क प्रकाशिका
59. भगवद्गीताष्टकम्
60. भगवद्भजनाष्टकम्
61. भगवत्सम्बोधनाष्टकम्
62. भागवतचतु:श्लोकी व्याख्या
63. भागवतचम्पूव्याख्या
64. भागवताष्टकम्
65. भारतान्तरार्थविवरणम्
66. भूम्यष्टकम्
67. मत्स्याष्टोत्तरशतनामावली (सव्याख्या)
68. मनस्सम्बोधनाष्टकम्
69. मायाव्यष्टकम्
70. मुक्ताहरिलता
71. मुरहराष्टकम्
72. मुरारिनाटकव्याख्या
73. मोक्षप्रसाद:
74. रमापरिणयचम्पू: मञ्जर्यात्मिका (रमापतिरायचम्पू:)
75. रमाराधाष्टकम्
76. रमावल्लभरायशतकम्
77. रमावल्लभरायस्तुति:
78. रङ्गनायकाष्टकम्
79. रामाष्टोत्तरशतनामावली (सव्याख्या)
80. रामस्मरणाष्टकम्
81. रामाष्टकम्
82. रामायणान्तरार्थप्रतिपादक श्लोकत्रयम्
83. रामायणाभ्युदयहरिकथा
84. रूक्मिणीपरिणयचम्पू: (सव्याख्या)
85. लक्ष्म्यष्टकम्
86. लोकायतादियोगान्त मतखण्डनम्
87. वराहाष्टोत्तरशतनामावली (सव्याख्या)
88. वायव्याष्टकम्
89. वामनाष्टोत्तरशतनामावली (सव्याख्या)
90. व्यासाष्टकम्
91. विजयाष्टकम्
92. विद्यार्थविद्योत:
93. विमतखण्डनपूर्वकाद्वैतमत स्थापनाष्टकम्
94. विश्वरूपगद्यम्
95. विष्णुभक्त्यष्टकम्
96. विष्णुविजय:
97. विष्णुसहस्रनामावली (सव्याख्या)
98. वीरराघवस्तुति:
99. वेङ्कटनाथाष्टकम्
100. वेदान्ततत्त्वामृतम्
101. वेदान्तसङ्ग्रह:

In Public domain. Digitization Muthulakshmi Research Academy

102. वेदान्तनिश्चय:
103. वेदान्तमुक्तावली
104. वेदान्तकौस्तुभम्
105. वेदान्तदीपिका
106. वेदान्तदिनकरम्
107. वेदाद्रिसालग्रामनृसिंहाष्टकम्
108. वेदाद्रियोगानन्दनृसिंहाष्टकम्
109. वृषकथाप्रतिपादक भागवतान्तरार्थप्रतिपादकमेकं पद्यम्
110. वैजयन्ती
111. शङ्कराशङ्करभाष्यविमर्श:
112. शङ्कराष्टकम्
113. शरद्रात्रि: (वैयाकरणसिद्धान्तकौमुदीव्याख्या)
114. शारीरकचतु:सूत्रीविचार:
115. शिवभुजङ्गप्रियदाष्टकम्
116. शिवस्तुति:
117. शिवाष्टकम्
118. श्रीमद्धयग्रीवाष्टकम्
119. शूद्रधर्मदर्पणम्
120. शेषाष्टकम्
121. समस्यारत्नाकर:
122. समुद्रमथनचम्पू: (मञ्जर्यात्मिका)
123. सरस्वतीस्तुति:
124. सागराष्टकम्
125. सालग्रामाष्टकम्
126. सिद्धान्तसिन्धु: (सिद्धान्तबिन्दुव्याख्या)
127. स्वीकारनिर्णय:
128. सुमनोमनोरञ्जनम्
129. सूर्याष्टकम्
130. सोमसुन्दराष्टकम्
131. हनुमद्दण्डकम्
132. हनुमन्नाटकव्याख्या
133. हनुमदष्टकम्
134. हयग्रीवतारास्रजम् (सव्याख्यम्)
135. हयग्रीवाष्टकम्
136. हयग्रीवपदानुपेक्षाष्टकम्
137. हयग्रीवनवरत्नस्तुति:
138. हयग्रीवदण्डकम्
139. हयग्रीव अष्टोत्तरशतनामावली (सव्याख्या)
140. हयग्रीवसहस्रनामावली (सव्याख्या)
141. हयराजाष्टकम्
142. हयवदनशतकम्
143. हिरण्यगर्भाष्टकम्
144. वेदान्तडिण्डिम:

आधारग्रन्था: : Contribution by Andhras to Sanskrit Literature by Prof. B. Rama Raju

श्रीबेल्लङ्कोण्डरामरायकवीन्द्रजीवितचरित्रम् (Telugu) by Lanka Sundararama Sastry

In Public domain. Digitization Muthulakshmi Research Academy

शुक्रनीतिसारस्य वैशिष्ट्यम्

संस्कृतभाषायां आध्यात्मिकविषयसम्बन्धिनो वेदोपनिषदादयः, मनस आह्लादकारकाणि काव्यनाटकादीनि, एवं व्याकरणादिशास्त्रजालमेव वर्त इति, मानवजीवनोपयोगीनि साङ्ख्किकशास्त्राणि तथा साङ्केतिकशास्त्राणि सन्तीति लोके सामान्यजनेषु कश्चन दुरभिप्रायो वर्तते। अद्यतने काल संस्कृतभाषाया अध्ययनाध्यापनयोः वेदोपनिषदादीनां, काव्यनाटकादीन व्याकरणादिशास्त्राणामेव स्थानं कल्पयित्वा साङ्केतिकशास्त्राणां (Technica Sciences) स्थानं न कल्पितमितीदमेव तत्र कारणमिति भाव्यते। संस्कृतभाषाय साङ्केतिकशास्त्राणामभाव इति वचनं सर्वथा सत्यदूरम्। गणितं, खगोलम् आयुर्वेदः, वृक्षायुर्वेदः, विमानशास्त्रम्, वास्तुशास्त्रम्, शिल्पशास्त्रम्, रत्नशास्त्रम् गजशास्त्रम्, अश्वशास्त्रम्, लोहशास्त्रम्, धनुश्शास्त्रम्, अर्थशास्त्रम्, राजनीति शास्त्रम् एवमन्यान्यपि बहूनि शास्त्राणि संस्कृतभाषायामद्यापि विराजमानानि दृश्यन्ते। वराहमिहिरः, आर्यभटः, चाणक्यः, शुक्रः, चरकः, सुश्रुतः भारद्वाजः मयः इत्यादीनां साङ्केतिकशास्त्रप्रवक्तॄणां नामानि प्रसिद्धान्येव महदिदं शोचनीयं स्थानं यत् तत्तत्साङ्केतिकशास्त्र पाठ्यक्रमः सर्वोऽपि अद्य विदेशीयविज्ञानविषय एव न तत्र भारतीयानां पुरातनसाङ्केतिकशास्त्राध्यनस् कोऽप्यवकाशः विद्यते इति। अस्मिन् विषये भारतीयपरिपालकानां विद्यावेत्तॄणां च यदौदासीन्यं न तदभिनन्दनीयम्। दुर्नीतिपूरितमेकाले विद्याविधानेन, पारतन्त्र्यमग्नत्वेन, भारतीयानां औदासीन्यभावेन संस्कृतभाषाध्ययनाध्यापनयोः क्रमेण सञ्जातेन ह्रासेन, साङ्केतिकशास्त्राण पाठ्यक्रमे स्थानाभावेन च एषां प्रचारो न बभूवेति विज्ञाः सम्भावयन्ति।

उपर्युक्तशास्त्रेष्वन्यतमं शास्त्रं अर्थशास्त्रम् साङ्ख्किकशास्त्रम्। अ राजनीतिः (Political Science), अर्थशास्त्रम् (Economics), परिपालनविधानम् (Public Administration) इत्येतद्विषयत्रयमन्तर्भवति।

संस्कृतवाङ्मये अर्थशास्त्रसम्बन्धिनो ग्रन्था बहवः सन्ति। एते चाणक्यस्य अर्थशास्त्रम्, शुक्रनीतिः, कामन्दकीयम् इत्यादयः प्रसिद्धाः 'स्वाम्यमात्य सुहृत्कोशराष्ट्रदुर्गबलानि चे' ति वाक्यानुसारं राज्यस्

 In Public domain. Digitization Muthulakshmi Research Academy

षडङ्गत्वेन अर्थशास्त्रग्रन्थेषु एतेषां षडङ्गानां विवरणं भवति। अर्थशास्त्रग्रन्थेष्वन्य तमस्य शुक्रनीतिसारग्रन्थस्य विशिष्टताविवेचनमेव अस्य निबन्धस्य विषयः।

'शुक्रनीति' ग्रन्थः नैकलक्षश्लोक परिमितो ग्रन्थ इति, असुरैः प्रार्थितेन शुक्राचार्येण तेभ्यः उपदिष्टं नीतिशास्त्रमिति, अतिविस्तृतस्यास्य ग्रन्थस्य संक्षेपो वसिष्ठादिभी ऋषिभिः अल्पायुषां राजादीनां कृते विहित इति च ग्रन्थारम्भे विद्यमानैरेतैः श्लोकैर्ज्ञायते।

सम्पूज्य भार्गवः पृष्टो वन्दितः पूजितः स्तुतः
पूर्वदेवैर्यथान्यायं नीतिसारमुवाच तान्
शतलक्षश्लोकमितं नीतिशास्त्रमथोक्तवान्
तत्सारं तु वशिष्ठाद्यैरस्माभिर्वृद्धिहेतवे
अल्पायुर्भूभृदाद्यर्थं संक्षिप्तं तर्कविस्तृतम् (1-2,3,4 श्लोकाः)

संक्षिप्तरूपोऽयं ग्रन्थः षड्विंशति शतश्लोकपरिमितः। तत्तदध्यायेषु वर्तमानाः श्लोकाः, प्रतिपादिता अंशाश्च अत्र एवं वर्तन्ते।

अध्यायः	श्लोकानां संख्या	प्रतिपादितः अंशः
प्रथमाध्यायः	388	राजकार्यनिरूपणम्
द्वितीयाध्यायः	431	युवराजादीनां लक्षणानि
तृतीयाध्यायः	326	राज्ञो हिंतकारिणी नीतिः
चतुर्थाध्यायः		
प्रथमप्रकरणम्	119	सामाद्युपायाः, मित्रोदासीनशत्रवः
द्वितीयप्रकरणम्	128	कोशनिरूपणम्
तृतीयप्रकरणम्	99	विविधकलानां निरूपणम्
चतुर्थप्रकरणम्	204	लोकधर्मनिरूपणम्
पञ्चमप्रकरणम्	331	राजधर्मनिरूपणम्
षष्ठप्रकरणम्	426	सेनानिरूपणम्
पञ्चमाध्यायः	96	विशिष्टविषयनिरूपणम्

पञ्चस्वध्यायेषु निरूपितान् तत्तद्विषयान् राजा सम्यग् ज्ञात्वा

In Public domain. Digitization Muthulakshmi Research Academy

प्रजापालनं कुर्यात्। तदैव राज्यं सुभिक्षं भवेत्। प्रजाश्च सुखं जीवेयुः। अद्यतनपरिपालकानामपि अनुसरणीया नैके विषया अत्र वर्तन्ते। प्रजापालनं कुर्वति राज्ञि आवश्यकान् गुणान् अधोनिर्दिष्टः श्लोकः एवं विवृणोति।

पिता माता गुरुर्भ्राता बन्धुर्वैश्रवणो यमः
नित्यं सप्तगुणैरेषां युक्तो राजा न चान्यथा (1-7)

पिता, माता, गुरुः, सोदरः, बन्धुः, कुबेरः, यमः - इत्येतेषां सप्तानां गुणैर्युक्त एव राजेति अस्य आशयः। स्वपुत्रादिकं गुणवन्तं कुर्वतः पितुर्लक्षणम्, पुत्रादीनामपराधान् सहमानायाः, प्रेम्णा तान् पोषयन्त्याश्च मातुर्लक्षणम्, शिष्येभ्यः उत्तमाः विद्या बोधयतः हितमुपदिशतश्च गुरोर्लक्षणम्, पित्रा आर्जिते धने भागं स्वीकुर्वतो भ्रातुर्लक्षणम्, सर्वदा आप्तस्य रक्षणे कृतबद्धेर्मित्रस्य लक्षणम्, आवश्यकतायां धनस्य सञ्चयं कुर्वतो धनदस्य लक्षणम्, यथापराधदण्डस्य यमस्य लक्षणम् - इत्येतानि सर्वाणि लक्षणानि यस्मिन् राज्ञि भवन्ति स एव वृद्धिं प्राप्नोतीति राज्ञो वैशिष्ट्यं प्रतिपादितम्।

धर्माधर्ममार्गप्रवृत्तिरूपाया लोकस्थिते राजैव प्रधानं कारणमिति शु.नी.सा. एवं वदति।

'धर्माधर्मप्रवृत्तौ तु नृप एव हि कारणम्' (4-7-422)

'यथा राजा तथा प्रजाः', 'राजा कालस्य कारणम्' इत्यादीनि वाक्यानि स्मारयदिदं वाक्यं प्रजापरिपालकस्य गुरुतरां धुरां सूचयति।

करग्रहणरीतिं विवृण्वन्, यथा मालाकारः विनैव शाखादीनां हानिं जागरूकतया मुकुलानि चिनोति तथा राजापि प्रजानाम् अल्पामपि हानिमकुर्वाणः करान् गृह्णीयादिति सूचितम्।

'मालाकार इव ग्राह्यो भागो नाङ्गारकारवत्' 4-2-110

कर्षकेभ्यः करग्रहणसन्दर्भे प्रथमं भूमेर्मापनं, धान्य प्रमाणानुसारं भूमिं बहु, मध्यम, अल्पश्रैणीषु विभज्य भूमेः करं निर्णीयादिति, करग्रहणं कर्षकस्य कथमपि नष्टिजनकं न भवेदिति च शु.नी.सा. कर्ता सूचयति।

 In Public domain. Digitization Muthulakshmi Research Academy

बहुमध्याल्पफलितं भुवं मानमितं सदा
हरेच्च कर्षकाद्भागं यथा नष्टो भवेन्नृपः (4-2-109)

शु.नी. सारे राजोद्योगिनां संक्षेमविषये, तेषां भृतिविषये च उक्ता विषया आधुनिकरीति मुद्बोधयन्ति। राजोद्योगिभ्यः प्रति वर्षं पञ्चदशदिन वेतन परिमितं वेतनं अधिकवेतन (Bonus) रूपेण देयमिति, प्रतिवर्षं वेतने अष्टमांशः पारिताषिकरूपेण देय इति, एवं शीघ्रं तथा अधिकं कर्म च कुर्वाणस्य अधिकं वेतनं (Overtime Payment) देयमिति, चत्वारिंशद्वर्षपर्यन्तं सेवां कृतवतो राजभृत्यस्य प्रतिमासं वेतने अर्धभागो दीयेत इति, तस्य असमर्थाय पुत्राय, भार्यायै, कन्यायै च वेतने चतुर्थांशो Pension रूपेण देय इति च राजभृत्यानां संक्षेमविषये नैके विषयाः प्रतिपादिताः।

सेवां विना नृपः पक्षं दद्याद् भृत्याय वत्सरे
कार्याष्टमांशं वा दद्यात् कार्यं द्रागधिकं कृतम् (11-410)

चत्वांरिंशत् समा नीताः सेवया येन वै नृपः
ततः सेवां विना तस्मै भृत्यर्थं कल्पयेत्सदा
यावज्जीवं तु तत्पुत्रे॒क्षमे बाले तदर्धकम्
भार्यायां वा सुशीलायां कन्यायां वा स्वश्रेयसे (11-408-9)

अद्यत्वे सर्वकारः सर्वत्रापि वृक्षसंरोपण कार्यक्रमं अतीव विस्तृत रूपेण निर्वहतीति वयं जानीमः। वातावरणसमतौल्यसाधनमेव अस्य प्रयोजनम्। ग्रामेषु, वनेषु च वृक्षसंरोपण पोषणयोरावश्यकता शु.नी. सारे प्रतिपादिता।

ग्रामे ग्राम्यान् वने वन्यान् वृक्षान् संरोपयेन्नृपः (4-4-15)

एवं के वा वृक्षा ग्रामे संरोपयितव्याः, के वा अटवीषु संरोपयितव्या, तेषां दोहदक्रिया का इति शु.नी.सा. स्पष्टं निरूपयति (4-4-46 प्रभृति 61 श्लोकपर्यन्तम्)

एवं राज्ञा निर्वर्त्या विधयो राज्याङ्गानां स्वाम्यमात्यादीनां सम्बन्धिनो विषयाश्च नैके अत्र ग्रन्थे प्रतिपादिताः।

In Public domain. Digitization Muthulakshmi Research Academy

सामन्तराजैश्च राज्यस्य आयः कथं वा व्ययितव्यः, कोशः कथं वा वृद्धिं नेयः ? इत्यस्मिन् विषये शु.नी.सा. एवमुद्बोधयति।

ग्रामस्य द्वादशांशेन ग्रामपान् सन्नियोजयेत्।
त्रिभिरंशैर्बलं धार्यं दानमर्धांशकेन च
अर्धांशेन प्रकृतयो ह्यर्धांशेनाधिकारिणः
अर्धांशेनात्मभोगश्च कोशोंशेन च रक्ष्यते (1-315,316)

ग्रामस्य आये $^{1}/_{12}$ भागो ग्रामपालकानां कृते व्ययितव्यः। एवं राजा वार्षिकाये $^{1}/_{3}$ भागं सैन्यनिर्वहणाय, $^{1}/_{8}$ भागं दानेभ्यः, $^{1}/_{8}$ भागं राजाधिकारिणां वेतनेभ्यः, $^{1}/_{8}$ भागं मन्त्रिप्रभृतीनां पारितोषिकाय, $^{1}/_{8}$ भागं स्वीयव्ययार्थं, शिष्टं भागं कोशागारवर्धनाय च व्ययं कुर्यादिति अत्र सामन्त राजानां व्ययरीतिः स्पष्टीकृता।

राज्यवृक्षस्य भूमिरेव बीजमिति विवृण्वता तस्य समग्रं स्वरूपमेवं विव्रियते शु.नी.सा. कर्त्रा।

राज्यवृक्षस्य नृपतिर्मूलं स्कन्धाश्च मन्त्रिणः।
शाखाः सेनाधिपाः सेनाः पल्लवाः कुसुमानि च
प्रजाः फलानि भूभागा बीजं भूमिः प्रकल्पिता॥ (5-12,13)

न केवलमत्र राजनीतिविषया अपितु सामान्य नीतिविषया अपि नैके वर्णिताः सन्ति। 'अथ साधारणं नीतिशास्त्रं सर्वेषु चोच्यते' इति श्लोकेन प्रारभ्यमाणस्तृतीयाध्यायः सर्वोऽपि सामान्यनीतिविषयानेव विस्तरं प्रतिपादयति। केचन सामान्यनीतिप्रतिपादकाः श्लोकपादा एवं वर्तन्ते

याचकाद्यैः प्रार्थितस्सन्न तीक्ष्णं चोत्तरं वदेत् (3-109)
अन्नं न निन्द्यात्सुस्वस्थः स्वीकुर्यात् प्रीतिभोजनम् (3-113)
नानिष्टं प्रवदेत्कस्मिन् न च्छिद्रं कस्य लक्षयेत् (3-118)
विद्याधनं श्रेष्ठतरं तन्मूलमितरं धनम् (3-180)
मैत्र्यर्थे याचितं दद्यादकुसीदं धनं सदा (3-191)

In Public domain. Digitization Muthulakshmi Research Academy

अवृत्तिव्याधिशोकार्तानुवर्तेत शक्तितः (3-10)
विद्यायाश्च फलं ज्ञानं विनयश्च फलं श्रियः (3-94)
आत्मार्थं यः पचेन्मोहात् नरकार्थं स गच्छति (3-139)
कर्मशीलगुणाः पूज्यास्तथा जातिकुले नहि (2-55)
न हि जातु विना दण्डं कश्चिन्मार्गे प्रतिष्ठते (4-5-277)

राजभृत्यः कथं वा भवेत्? स च कीदृग्गुणो भवेदित्यस्मिन् विषये शु.नी.सा. एवं वर्णयति

सत्यवान् गुणसम्पन्नस्तथाऽभिजनवान् धनी।
सुकुलश्च सुशीलश्च सुकर्मा च निरालसः।
यथा करोत्यात्मकार्ये स्वामिकार्यं ततोऽधिकम्
चतुर्गुणेन यत्नेन कायवाङ्मानसेन च
भृत्या च तुष्टो मृदु वा कार्यदक्षः शुचिर्दृढः (2,56,57,58)

भृत्या यद्येतादृशा लभ्यन्ते तर्हि तद्राज्ञो भाग्यमेव मन्यते।

शुक्रनीतिसारो न केवलं राजनीतिविषयानपि तु पुरातन भारतदेशस्य सामाजिक, आर्थिक, धार्मिक विषयानपि नैकान् प्रतिपादयन् अद्यापि आदरणीयो वर्तत इत्यत्र न कापि संशीतिः।

'न कवेः सदृशी नीतिस्त्रिषु लोकेषु विद्यते' (4-7-425)

इति वचनानुसारं राजनीतिशास्त्रग्रन्थेषु शु.नी. सारस्य वैशिष्ट्यं सुज्ञमेव।

In Public domain. Digitization Muthulakshmi Research Academy

अक्बर्शाप्रणीता शृङ्गारमञ्जरी

नायिकानायकाः, काव्यस्वरूपं, ध्वनिभेदाः, रसालङ्काराः, गुणदोष रीतिवृत्तयः - इत्यादयः अलङ्कारशास्त्रे प्रधानतया चर्चनीया विषय आलङ्कारिकाः केचन काव्यसम्बन्धिनः सर्वानप्येतानंशान् स्वीयालङ्कारशास्त्रग्रन् चर्चितवन्तः। अपरे च केचन एतेष्वन्यतमं कञ्चन एकमेव विषयमाव कूलङ्कषतया विवृतवन्तः। प्रतापरुद्रीयादिकं, एवं ध्वन्यालोकादिकञ्च क्रम अनयोरुदाहरणे। काव्यशास्त्रविषयेष्वन्यतमं नायिकानायकसम्बन्धिनमंशमाव समग्रतया चर्चितवत्सु अलङ्कारग्रन्थेषु शृङ्गारमञ्जरी अन्यतमा।

अस्याश्च कर्ता सप्तदशशतकीयः अक्बर्शानामा महम्मद आलङ्कारिकः। सय्यद् अक्बर्शा हुसेनीति अस्य सम्पूर्णं नाम। अस् बडेसाहेब् इति वैभवसूचक मभिधानान्तरं च वर्तते इति अधोनिर्दि शृङ्गारमञ्जरीश्लोकेन ज्ञायते।

श्रीशाहराजपुत्रोऽप्यक्बरशाहो महद्वन्द्यः।
यस्य बडेसाहेबिति नाम महावैभवैकपदम् (पीठिका)

शृङ्गारमञ्जर्याः पीठिकायां अक्बर्शाकविः स्वीयवंशवृक्षेण स स्वसम्बन्धिनोऽपि विषयान् विवृतवान् (3-16)

बन्दे नवाब् हजरत्नामा अक्बर्वंशे अतीव प्रधानः। अस्य व शाहराजः, तस्य च शाहराजा, शानफेजरुल्ला, अक्बर्शा इति त्रयः कुम आसन्। एषु द्वितीयस्य शानफेजरुल्लाख्यस्य शाराजा इति कुमारः, तस्य ब साहेब्, मीर्साहेब्, शासाहेब् इति त्रयः पुत्राः। एषु ज्येष्ठः बडे साहेबाख शृङ्गारमञ्जर्याः रचयिता। तपःशक्तिः, तेजस्विता, प्रज्ञा, धर्मः-इत्यादिगुण आत्मना समाना जगति न सन्तीति, महान् विद्वानिति, अनिर्वर्णनीयगुणसम्प इति च स्वं अतीव प्रशंशस।

कः किल तपसा महसा यशसा ज्ञानेन धर्मेण
अभविष्यद्भविष्यति जगति बडेसाहेबेन समः (1-9)

In Public domain. Digitization Muthulakshmi Research Academy

येषां ज्येष्ठः श्रीमान् विद्वान् मीमांसकश्चकास्ति विमलगुणः (11 श्लो)

अकबरमवचोगोचरगुणमपि यथामति प्रशंसन्ति (14 श्लो)

एवं अक-वर (अकबर) इतीदं स्वनाम अ-क-व-र इति पदच्छेदेन ब्रह्माणं, विष्णुं च अतिशयित इत्यर्थं सूचयतीति, बडे साहेबिति नामान्तरं च महेश्वरत्वस्य सूचकमिति च अक्बर्शा निराघाटतया प्रकटीकरोति।

को विष्णुः को ब्रह्मा ताभ्यां श्रेष्ठस्ततोऽप्यकबरोऽयम्।
प्रथयति महेश्वरत्वं यस्य बडेसाहेबिति नामभ्याम् (13 श्लो)

अक्बर्शाकवेः पिता शाराजः गोलकोण्डराजधानीं परिपालितवतः अबुल्हसन्तानीषाराजस्य राजगुरुरासीत्। पितुरनन्तरं राजगुरुत्वपदवी अक्बर्शाकविना सम्प्राप्ता भवेत्। अत एव "स्वयमकबरेण भूभृन्मणिरञ्जितां घ्रिकमलेन" इति स्वस्य राजगुरुत्वसम्माननं संसूचितम्।

न केवलमयं पितुरनन्तरं अबुलहसन् क्षोणीशस्य राजगुरुपदवी मधिष्ठितवानपि त्वयं सिद्धान्तवेदीति, रसालङ्कारतत्ववेत्तेति, सङ्गीतादिकला भिज्ञ इति, आश्रितकविबन्धुमित्रमिति च अधोनिर्दिष्टेन गद्यभागेन अवगम्यते।

"चतुरब्धिपरिवेष्टित सर्वंसहेशनुतशौर्य धैर्य मनोहरलावण्य सङ्गीत ललित साहित्य भावज्ञ सदृक्पाण्डित्यकलित सुलतान् अबुल् हसन् क्षोणीश मुकुटतट देदीप्यमान रुचिरतररत्न-किरणनीराजित कल्पतरु किसलयसदृश चरणगुरुराजशाहराज भक्तिमात्र सद्गुणगरिष्ठ परिमित हितवाक्य पाण्डित्ययुक्त स्वमतपरमतसम्पन्न सिद्धान्त निरन्तर संस्थाप नाखिल नवरसालङ्कार नव्यगुणैककवनधौरेयता कलितसन्निधान, श्रुति स्वस्स्थान रागाङ्ग गानक्रियास्थायि गमकप्रबन्ध धातुगायन गुण ततानद्ध सुषिरघनगात्रभेद क्रियाग्रहजाति मार्गताल देशिताल तत्त्वज्ञनिधि पाठिकाश्रित कविबन्धुमित्र बडे साहेबाक्बरशाहः शृङ्गारमञ्जरीग्रन्थराजं रुचिरं विरचयति।"

अक्बर्शाकविः शृङ्गारमञ्जरीं प्रथममान्ध्रभाषायां विरच्य अनन्तरं

In Public domain. Digitization Muthulakshmi Research Academy

तस्या एव सुरवाण्यां भाषान्तरीकरणं चकारेति अधोनिर्दिष्टैः श्लोकैर्ज्ञाय

तेनान्ध्रभाषारचितः शृङ्गारमञ्जरीग्रन्थः
स्वयमकबरेण भूभृन्मकुटमणिरञ्जितांङ्घ्रिकमलेन
तद्विरचितान्ध्रभाषाकलितां शृङ्गारमञ्जरीच्छायाम्
सेवध्वं सुरवाणीरचितां रसतोषरसिका भृङ्गाः

(शृङ्गारमञ्जरी 15,16 श्लो

सामान्यनायिकानिरूपणसन्दर्भे अक्‌बर्‌शाकविना आन्ध्रशृङ्गारमञ्ज उदाहरणं प्रस्तूय तस्य अर्थं विवृणोति-"प्राचीनान्ध्र भाषोदाहरणादप्ययमर्थ सिद्धः, तस्यार्थो लिख्यते" इति। (13 पृष्ठम्)

अनेन अकबर्‌शा न केवलं संस्कृतभाषायामपितु आन्ध्रभाषायाम कविपण्डित इति सूहमेव। तद्विरचिता आन्ध्रशृङ्गारमञ्जरी कृतिस्तु अलब्ध एव।

शृङ्गारमञ्जर्यां यद्यपि प्रकरणविभागो नास्ति तथापि प्रतिपादि विषयानुरोधं नायकविभागः, नायिकाविभागः, दूतीविभागः, रसविभागः इ विभागचतुष्टयं कर्तुं शक्यते। अत्र च नायिकानायक भेदाः, दूतीभेदाश्च विस्तृतत्वेन, रसविषयस्तु संक्षिप्ततया च वर्णिता वर्तन्ते। नायिकानायकयो र्भेदान् अतिविपुलं चर्चितवत्सु ग्रन्थेषु प्रधानभूता भानुदत्तस्य रसमञ्जरी अस ग्रन्थस्य आधारग्रन्थत्वेन प्रतिभाति। तथापि अक्‌बर्‌शाकविना बहु रसमञ्जरीकारस्य अभिप्राया निरस्ता दृश्यन्ते। किन्तु रसमञ्जर्या व्याख्य आमोदाख्या नैकत्र प्रमाणतया अङ्गीकृता। रसमञ्जरीकारं भानुद रसमञ्जरीकारः (19 पृ.) इत्येकवचनेन, आमोदस्य व्याख्याता गुरुजालशायिपण्डितं आमोदकाराः (19 पृ.) इति बहुवचनेन निर्दिष्टवानि आमोदकारे अक्‌बर्‌शाकवेः महद्गौरवं संसूचयति।

अक्‌बर्‌शाकविः स्वीयां शृङ्गारमञ्जरीं कथं वा निर्ममे इति तस्यै अधोनिर्दिष्टेन गद्येन ज्ञायते।

रसमञ्जरी-आमोद-परिमल-शृङ्गारतिलक-रसिकप्रिय-रसार्णव-

In Public domain. Digitization Muthulakshmi Research Academy

प्रतापरुद्रीय-सुन्दरशृङ्गार-नरसकाव्य-दशरूपक-विलासरत्नाकर-काव्यपरीक्षा-काव्यप्रकाशमुखग्रन्थान् विचार्य

प्राचीनग्रन्थेषु यानि लक्षणानि यानि युक्तियुक्तानि तानि सङ्गृह्य; अन्यानि परित्यज्य

प्राचीनोदाहरणानुसारेण नायिकाभेदान् कल्पयित्वा, तेषां लक्षणोदाहरणानि कल्पयित्वा

पूर्वग्रन्थेषु येषां लक्षणानि न सन्ति तेषां लक्षणानि रचयित्वा

येषामुदाहरणानि न सन्ति तेषामुदाहरणानि विरच्य

येषां नामानि न सन्ति तेषां नामानि स्थापयित्वा

अयुक्तनामस्थले युक्तनाम च स्थापयित्वा

विस्तरकरणस्थले विस्तरं कृत्वा

संक्षेपकरणस्थले संक्षेपं कृत्वा

सर्वस्थलेषु साधारणलक्षणानां साधारणोदाहरणानि निर्माय

प्राचीनलक्षणेषु यान्युपयुक्तानि उदाहरणानि तानि तन्नायिकास्थलेषु लिखित्वा

चर्चाग्रन्थो गद्यरूपो लक्षणग्रन्थः, फक्किकारूप उदाहरणग्रन्थः पथरूपः लक्षणोदाहरणे, नायिकानायकभेदा शृङ्गारहास्यकरुणरौद्रवीर भयानकबीभत्सा द्भुतशान्ताख्य नवरसेषु शृङ्गारस्य प्राधान्यात् शृङ्गार रसावलम्बनविभावा नायिकानायकाः शृङ्गाररसानुकूलाः सात्विकभावाः, पूर्वोक्तग्रन्थवर्णित पद्मिन्यादिजातयः, जातिसङ्करो जातिभेदाश्चैवं सरसाशेषविशेषाः निरूप्यन्ते।"

एतद्गद्यानुसारं रसमञ्जरी, आमोदः, परिमलम्, शृङ्गार तिलकम्, रसिकप्रिया, रसार्णवः, प्रतापरुद्रीयम्, सुन्दरशृङ्गारम्, नरसकाव्यम्, दशरूपकम्, विलासरत्नाकरः, काव्यपरीक्षा, काव्यप्रकाशः, इत्यादीन् नैकान् लक्षणग्रन्थान् परिशील्य अकबर्शाकविना इयं शृङ्गारमञ्जरी निबद्धेति ज्ञायते।

अत्र निर्दिष्टं नरसकाव्यं तु रामराजभूषणाख्येन आन्ध्रकविना निर्मितो

In Public domain. Digitization Muthulakshmi Research Academy

नरसभूपालीयाख्यो लक्षणग्रन्थः। सुन्दरशृङ्गारम्, रसिकप्रियेति ग्रन्थौ हिन्दी लक्षणग्रन्थौ। साहित्यरत्नाकरश्च आन्ध्रदेशीयेन लाक्षणिकवरेण धर्मसूरिणा विरचितो लक्षणग्रन्थः। रसार्णवश्च आन्ध्रदेशीयेन प्रभुणा रेचर्लसिङ्गभूपालेन विरचितो रसार्णव सुधाकराख्यो लक्षणग्रन्थः। शृङ्गारतिलकं च रुद्रभट्टेन रचितम्। अवलोकश्च दशरूपकस्य व्याख्या धनिकेन रचिता। परिमलञ्च शेषकुटुम्बीयेन शेषकृष्णस्य पुत्रेण, शेषनृसिंहस्य च अनुजेन शेषचिन्तामणिना विरचितं रसमञ्जरीव्याख्यानम्। आमोदश्च गुरुजाल रङ्गशायिना रचितः शृङ्गारमञ्जर्या व्याख्याग्रन्थः। उपर्युदाहृतगद्यभागानुसारं अक्बर्शाकवे रचनाविधानं विशिष्टमिति ज्ञायते। प्राचीनाचार्यैरुक्ता अभिप्राया नात्र यथातथं गृहीताः। तैरुक्तेषु अयुक्तान् परित्यज्य युक्तानेव परिगृह्णन्, पूर्वग्रन्थेषु लक्षणरहितानां लक्षणानि परिकल्पयन्, उदाहरणरहितानां उदाहरणानि प्रदर्शयन्, विवृतेरावश्यकतायां विवृतिं, संक्षिप्ततताया आवश्यकतायां संक्षेपं च कुर्वन् पूर्वलाक्षणिकैर्नामकरणे अविहिते नामकरणम्, अनुचितनामकरणस्थले युक्तनामकरणं च विदधन् शृङ्गारमञ्जरीं रचयामास।

एतेषु द्वित्रानंशान् परिशीलयामः।

विरहोत्कण्ठताया लक्षणस्य विवरणसन्दर्भे रसमञ्जरी, साहित्यरत्नाकरः, नाट्यशास्त्रम्, प्रतापरुद्रीयम्, नायकभूषणम्, आमोदः इत्यादि ग्रन्थेषु उक्तेषु विरहोत्कण्ठतालक्षणेषु दोषमुद्भाव्य शृङ्गार मञ्जरीकारः "निवास एव कार्यान्तरव्यासङ्ग प्रयुक्तप्रियविरहवती विरहोत्कण्ठता" (19 पृ.) इति स्वयं नूतनं लक्षणं निर्वक्ति। एवं प्राचीनैरुक्तानि लक्षणानि निरस्य नूत्नतया उक्तानि लक्षणानां निर्वचनानि अत्र बहूनि दृश्यन्ते।

अनुशयाना इति परकीयनायिकाया भेदत्रयं यद्यपि प्राचीनालङ्कार शास्त्रग्रन्थेषु उक्तम् तथापि तस्य नामकरणं न लक्ष्यते। शृङ्गारमञ्जरीकारस्तु एषा विघटितसङ्केता, अप्राप्तभाविसङ्केता, शङ्कित सङ्केतजारगमना इति नूत्नानि नामानि चकार। इमं च विषयं अक्बर्शा स्वयमेवं वक्ति "प्राचीनाखिलग्रन्थेषु अनुशयाना भेदत्रयस्यापि नामकल्पनं नास्ति, अस्माभिर्नामानि कल्प्यन्ते" इति।

In Public domain. Digitization Muthulakshmi Research Academy

एवं बहुत्र पूर्वग्रन्थेषु अलभ्या विवृतिरत्र दृश्यते। नायिकाभेदेषु दूतीभेदेषु च प्रतिभेदं उत्तमा, मध्यमा, अधमा इति भेदत्रयकल्पनं, दूती भेदेषु विक्रेत्री, शङ्किता इति अवान्तरभेदसहितं निर्देशः इत्येतादृशानस्या उदाहरणत्वेन वक्तुं शक्यते।

यद्यपि भानुदत्तस्य रसमञ्जरी अस्या उपजीव्यो ग्रन्थस्तथापि तत्रस्थानि नैकानि लक्षणानि शृङ्गारमञ्जरीकारेण निर्दयं खण्डितानि दृश्यन्ते। कानिचन उदाहरणानि दृश्यन्ताम्।

1. रसमञ्जरीकारः "अङ्कुरितयौवना मुग्धेति मुग्धालक्षण माह तत् परकीयासामान्ययोरव्याप्तमिति नास्माभिरङ्गीक्रियते"
2. पतिमात्रविषयककेलीकलापकोविदा इति प्रगल्भालक्षणमाह, तदसत्।
3. अप्रकटपरपुरुषानुरागा परकीया इति परकीयालक्षणमाह–तत् असङ्गतम्।
4. वित्तमात्रोपाधिक सकलपरपुरुषानुरागा सामान्या इति लक्षणमाह, तत् असत्।
5. सङ्केतस्थलं प्रति भर्तुरनागमनकारणं चिन्तयति सोत्का इत्युत्कण्ठिता लक्षणमाह, तदयुक्तम्।
6. सङ्केतनिकेतने प्रियमनवलोक्य समाकुलहृदया इति विप्रलब्धालक्षणमाह, इदमसमञ्जसम्।
7. अन्योन्यभोगचिह्नितः प्रातरागच्छति यस्याः पतिः सा खण्डितेति लक्षणमाह, तदसत्।
8. स्वयमभिसरति प्रियमभिसारयति वा सा अभिसारिका इत्यभिसारिका लक्षणमाह, तदयुक्तम्।

एवं बहुत्र रसमञ्जरीकारस्य लक्षणानि खण्डयन्नपि तत्र तत्र तस्य लक्षणेषु स्वीयमङ्गीकारं च प्रकटयति। एकमुदाहरणं प्रदर्श्यते।

रसमञ्जरीकारः

"स्वेदः स्तम्भोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।

In Public domain. Digitization Muthulakshmi Research Academy

वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्विकाः स्मृताः॥ इति अष्टौ सात्विकभावा लिखितवान्। इदमेव अस्माभिरप्यङ्गीकृतम्" (52 पृ.)

प्रेमाभिसारिकेति भेदो रसिकप्रियकर्त्रा लिखितः। तन्न युक्तः। सव अप्यभिसारिकाः प्रेम्णैव भवन्ति इति रसिकप्रियकर्तुरप्यभिप्रायं खण्डयति

विरहोत्कण्ठिताया लक्षणविषये साहित्यरत्नाकरकर्तुर्धर्मसूरेः नाट्यशास्त्रकर्तुर्भरतस्य, प्रतापरुद्रीय कर्तु र्विद्यानाथस्य, नायकभूषण कर्तुश्च लक्षणानि "एतानि च लक्षणानि सर्वाणि प्रोषितभर्तृकायां विप्रलब्धायां च सङ्कीर्णानीति न युक्तानि" इति निरस्यन् नूत्नानि लक्षणानि प्रतिपादयति (19 पृ.)

एतेषामुदाहरणानां परिशीलनेन इदं ज्ञायते यत् अकबर्शा कविना तत्तन्नायिकालक्षणपरिशीलने महद्वैदग्ध्यं प्रकटितमिति। तस्य शृङ्गारमञ्जरी न केवलं लक्ष्यलक्षणप्रदर्शनपरः साधारणो लक्षणग्रन्थः अपितु प्राचीन लक्षणग्रन्थानां परिशीलनेन रचितत्वेन स्ववचनानुसारं सत्यमयं चर्चा ग्रन्थ एव। नायिकानायक विषयक चर्चाप्रधानेषु अलङ्कारग्रन्थेषु अक्बर्शा कविना रचिता इयं शृङ्गारमञ्जरी प्रधानं स्थानमावहतीत्यत्र न कापि संशीतिः।

In Public domain. Digitization Muthulakshmi Research Academy

विष्णुधर्मोत्तरपुराणे चित्रकलाविवरणम्

अस्माकं प्राचीनपुराणवाङ्मये यद्यपि प्राधान्येन सर्गादिपञ्च लक्षणानां प्रपञ्चो दृश्यते तथापि तत्र तत्र विविधशास्त्रविषयाणां तथा विविध काव्यकलादि ललितकलानां च प्रस्तावः सुदर्शः। तत्तल्ललितकलानां विवरणात्मकतया प्रतिपादकाः शास्त्रग्रन्था बहवो वर्तन्ते। तथापि पुराणवाङ्मये प्रतिपादितानामपि तत्तल्ललितकला विषयाणां प्राधान्यं वर्तत एवेत्यत्र न कापि संशीतिः। ललितकलानामन्यतमायाश्चित्रकलायाः प्रतिपादकेषु पुराणेषु विष्णु धर्मोत्तराख्यमुपपुराणं मूर्धन्यं वर्तते। तत्र प्रतिपादितानां चित्रकलासम्बन्धिनां विशेषाणां विमर्शनमेव अस्य निबन्धस्य प्रतिपाद्यो विषयः।

विष्णुधर्मोत्तरपुराणे (वि.ध.) तृतीयखण्डे काव्यकलादीनां षण्णां कलानां वर्णनं कृतमस्ति। तत्तदध्यायेषु विवृतानां कलानां विवरणं एवं वर्तते।

काव्यकला (Literature)	2–17	अध्यायाः
गीतकला (Music)	18–19	,,
नृत्यकला (Dance)	20–34	,,
चित्रकला (Painting)	35–43	,,
प्रतिमाकला (Sculpture)	44–85	,,
प्रासादकला (Architecture)	86–88	,,

एवं विष्णुधर्मोत्तरपुराणे 87 अध्यायेषु कृतं षण्णां कलानां वर्णनमस्य पुराणस्य वैशिष्ट्यं प्रकटयति। एवमस्माकं प्राचीन पुराण कर्तॄणां ऋषीणां तत्तत्कलासु वर्तमानमभिनिवेशं, उत्तरकाले च तस्य विज्ञानस्य लोके प्रसारणे विद्यमानां गाढामास्थां च द्योतयति। वि.ध. पुराणे विवृतां चित्रकलामुद्दिश्य अत्र किञ्चिद्विविच्यते।

अत्र च पुराणे तृतीयखण्डस्य 35 तमादध्यायात् 43 तमाध्यायपर्यन्तं नवसु अध्यायेषु चित्रकला वर्णिता वर्तते। पुराणमुनिना चास्य भागस्य 'चित्रसूत्र' मिति नाम कृतम्। अस्मिन् पुराणे तत्तदध्यायेषु प्रतिपादिता अंशा एवं वर्तन्ते।

In Public domain. Digitization Muthulakshmi Research Academy

35 अध्यायः आयामोच्छ्रायाः
36 ,, प्रमाणानि
37 ,, सामान्यमानानि
38 ,, प्रतिमालक्षणम्
39 ,, क्षयवृद्धयः
40 ,, रङ्गव्यतिकरः (चित्रकर्मणि आवश्यकानां विविधवर्णानां विधानम्)
41 ,, रङ्गवर्तनम्
42 ,, रूपनिर्माणम्
43 ,, रसभावनिरूपणम्

सर्वास्वपि ललितकलासु चित्रकलैव प्रधानेति वि.ध. पुराण तत्प्राशस्त्यमेवं वर्णयति।

यथा सुमेरुः प्रवरो नगानां
यथाण्डजानां गरुडः प्रधानः
यथा नराणां प्रवरः क्षितीशः
तथा कलानामिह चित्रकल्पः (3-43-39)

अस्माकं भारतदेशे अतिप्राचीनकालात् चित्रकला वर्तमाना वर्धमाना च दृश्यते। कालिदासादीनां प्रचीनकवीनां ग्रन्थेषु च अस्याः प्रस्तावः पुरातनकाले चित्रकलाया महोच्चस्थितिं, एवमादरणीयताञ्च व्यञ्जयति। चित्रशालां गता मालविका प्रत्यग्रवर्णरागं चित्रं चिरकालं पश्यन्ती स्थितेति मालविकाग्निमित्रे वर्णितम्। एवं कुमारसम्भवे परमेश्वरस्य तपस्सन्दर्भे निश्चलं तद् वनं "चित्रार्पितारम्भमिवावतस्थे" इति वर्णनेन रम्यमूहचित्रं परिकल्पितम्। अभिज्ञानशाकुन्तले च नायकेन दुष्यन्तेन शकुन्तलायाश्चित्रं लिखितमिति वदन् कालिदासः 'यद्यत् साधु न चित्रे स्यात् क्रियते तत्तदन्यथा' (6-13 श्लो.) इति चित्रे असाधोः साधुकरणं प्रस्तुतम्। भवभूतिरपि उत्तररामचरितनाटके वीथिकेति नाम्ना रामायणकथासम्बन्धिनः चित्रपटानुल्लिलेख। इयमद्यतना Picture Gallery सदृशीति वक्तुं शक्यते।

In Public domain. Digitization Muthulakshmi Research Academy

एवं बाणभट्टोऽपि बहुत्र एतासामुल्लेखं कृतवान्।

यश्च चित्रसूत्रं न जानाति तस्य प्रतिमालक्षणज्ञानम् एवं अर्चा लक्षणज्ञानं च न भवतीति चित्रसूत्रज्ञानस्य आवश्यकतामेवं प्रकटयति वि.ध. पुराणकर्ता।

चित्रसूत्रं न जानाति यस्तु सम्यक् नराधिप
प्रतिमालक्षणं वेत्तुं न शक्यं तेन कर्हिचित्
चित्रसूत्रं समाचक्ष्व भृगुवंशविवर्धन
चित्रसूत्रविदेवाथ वेत्त्यर्चालक्षणं यतः

लोकहितकाम्यया नारायणमुनिना उर्वश्याः सृष्टिसमये सहकारफलरसेन स्वस्य ऊरावेका सौन्दर्यवती स्त्री चित्रिता। तस्माच्च चित्रात् रूपसम्पन्ना अप्सरा एका उर्वशीनाम्नी जनिं लेभे। नारायणमुनिश्च तच्चित्रं सलक्षणं कृत्वा विश्वकर्मणे दत्वा तस्मै चित्रविद्यां बोधयामासेति चित्रविद्याया आविर्भावो वर्णितः।

नारायणेन मुनिना लोकानां हितकाम्यया
सहकाररसं गृह्य ऊर्वां चक्रे वरांस्त्रियम्
चित्रेण सा ततो जाता रूपयुक्ता वराप्सराः।
एवं महामुनिः कृत्वा चित्रं लक्षणसंयुतम्
ग्राहयामास स तदा विश्वकर्मणमच्युतम्

(वि.ध.पु. 3-35-2,3,4,5 श्लोकाः)

एवं च चित्रकलाया आदिप्रवक्ता नारायणमहामुनिरिति ज्ञायते। भगवतो रूपाभावेन तस्य रूप कल्पनविषये वज्रनामकस्य यज्ञे सञ्ज्ञातानां सन्देहानां निवृत्त्यात्मकत्वेन मार्कण्डेयेन इदं वृत्तसूत्रं वज्राय प्रोक्तमिति ज्ञायते, नृत्ते इव चित्रेऽपि त्रैलोक्यानुकरणं भवति। नृत्ये या दृष्टयः, ये भावाः, यानि च अङ्गोपाङ्गानि, ये च हस्ता उक्तास्तत्सर्वमपि चित्रेऽपि भवति इत्यतः कारणात् नृत्तमपि यथार्थतः उत्तमचित्रतुल्यं भवत्येव। किन्तु नृत्ते अनुक्ताः आयामोच्छ्राया अत्र वर्णिताः (15 अध्यायः) एवं चित्रितव्यानां पुरुषाणां

In Public domain. Digitization Muthulakshmi Research Academy

स्त्रीणाञ्च मूर्धललाटादीनां तत्तदवयवानामपि प्रमाणानि विवृतानि (36, अध्यायौ) स्त्रीणां दैर्ध्यं तु पुरुषस्य स्कन्धपरिमाणपर्यन्तमेव भवेत्। केश नेत्राणाञ्च चित्रणं कथं वा स्यादिति विषयः वि.ध. पुराणे एवं वर्णितः

तरङ्गभङ्गिनः सूक्ष्मा निजस्नेहाभ्यलङ्कृताः
धनेन्द्रनीलसदृशाः केशाः कार्यास्तथा शुभाः (3-37-7)

चापाकारं भवेन्नेत्रं मत्स्योदरमथापि वा
नेत्रमुत्पलपत्राभं पद्मपत्रनिभं तथा
शङ्खाकृतिर्महाराज पञ्चमं परिकीर्तितम् (3-37-9,10)

योगस्थस्य नेत्रे धनुराकारे, स्त्रीकामुकयोः मत्स्योदराकारे, निर्विकारस् उत्पलपत्राकारे, भीतस्य तथा रुदतश्च पद्मपत्रदलाकारे, क्रुद्धस्य शङ्खाकृ चित्रितव्यानीति तत्तद्भावानुकूलचित्रणं विवृतम्।

देवतास्तु षोडशवर्षीया एव चित्रितव्या इति, पक्ष्मभ्रूभ्यः अन्य शरीरभागे केशानां चित्रणं न कार्यमिति, तासाञ्च गतयः मृगेन्द्र, वृषभ, ना हंसगतीरनुकुर्युरिति चेत्यादयो देवताचित्रविषये नैके विशेषा अत्र विवृता

अत्र पुराणे प्रधानतया कुड्यचित्राणामेव चित्रणमुद्दिश्य विविधांश निरूपिताः। कुड्यचित्ररचनाय कुड्यस्य वर्णेन लेपनं आवश्यकं भवति अतश्चित्रकारेण प्रथमं तदनुकूलं लेपनद्रव्यं कार्यं भवति। लेपनद्रव्यं कथं व कार्यमित्यस्मिन् विषये वि.ध. पुराणमेवं वर्णयति।

त्रिप्रकारेष्टकाचूर्णे त्र्यंशं क्षिप्त्वा मृदस्ततः
गुग्गुलं समधूच्छिष्टं मधु कुण्डरकं गुडम्॥

कुसुम्भतैलसंयुक्तं कृत्वा दद्यात्समांशकम्।
त्रिभागमग्निदग्धायाः सुधायास्तत्र चूर्णयेत्॥

बिल्वजं द्व्यंशमिश्रं तत् प्रक्षिप्य मषकङ्कषम्।
वालुकांशं ततो दद्यात् स्वानुरूपेण बुद्धिमान्॥

ततः कलशतो येन प्लावयेत् पिच्छिलेन तत्।

In Public domain. Digitization Muthulakshmi Research Academy

परिक्लिन्नं समग्रं तन्मासमात्रं निधापयेत्॥
मार्दवं मासमात्रेण गतमुद्धृत्य यत्नतः।
दद्यात् प्रलेपं निपुणः शुष्कं कुड्ये विमृश्यतु॥
(3-40-1,2,3,4,5,6 श्लोकाः)

उपर्युक्तश्लोकानुसारं अत्र लेपकार्ये उपयोज्यानि वस्तूनि एवं वर्तन्ते। 1. इष्टकाचूर्णम् 2. मृत्तिका 3. गुग्गुलम् 4. मधूच्छिष्टम् 5. मधु 6. कुन्दरकम् (घासविशेषः) 7. गुडम् 8. तैलसंयुक्तानि कुसुम्भपुष्पाणि 9. अग्निदग्धा सुधा 10. बिल्वजम् 11. मषी 12. सिकता।

एतैश्च वस्तुभिः कृतेन लेपविशेषेण लिप्तानि शोषितानि कुड्यानि 'मणिभूमयः' इति कथ्यन्ते। अयं च लेपः वर्षशतान्यप्यविनाशी भवति। मणिभूमयो नाम 'स्फटिकावदाता उपरिभागा' इत्यर्थः। एते च चित्रशरीराणां भूमिका भवन्ति।

श्वेतम् (White), पीतम् (Yellow), लोहितम् (Red), कृष्णम् (Black), नीलम् (Indigo) इत्येते मूलरङ्गा (मूलवर्णाः) इति, भावनाशक्त्या, स्वबुद्ध्या च चित्रकारेण एतेभ्यो मूलरङ्गेभ्यः तत्तद्वर्णानां मेलनेन अन्ये च बहवो वर्णाः कल्पनीया भवन्ति इति नैके विषया वर्णविषयका रङ्गव्यतिकरनामके चत्वारिंशे अध्याये विवृताः। न केवलं स्त्रीपुरुषाणां, देवतानामपितु द्वीपाः, पर्वताः, सागराणि, आकाशः, द्यौः, नगरम्, ग्रामः, वनम्, दुर्गम्, विविधा ऋतवः, रणभूमिः, श्मशानभूमिः, रात्रिः, प्रत्यूषम्, सन्ध्या, तमः इत्येवमादीनामपि चित्राणि कथं चित्रितव्यानि, तत्र चित्रेषु परिसराणां चित्रणं कथं वा भवेदित्यादयो बहवः अंशा अत्र पुराणे उपवर्णिता वर्तन्ते। (42 अध्यायः)

उत्तमचित्रस्य महत्त्वं वर्णयन् वि.ध.पु.कर्ता यत्र चित्रं प्रतिष्ठितं भवति तत्र शून्यता नैव भवति इति वदति (43 अध्याय)

एवमुत्तमचित्रकारः कः? कीदृशानां चित्राणां चित्रणे तस्य वैदग्ध्यं प्रकटीभवति? इत्यस्मिन् विषये वि.ध.पु. एवं स्पष्टयति।

In Public domain. Digitization Muthulakshmi Research Academy

धर्मार्थकामशुभदं कर्णं चाप्यनलङ्कृतम्।
शल्यविद्धं च वृद्धं च यः करोति स चित्रवित्॥

तरङ्गाग्निशिखाधूमं वैजयन्त्यम्बरादिकम्।
वायुगत्या लिखेद्यस्तु विज्ञेयः स तु चित्रवित्॥

सुप्तं च चेतनायुक्तं मृतं चैतन्यवर्जितम्।
निम्नोन्नतविभागं च यः करोति स चित्रवित्॥

(3-43-27,28,29 श्लोक

एवं शुभलक्षणस्य चित्रस्य स्वरूपं वर्णयन् वि.ध.पु.कर्ता
निर्वक्ति।

लसतीव च भूलम्भो श्लिष्यतीव तथा नृप
हसतीव च माधुर्यं सजीव इव दृश्यते
सश्वास इव यच्चित्रं तच्चित्रं शुभलक्षणम् (43-21,2

एवं चालुक्यमहीपालस्य सोमेश्वरस्य अभिलषितार्थचिन्ताम
भोजराजस्य समराङ्गणसूत्रधारे, श्रीकुमारस्य शिल्परत्ने, वासवस्य शिवत
रत्नाकरे, नारदशिल्पे च चित्रकलासम्बन्धिनो भागा वर्तन्ते। किन्त
सर्वेऽपि ग्रन्थाः वि.ध.पु. गतचित्रसूत्रग्रन्थादनन्तरकालिका एव। चित्रक
प्रतिपादकानां सर्वेषामपि ग्रन्थानां तुलनात्मकपरिशीलने अस्य चित्रसूत्र
वैशिष्ट्यं सम्यक् ज्ञातुं शक्यते।

In Public domain. Digitization Muthulakshmi Research Academy

अन्नम्भट्टस्य मिताक्षराव्याख्या

संस्कृतवाङ्मयीयशाखासु सर्वास्वपि आन्ध्रदेशीयाः क्षोदक्षमं वैदुष्यं सम्पाद्य तत्तच्छाखाविस्तरणाय महान्तं परिश्रमं कृतवन्तः इति समेषां विदुषां विदितचरमेव। न केवलं वैदुष्य सम्पादनेन अपितु नैकासु शाखासु नैकानमूल्यान् ग्रन्थराजान् लिखित्वा संस्कृतसरस्वतीमलमकार्षुः। अन्यास्विव शाखासु व्याकरणशाखायामपि कृतभूरिश्रमाः विरचितनैक शास्त्रग्रन्थाः नैके विपश्चितः आन्ध्रदेशीयाः परिदृश्यन्ते। तेषु तत्रभवान् अन्नम्भट्टनामा विद्वान् षोडशशताब्दी मध्यभागीयः अतिप्रसिद्धः। काश्यां शेष वीरेश्वरा दधिगत व्याकरणशास्त्र वैदुष्यः अन्नम्भट्टः न केवलं व्याकरणशास्त्रे अपितु वेदेषु, तर्क वेदान्तमीमांसादिष्वपि शास्त्रेषु मूर्धन्यो विद्वानित्यत्र तन्निर्मिता ग्रन्था एव प्रत्यक्षं साक्ष्यम्। 'काशीगमनमात्रेण नान्नम्भट्टायते द्विजः' इतीयं विश्वव्याप्ता सूक्तिः अन्नंभट्टस्य विश्वतोमुखं यशः प्रकटीकरोति। राणकोज्जीवनी (भट्टसोमनाथस्य राणकस्य टीका।) तन्त्रवार्तिकटीका, तर्कसग्रहः मिताक्षरानाम्नी ब्रह्मसूत्रव्याख्या, तत्त्वविवेचनम्, मिताक्षरानाम्नी अष्टाध्यायीव्याख्या, भाष्यप्रदीपोद्योतः (कैयट प्रदीपस्य व्याख्या - अडयार्ग्रन्थालये अस्य हस्तलेखो वर्तते) इत्येते अन्नम्भट्टेन रचिताः विविधशास्त्रीयग्रन्थाः श्रीमतः अन्नम्भट्टस्य नैकशास्त्रवैदुष्यं प्रतिष्ठापयन्ति। अस्मिंश्च पत्रे अन्नम्भट्टस्य मिताक्षरानम्नीमष्टाध्यायीव्याख्यां परिशीलयितुं किञ्चिदिव प्रयत्नः क्रियते।

तत्तदध्यायान्तगद्येषु अस्याः व्याख्याया 'व्याकरणमिताक्षरा' इति नाम संदृश्यते। अन्नम्भट्टेन बह्मसूत्राणामपि स्वरचित व्याख्यानस्य मिताक्षरेत्येव समान नामकरणेन तस्मादस्य भिन्नतां स्पष्टीकर्तुं व्याकरण मिताक्षरेति नाम कृतमिति सुवचमेव। इयं मिताक्षरा पाणिनीयस्य अष्टाध्यायीग्रन्थस्य लघुवृत्तिरूपा। व्याकरणे व्युत्पित्सूनां इयमत्यन्तोपकारिणी। संक्षेपेण व्याकरणविषयाः सर्वेऽपि अत्र प्रतिपादिताः। उक्तं च स्वयमेव अन्नम्भट्टेन स्ववृत्तेरन्ते

"ग्रन्थविस्तरभीरुभ्य इयं वृत्तिर्मया कृता
यथा व्याकरणं सर्वं करस्थामलकायते" इति।

In Public domain. Digitization Muthulakshmi Research Academy

इदं तु सत्यं यदस्या वृत्तेरध्ययनेन पाणिनीयं सर्वमपि संक्षे हस्तामलकं कर्तुं शक्येत। एवमेव तर्कसंग्रहरचनेन तर्कशास्त्र जिज्ञासूनाम संक्षेपेण तर्कशास्त्रीयविषयज्ञाने महानुपकार अकारीति सर्वे वयं जानीम ए इयं हि व्याख्या बहुधा काशिकावृत्तिमनुसरतीति विदुषामाशयः। अ कात्यायनस्य वार्तिकान्यपि व्याख्यातानि। सूत्रस्य अर्थविविरणं, उदाहर समन्वयः, दलप्रयोजनोक्ति :-इत्यादि मौलिकविषय प्रतिपादका व्याकरणजिज्ञासोरारम्भदशायामावश्यकानां अंशानां संक्षेपेण प्रतिपादनं इत लक्षणं मिताक्षरायां वृत्तौ सर्वत्र लक्ष्यमाणं अस्याः मिताक्षरेत्याख्या मन्व विदधाति। उक्तं च ग्रन्थादौ 'अन्नम्भट्टकृता मिताक्षरा नाम लघुवृत्तिः' इ मिताक्षरारचनरीतिं ज्ञातुमेकमुदाहरणं परिशील्यताम्।

"हलोऽनन्तराः संयोगः" - निरन्तरा हलः संयोगसंज्ञाः स्युः। ह इति जातौ बहुवचनम्। तेन यथासम्भवं द्वयो र्बहूनां च सज्ञा स्यात्। संयुज्य वर्णा अस्मिन्निति संयोगः इत्यन्वर्थत्वादेकस्य न। हलः किम्? तितउछत्र 'तनोतेर्डउसन्वच्च' (3-5-23) इत्यसंहितानिर्देशात् संधिर्न भवती संयोगान्तलोपप्रसङ्गः। अनन्तराः किम्? पचतिपनसम् - स्कोः संयोगाद्योरि सलोपो न।

यद्यपि सूत्रार्थविवरणं, उदाहरणेषु समन्वयः, दलप्रयोजन ख्याप इत्यादि मौलिकांशप्रतिपादनमेव मिताक्षराया वृत्तेः प्रधानं लक्ष्यं तथापि त तत्र आवश्यकानामन्येषामपि विषयाणां विवरणं चर्चारूपं दृश्यत ए प्रत्याहारसूत्रविवरणे अइउण् इत्यादौ सन्ध्यभावस्य कारणं, लृकारोपदे प्रयोजनं, अटां मध्ये विसर्जनीय जिह्वमूलीयोपध्मानीयानामुपदेशस आवश्यकत्वं इत्यादयो नैके अंशाः प्रतिपादिताः जिज्ञासूनां विशेषांशज्ञा उपयुज्यन्ते। प्रत्याहारसूत्राणां महेश्वरादधिगतत्वेन कारणेन तानि माहेश्वरसूत्रत्वे प्रतिपादितानि भट्टोजिदीक्षितादिभिः। परन्त्वन्नम्भट्टेन एषां प्रत्याहासूत्रत्वेनै निर्देशः कृतः न माहेश्वरसूत्रत्वेन।

यद्यपीयं मिताक्षरा लघुवृत्तितया निर्दिष्टा तथापि अत्र स्थानविशेषेषु प्रतिपादिताः महाभाष्य, न्यास, काशिकाकारादीनामभिप्रायाः अन्नम्भट्टस्

In Public domain. Digitization Muthulakshmi Research Academy

व्याकरणशास्त्रवैदुष्यं स्पष्टमुद्घाटयन्ति। तत्र तत्र न्यास काशिकाकारादीनामभिप्रायान् महाभाष्यविरुद्धत्वेन हेतुना निश्शङ्कं खण्डयति च। द्वित्राण्युदाहरणानि अत्र दीयन्ते।

'सर्वत्राण् तलोपश्च' इति सूत्रेण हेमन्तशब्दात् अण्प्रत्ययः एवं चकारबलेन तकारस्य लोपश्च विहितः। (हैमनः (वायुः) 'सन्धिवेलाद्यृयृतुनक्षत्रेभ्योऽण्' इति सूत्रेण अण्प्रत्यये हैमन्त इति च रूपं सिद्ध्यति। वेदे तु हेमन्ताच्चेति सूत्रेण ठञ्प्रत्यये हैमन्तिक इति रूपं भवति। किन्तु काशिकाकारः सर्वत्राण् तलोपश्च इति सूत्रात् सर्वत्रेति शब्दस्य हेमन्ताच्चेति पूर्वसूत्रे अपकर्षेण ठक्प्रत्ययो भाषायामपि भवितुं शक्यते इति प्रतिपादितवान्। किन्तु भगवता पतञ्जलिना हेमन्तपर्यायस्य हेमनशब्दस्य प्रकृत्यन्तरत्वात् उभाभ्यामपि ऋत्वणि हैमनं, हैमन्तमिति रूपद्वयसिद्धेः सूत्रमिदं प्रत्याख्यातम्। तदा अस्मात्सूत्रात् सर्वत्रेति शब्दस्य अपकर्षाश्रयणादिकं काशिकाकारोक्तं असङ्गतमेवेति अन्नम्भट्टः सुष्ठु निरूपयति। 'अतिशायने तमबिष्ठनौ' इति सूत्रवृत्तौ प्रकर्षवतां प्रकर्षविवक्षायां अतिशयिकान्तादपरः प्रत्ययः तेन श्रेष्ठतमो युधिष्ठिरः इत्यादिप्रयोग उपपन्न इति काशिकाकारस्य वचनं भगवदनभिमतमिति निरस्यति। अन्नम्भट्टेन स्वव्याख्यानिर्मितौ यद्यपि काशिका बहुधा अनुसृता तथापि यत्र यत्र महाभाष्येण विरोधो दृश्यते तत्र तत्र काशिकाकारस्य अभिप्रायं स्पष्टं खण्डयतीति तस्य सत्यनिरूपण प्रवणतां, व्याकरणशास्त्रे वैदुष्यं च उद्घोषयति। 'आपत्यस्य च तद्धितेनाति' इति सूत्रे पेद्दिभट्टीयं वचनं असङ्गतमिति निरूपयति। अत्र सूत्रे तद्धितशब्दस्य अनुवृत्तौ सत्यां पुनस्तद्धितग्रहणात् ज्ञापकात् 'हलस्तद्धितस्ये'ति पूर्वसूत्रे तद्धिते इति सप्तम्यन्तपदस्य अनुवृत्त्यभावेन लावण्यमस्य अस्ति इति ठनि हलस्तद्धितस्येति यलोपे लावणिकं सिद्ध्यतीति पेद्दिभट्टीयं चिन्त्यमिति निरूपितमन्नम्भट्टेन। अत्र पेद्दिभट्टशब्देन तत्सोदरो मल्लिनाथसूरी एव अभिमतः। (मल्लिनाथव्याख्यासु कस्याञ्चित् इदं निरूपणं कृतं भवेत्।)

'सुप्यजातौ णिनिस्ताच्छील्ये' इति सूत्रेण सुबन्ते उपपदे धातोः णिनिप्रत्ययो विहितः। 'सुपि स्थः' (3-2-4) इति सूत्रादत्र सूत्रे सुपीत्यनुवर्तमाने पुनः सुपिग्रहणसामर्थ्येन उपसर्गेऽप्युपपदे णिनिप्रत्ययो

In Public domain. Digitization Muthulakshmi Research Academy

भवतीति ज्ञायते। एतेन उदासारिण्यः, प्रत्यासारिण्यः इति उपसर्गे उपपदे णि प्रत्ययरूपाणि सिद्ध्यन्ति। किन्तु अत्र काशिकायां सुपिग्रह उपसर्गनिवृत्यर्थमित्युक्त्वा उदासारिणी, प्रत्यासारिणी इति रूपयोः णिनिप्रत्यय 'उदासारिण इत्यादावुपसंख्यानम्' इति उद् आ उपसर्गयोरुपपद णिनिप्रत्ययस्य उपसंख्यानं कृतम्। अन्नम्भट्टस्तु "तद्भाष्यविरोधात् गौरवा चिन्त्यम्" इति काशिकाकारस्य इदं निरूपणं चखण्ड।

फाण्टाहृतिमिमताभ्यां णफिञौ (4-1-150) इति सूत्रेण फाण्टाह मिमताभ्यां णफिञौ विहितौ। अत्र काशिकाकारादयस्तु यथासंख्यान्वयमननुसृ फाण्टाहृति, मिमतशब्दयोः एकैकस्मात् णफिञ्प्रत्ययौ द्वावपि इच्छन्ति। ते मते फाण्टाहृतः, फाण्टाहृतायनिः, मैमतः, मैमतायनिः इति प्रत्येकं रूप भवति। किन्तु अन्नम्भट्टः, अत्र यथासंख्यान्वयस्य अनङ्गीकारः काशि कारादिभिःर्यः कृतः "तत् भगवता नोक्त" मिति तेषामभिप्रायं निरस्य स्वस्य भगवत्पतञ्जलिमतानुसारित्वेन प्रामाण्यं च प्रकटयति।

मिताक्षराग्रन्थस्य निवेदनाख्यायां भूमिकायां श्रीमन्मट्टस्वामि "अयमन्नम्भट्टः प्रक्रियाकौमुदीकारात् नवीनः, सिद्धान्तकौमुदीकारात् प्राचीनश्चे निश्चेतुं शक्यते इति तातचरणा" इति यदुक्तं तत् न युक्तम्। यतोहि मिताक्षर अन्नम्भट्टेन अकथितञ्चेति सूत्रवृत्तौ "कौमुद्यां मन्थग्रहपचोपि संगृहीता" इ 'अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः' इतिसूत्रे अहोरात्रद्विरात्रयोः क्लीब कौमुद्यामुक्ता इति च वदता सिद्धान्तकौमुदीग्रन्थः उदाहृतो दृश्यते। सिद्धा कौमुदी कारात् अन्नम्भट्टस्य प्राचीनत्वे आनन्तरिक कौमुदीवचनानामुदा दुःशकमेव खलु।

एवमन्नम्भट्टस्य मिताक्षरानाम्नी अष्टाध्यायीव्याख्या न केव व्युप्तित्सूनामुपयोगकारिणी टीकामात्रा अपि तु नैकविषयाणां चर्चाप्रधा वृत्तिरिति, तत्कर्ता च अन्नम्भट्टः वैयाकरणेषु, व्याकरणस्य व्याख्यातृषु मूर्धन्यं स्थानं भजत इति च उक्तौ न कोपि सन्देहलेशः।

In Public domain. Digitization Muthulakshmi Research Academy

मल्लिनाथस्य सर्वपथीना-केचन व्याकरणविशेषाः

विदितमेवैतत्समेषां सुधियां यद् व्याकरणशास्त्रे अकृतावगाहानां भट्टिकाव्यस्थाः प्रयोगविशेषा दुर्बोधा इति। उक्तं चैवं मल्लिनाथेन भट्टिकाव्यस्य व्याख्याप्रारम्भे

"व्याख्यगम्यमिदं काव्यमुत्सवः सुधियामलम्।
हता दुर्मेधसश्चास्मिन् विद्वत्प्रियतया मया" इति।

अत एवास्य काव्यस्य अध्ययनं सुकरं चिकीर्षवो बहवो व्याख्यातारो बहूनि व्याख्यानानि व्यरचयन्। मल्लिनाथसूरेः सर्वपथीना, जयमङ्गलस्य जयमङ्गला, नारायणविद्याविनोदस्य भट्टिचन्द्रिका, रामानन्दस्य मुग्धबोधः, भरतमल्लस्य मुग्धबोधिनी, विद्यासागरस्य कलाप्रदीपिका, कुमुदानन्दस्य सुबोधिनी चेतीमानि भट्टिकाव्यव्याख्यानेषु लब्धप्रचाराणि। अमीषु च समेषु व्याख्यानेषु जयमङ्गला, सर्वपथीना इत्येतद्व्याख्याद्वयमितराभ्यः सर्वाभ्योऽपि अधिकप्रचारे वर्तते।

मल्लिनाथः स्वीयव्याख्याने शब्दसिद्धिनिरूपणावसरे तत्र तत्र पूर्वव्याख्यातुर्जयमङ्गलस्य तथा अन्येषाञ्च व्याख्यातॄणां मतं सप्रमाणं खण्डयन् स्वीयं व्याकरणवैदुष्यं प्रकटीकृतवान्। जयमङ्गलोक्ताः मल्लिनाथेन विमृष्टाश्च त्रिचतुरा व्याकरणविषयाः अत्र विविच्यन्ते।

1. उक्षांप्रचक्रुर्नगरस्य मार्गान्
ध्वजान्बबन्धुर्मुमुचुः खधूपान्।
दिशश्च पुष्पैश्चकरुर्विचित्रै
रथेषु राज्ञा निपुणा नियुक्ताः* (III-5)

अयं च श्लोकः श्रीरामस्य पट्टाभिषेकसम्भारसंविधानवर्णनावसरे वर्तते। 'उक्षाम्प्रचक्रुर्नगरस्य मार्गान्' इत्येतच्छ्लोकपादं जयमङ्गल एवं

* अस्यैव 'भट्टिबोधिनी' इति नामान्तरं वर्तते।

In Public domain. Digitization Muthulakshmi Research Academy

व्याचख्यौ–नगरस्य मार्गान् पथः उक्षान् सेकवतः प्रचक्रुः उक्षणमुक्षा, 'गुरोश्
हलः' इत्यकारः सा विद्यते येषामिति अर्शआदिभ्योऽच्। 'इजादेश्च गुरुमत
इत्यादिना आम्प्रत्यये प्रचक्रु रित्यनुप्रयोगो न घटते कृञ्चानुप्रयुज्य
इत्यनुशब्दस्य व्यवहितनिवृत्यर्थत्वात् इति।

अत्र मल्लिनाथव्याख्या एवं वर्तते।

उक्षांप्रचक्रुः धूलिप्रशमनार्थं निषिषिञ्चुः उक्षसेचने लिट् इजादेश
गुरुमतो इत्याम्प्रत्यये कृञोऽनुप्रयोगः। 'कृञ्चानुप्रयुज्यते लिटि' इत्य
अनुग्रहणस्य व्यवहितविपर्ययनिषेधार्थत्वात् व्यवहितप्रयोगस्य असाधुत्वेऽ
उक्षांचक्रुरित्यत्र अनुप्रयोगवदुपसर्गाणामपि 'ते प्राग्धातो' रिति व्यवहि
विपर्यस्तपूर्वप्रयोगनियमात् धात्वर्थाभिव्यञ्जकत्वादिना धात्वक्षरप्रायत्वा
प्रोपसर्गस्य न व्यवधायकत्वमिति नासाधुत्वम्। 'तं पातयां प्रथममास'
'प्रभ्रंशयां यो नहुषश्चकार'[2] इत्यादावुपसर्गेतरस्य व्यवधानादसाधुत्वमेव, य
जयमङ्गलाकारेण व्यवधानभयात् गुरोश्च हलः इत्यकारप्रत्यये ततो मत्वर्थीयाच
च उक्षान् उक्षावतः सेकवतः इति शसन्तं पाठं परिकल्प्य व्याख्यातं तद
प्रसिद्धपाठत्यागात् अत्यन्ताप्रसिद्धपाठकल्पनाच्च साहसमेव इत्युपेक्ष्यमेवेत्य
प्रसक्तानुप्रसक्त्या।

एवं उक्षान् प्रचक्रुरिति जयमङ्गलेन स्वीकृतं शसन्तं पाठं मल्लिना
सयुक्ति खण्डयित्वा उक्षांप्रचक्रु रित्याम्प्रत्ययसहितस्यैव पाठस्य ग्राह्य
न्यरूपयत्।

2. "सुकृतं प्रियकारी त्वं कं रहस्युपतिष्ठसे
पुण्यकृच्चाटुकारस्ते किङ्करः सुरतेषु कः" (v-68

अत्र किङ्करशब्दस्य व्युत्पत्तिविषयेऽपि जयमङ्गलस्य, मल्लिनाथ
च मतभेदो वर्तते। जयमङ्गलः किम्पूर्वककृधातोः 'दिवाविभानिशाप्रभ
इत्यादि 'ट'-प्रत्ययविधायकसूत्रस्य अपवादीभूतस्य किंयत्तद्बहु
कृञोऽज्विधानमित्यच्प्रत्ययविधायकस्य स्त्रीत्वैकविषयत्वं सूचयन् 'दिवानिश

1. रघुवंशम् 9-61 2. रघुवंशम् 13-36

In Public domain. Digitization Muthulakshmi Research Academy

इति सूत्रेण 'ट' प्रत्ययेनैव 'किङ्कर' शब्दस्य रूपसिद्धिं निरूपयति। पश्यत तद्व्याख्यापङ्क्तीः।

"किङ्करः दासः 'दिवा विभा' इति टः। 'किं यत्तद्बहुषु कृञोज्वि धानम्' इति तत्स्त्रीविषये द्रष्टव्यम्।"

किन्तु मल्लिनाथः किङ्करशब्दस्य 'दिवा विभा' इत्यादिसूत्राप वादभूतेन 'किंयत्तद्बहुषु' इत्यादिना अच्प्रयान्तत्वमेव समर्थयति। एवं 'किंयत्तद्बहुषु' इति सूत्रस्य उदाहरणत्वेन दर्शितेषु किङ्करा, यत्करा इत्यादिषु अच्प्रत्यान्तत्वसूचनार्थमुद्दिष्टया टाबन्ततया स्त्रीविषय एव अज्विधानमिति जयमङ्गलेन यद्भावितं तद्भ्रान्तिमूलकमेवेति निर्णयति। एतत्समर्थकानि मल्लिनाथस्य वाक्यान्यत्र उद्ध्रियन्ते।

"किङ्कर इत्यत्र हेत्वाद्यर्थविवक्षायां "कृञो हेतुताच्छील्यानुलो म्येषु" इत्यनेन ट एव, जातिः किङ्करी इत्यादिङीबन्तप्रयोगदर्शनात्। तदविवक्षायां तु "दिवा विभानिशाप्रभाभास्" इत्यादिसूत्रप्राप्तटप्रत्ययबाधेन 'किंयत्तद्बहुषु कृञोऽज्विधानम्' इत्यजेव किङ्करा, यत्करा इत्यादि टाबन्तप्रगोगदर्शनात्। यत्तु 'दिवा' आदिनैव टप्रत्ययः अज्विधानं तु स्त्रीमात्रविषयं इति जयमङ्गलाकारव्याख्यानं तद्वृत्तावच्प्रत्ययान्तत्वाभि व्यक्त्यर्थं किङ्करा, यत्करेति टाबन्तोदाहरणदर्शनाद्भ्रान्तमित्युपेक्ष्यम्।"

3. ततः प्रविव्राजयिषुः कुमार-
मादिक्षदस्याभिगमं वनाय।
सौमित्रिसीतानुचरस्य राजा
सुमन्त्रनेत्रेण रथेन शोचन्। (III, 9)

अत्र तृतीयपादे सौमित्रिसीतानुचरस्येति समस्तपदस्य विग्रहोक्ता वपि जयमङ्गलस्य मल्लिनाथस्य चैकमत्यं न दृश्यते। सौमित्रिश्च सीता च सौमित्रिसीते, अनुचरश्च अनुचरी च अनुचरौ, सौमित्रिसीते अनुचरौ यस्य स इति जयमङ्गलोक्तो विग्रहः।

In Public domain. Digitization Muthulakshmi Research Academy

मल्लिनाथस्तु सौमित्रिश्च सीता च सौमित्रिसीतम् सौमित्रिस अनुचर यस्य स इति विग्रहं प्रदर्शयन् स्वीयं मतमेवं समर्थितवान्।

"सौमित्रिः सीता च सौमित्रिसीतं 'सर्वो द्वन्द्वो विभाषयैकवद्भव इति वचनादेकवद्भावः अन्यथा अनुचरशब्दात् पचादिषु चरडिति टित्करण स्त्रियां ङीपि 'नद्यृतश्च' इति कप्प्रसङ्गात्, समासान्तानित्यत्वे पुंवद्भावानुपपत्तेः" इति।

4. सूतोऽपि गङ्गासलिलैः पवित्वा
सहाश्वमात्मानमनल्पमन्युः।
ससीतयो राघवयोरधीयन्
श्वसन् कदुष्णं पुरमाविवेश॥ (III, 1

अत्र अधीयन्निति पदस्य प्रक्रियां जयमङ्गल एवं वदति "अधी इक् स्मरणे इत्यस्य शतरि रूपम्-यणादेशः" इति। मल्लिनाथस्तु रूपमि इयङादेशेन साधयति न तु यणादेशेन। जयमङ्गलानुसारं इक् स्मरणे इति धात यणादेशे यन्निति रूपे सिद्धे ततः अधि इत्युपसर्गयोगेन अधियन्नित्येव रू भवेन्नतु अधीयन्निति। मल्लिनाथोक्तप्रक्रियायां इक्धातोः शतरि इयङादे इयन्निति रूपे ततः अधीत्युपसर्गयोगे सवर्णदीर्घे अधीयन्निति रू निर्बाधमेव। अतोऽत्र मल्लिनाथस्यैव मतं ग्राह्यं भवति।

एवं न केवलं जयमङ्गलोक्ता एव व्याकरणांशा अपितु इतरव्याख्यातृभि प्रतिपादिताः शब्दशास्त्रविषया अपि नैके स्वीयव्याख्याने युक्ततरं विमृष्य मल्लिनाथस्य निस्तुलं व्याकरणवैदुष्यं प्रकटयन्ति। द्वित्राण्युदाहरणा पश्यामः।

प्रीतिमान् भरद्वाजमुनिः भरतादीनामातिथ्यदानसमये तानेवं वदति

5. वस्त्रान्नपाने शयनं च नाना
कृत्वावकाशे रुचिसम्प्रक्लृप्तम्।
तान् प्रीतिमानाह मुनिस्ततः स्म
निवध्वमाध्वं पिबतात्त शेध्वम्।

In Public domain. Digitization Muthulakshmi Research Academy

अत्र चतुर्थपादे सर्वाण्यपि लोण्मध्यम पुरुषबहुवचनानि। पूर्वव्याख्यातारः इमान् लोट् प्रयोगान् विधौ विहितान् समर्थयन्ति। अमुमभिप्रायं मल्लिनाथः एवं खण्डयन् अमुं लोटं अतिसर्गे लोटं समर्थयति।

"सर्वत्र प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च" इत्यतिसर्गे लोट्; अतिचारः कामचारानुज्ञा। अत्र सर्वत्र विधौ लोडिति पूर्वव्याख्यातारः; तदसत्-न तावदत्र किञ्चित् ज्योतिष्टोमादिवत् किञ्चिदपूर्वं विधेयमस्ति नाप्यत्रर्तौ जायामुपेयादितिवन्नियम्यते तदनिच्छतां अकरणे प्रत्यवायाभावात्। नापि स्थानान्तर विहारपरिसंख्यापरत्वमिति वाच्यम् पञ्चेतरनखभक्षणवत् स्थानान्तरविहारे दोषाभावात्। दोषत्रयदुष्टत्वादस्मदुक्तमेव युक्तमिति।

समगध्वं पुरःशत्रोर्मोदयध्वं रघूत्तमम्
सोपायध्वं भयं सीतां नोपायंस्त दशाननः (VII-103)

आहोपुरुषिकां पश्य मम सद्रत्नकान्तिभिः
ध्वस्तान्धकारेऽपि पुरे पूर्णेन्दोः सन्निधिः सदा (5.7)

अत्र आहोपुरुषिकाशब्दस्य मनोज्ञादित्वाद्वुञन्तत्वेन कैश्चित्साधितां प्रक्रियां मल्लिनाथः निराकृत्य तस्य मत्वर्थीयष्ठन्प्रत्ययान्तत्वेन प्रक्रियां साधयति एवंरूपेण।

"अहोपुरुष इति यस्यां क्रियायां सा आहोपुरुषिका इति काशिका-मत्वर्थीयष्ठन्प्रत्ययः मयूर..." इति समासः-तामाहोपुरुषिकां पश्य-स्वपुरुषकारं पश्येत्यर्थः-केचित्तु "आहोपुरुषिका दर्पाद्या स्यात्सम्भावनात्मनि" इत्यत्र क्षीरस्वामिनो व्याख्यानानुसारेण अहोपुरुषस्य भावः आहोपुरुषिका आश्चर्यपुरुषत्वं मनोज्ञादित्वाद्वुञ् इति व्याचक्षते। किन्तु मनोज्ञादिषु मृग्यमेतत्"। मल्लिनाथीयव्याख्यानानां सर्वेषामपि परिशीलनेन तस्य अतुलितं शब्दशास्त्र वैदुष्यं सुज्ञं भवति।

In Public domain. Digitization Muthulakshmi Research Academy

कालिदासकृतिषु केचन अपाणिनीयाः प्रयोगाः

यद्यपि कालिदासः स्वीयग्रन्थेषु सर्वेष्वपि प्रायशः भाषायां व्याकर सम्मतानेव प्रयोगान् प्रयुयुञ्ज तथापि तत्र तेन महाकविना प्रयुक्ताः केच प्रयोगविशेषाः वैयाकरणानां हृदयान्यावर्जयन्ति। तादृशानां केषांचित् प्रयोगा विवेचनमेव अस्मिन् पत्रे चर्चनीयो विषयः।

कालिदासेन प्रयुक्ता भाषा बहुधा पाणिनीयमेव अनुसरती विदितमेव। तथापि तत्र तत्र अपाणिनीया अपि प्रयोगास्तेन कृता दृश्यन् व्याख्यातृभिस्ते प्रयोगाः कथं वा समर्थिता इति प्रथमं परिशीलयामः।

कालिदासेन प्रयुक्तेषु अपाणिनीयेषु 'विश्राम' शब्दः अन्यतमः। अ च प्रयोगः अभिज्ञानशाकुन्तले तथा मेघसन्देशे च दृश्यते।

विश्रामं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः (अ.शा.2-6)
नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतोः (मे.सं.)

अयं शब्दः अन्यैरपि कविभिः प्रयुक्तो दृश्यते। पश्यत।

अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद्
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः
(उत्तररामचरितम् 1-29

'अथवा विश्रामसौख्यं तावदनुभवतु'
(मालतीमाधवम् 1 अङ्क

उचिता विश्रामभूमिरियम् (वेणीसंहारम् 4 अङ्के)
रोगी चिरप्रवासी परान्नभोजी परावसथशायी
यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः (सुभाषितम्)

'उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः'
(विष्णुसहस्रनामस्तोत्रम्

In Public domain. Digitization Muthulakshmi Research Academy

'नोदात्तोपदेशस्य मान्तस्यानाचमे:' (7-3-34) इति पाणिनीयसूत्रानुसारेण अनाचमेर्मान्तस्य धातोः वृद्धिनिषेधेन विश्रम इति रूपेणैव भाव्यं न तु विश्राम इति रूपेण। राघवभट्टः एवं भट्टोजिदीक्षितश्च 'विश्रामशब्दः कवीनां प्रमादज' इति विश्राम शब्दप्रयोगस्य प्रमादजत्वमेव अभिप्रेतवन्तौ। मेघसन्देशस्य व्याख्यात्रा वल्लभदेवेनापि "विश्राम शब्दः कवीनां प्रमादजः" इति अस्य असाधुत्वमेव प्रकटितम्। न केवलं कालिदासेनैव अपितु भवभूतिप्रमुखैर्महाकविभिरप्यस्य प्रयुक्तत्वेन तस्य साधुशब्दत्वेनैव समर्थनं युक्तम्। तत्र च मार्गद्वयं वर्तते। श्रीहर्षेण द्विरूपकोशे विश्रमशब्दस्य रूपान्तरत्वेन विश्रामशब्दस्यापि गृहीतत्वेन तस्य साधुत्वं ग्राह्यमिति प्रथमो मार्गः। मल्लिनाथेन मेघसन्देशव्याख्यायां 'विश्रामो वा' इति चान्द्रव्याकरणसूत्रानुसारं वृद्धेर्वैकल्पिकत्वेन वृद्धिपक्षे तस्य साधुता सिद्ध्यतीति द्वितीयो मार्गः।

एवं कुमारसम्भवे प्रयुक्तः 'त्रियम्बकं' इति शब्दोऽपि अपाणिनीय एव पाणिनीयानुसारं यणादेशेन त्र्यम्बक इति भाव्यत्वात्। अमुं च प्रयोगं मल्लिनाथः "त्र्यम्बकमित्युक्ते पादपूरणव्यत्यासात् त्रियम्बकमिति पादपूरणार्थोऽयमियडादेशः छान्दसो महाकविप्रयोगादभियुक्तैरङ्गीकृत" इति छान्दसप्रयोगत्वेन समर्थितवान्।

अभिज्ञानशाकुन्तले चतुर्थाङ्के "आ वेगस्खलितायाः प्रभ्रष्टं ममाग्रहस्तात् पुष्पभाजनम्" इति प्रियंवादोक्ते वाक्ये अग्रहस्तादिति पदं प्रयुक्तं कालिदासेन। अग्रहस्तमिति पदस्य हस्तस्य अग्रमिति भावः। एवं षष्ठीसमासे हस्तशब्दस्य पूर्वनिपातेन हस्ताग्रमिति भवितव्यम्। किन्तु अग्रहस्तमित्यस्यापि साधुत्वं समर्थयितुं शक्यते। अत्र हस्तस्य अग्रमिति षष्ठीसमासमनादृत्य अग्रश्चासौ हस्तश्चेति कर्मधारयसमासाश्रयणे अग्रहस्तमिति पदं साधु एव। मल्लिनाथोऽपि कुमारसम्भवव्याख्यायां (5-63) इदं समासपदं "अग्रश्चासौ हस्तश्चेति समानाधिकरणसमासः" इति कर्मधारयरूपेण समर्थितवान्। एवं कर्मधारयाश्रयणे काचन अनुपपत्तिः प्रतिभाति। कर्मधारयसमासघटितयोर्द्वयोः पदयोः पूर्वपदेन विशेषणेन वाच्यो यो धर्मः स उत्तरपदवाच्ये अर्थे सर्वत्र व्याप्तो भवेत् यथा नीलोत्पलमिति पदे पूर्वपदवाच्यस्य नीलत्वधर्मस्य उत्तरपदवाच्ये अर्थे सर्वत्र

In Public domain. Digitization Muthulakshmi Research Academy

व्याप्तत्वं दृश्यते। तथा अग्रहस्त इति कर्मधारयसमासे पूर्वपदेन अग्रशब्देन वाच्यस्य अग्रत्वस्य हस्तपदवाच्ये अर्थे सर्वत्र व्याप्तत्वं नास्ति। हस्त अग्रशब्दयोः अवयवावयविसम्बन्धेन अग्रत्वधर्मस्य हस्तैकदेश एव वर्तमानत्वात्। अतः अत्र अवयविभूतस्य हस्तशब्दस्य हस्तैकदेश इत्यर्थे लक्षणया स्वीकृते अग्रशब्दं योजयित्वा इमामनुपपत्तिं दूरीकर्तुं शक्यते।

क्त्वाप्रत्ययविधायके 'समानकर्तृकयोः पूर्वकाले क्त्वा' (3-4-21) इति सूत्रेण क्त्वाप्रत्ययः क्रियाणां समान कर्तृकत्वे सत्येव विहितः। किन्तु अधोनिर्दिष्टे शाकुन्तलप्रयोगे समानकर्तृकत्वाभावेऽपि क्त्वाप्रत्ययो दृश्यते। स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे

धातुर्विभुत्वभनुचिन्त्य वपुश्च तस्याः (2-9)

अनुचिन्त्येत्र, प्रतिभातीत्यत्र च क्रियाद्वये भिन्नकर्तृकत्वेन क्त्वाप्रत्ययस्य अवकाशो नास्ति। अतः अनुचिन्त्येत्यनन्तरं स्थितस्य इति पदयोजनेन 'अनुचिन्त्य स्थितस्य मे स्त्रीरत्नसृष्टिः अपरा प्रतिभाति' इत्युक्तौ अयं वाक्यदोषो निवृत्तो भवति।

एतादृशप्रयोगा बहुभिः कविभिः प्रयुक्ता दृश्यन्ते। पश्यत

स्मृत्वा स्मृत्वा याति दुःखं नवत्वम् (स्वप्न. 4.7)

लब्ध्वा प्रियां मम तु मन्द इवाद्य शोकः (स्वप्न. 4.18)

'यदि समरमपास्य नास्ति मृत्यो
र्भयमिति युक्तमितोऽन्यतः प्रयातुम्' (वेणी. 3.6)

कालिदासस्य काव्यान्तरेष्वपि एतादृशाः प्रयोगा दृश्यन्ते।

न च सुवदनामालेख्येऽपि प्रियामसमाप्य तां
मम नयनयोरुद्बाष्पत्वं सखे न भविष्यति। (विक्र.2-10)

काले काले भवति भवता यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् (मेघ.)

In Public domain. Digitization Muthulakshmi Research Academy

सुरतानि च तानि ते रहः
स्मर! संस्मृत्य न शान्तिरस्ति मे (कुमार 4-17)

एतादृशाः प्रयोगाः संस्कृतभाषायां भारतीयभाषाव्यवहाराणां प्रभावेण प्रविष्टा वेति विचारणीयोंऽशः।

हिन्दीभाषायां 'झाड गिरके उनो मर गया' इति, आन्ध्रभाषायां 'चेट्टु पडि चनिपोयिनाडु' इति क्रिययोर्भिन्नकर्तृकत्वेऽपि क्त्वाप्रत्ययप्रयोगा दृश्यन्ते। अन्यास्वपि भारतीयभाषासु एतादृशाः प्रयोगा वर्तन्त इत्येव मे मतिः। अत एव च आन्ध्रभाषावैयाकरणाः क्त्वा प्रत्ययविधायकसूत्रे समानकर्तृकयोरित्यनुक्त्वा समानाश्रयोरित्युक्त्वा एतादृशानां प्रयोगाणां गतिं कल्पयामासुः। सर्वास्वपि भाषासु इतरभाषाभ्यः पदानामादानं भवत्येव। इदमस्माभिर्देशभाषासु नित्यं दृश्यत एव। संस्कृतभाषायामपि द्राविडभाषाभ्यः आदत्तानि मीनादिपदानि बहूनि वर्तन्ते। कालिदासस्य मेघसन्देशे 'हाला' इति पदं दृश्यते 'हित्वा हालामभिमतरसां रेवतीलोचनाङ्काम्' इति श्लोकपादे। हालेति पदं देशभाषापदमिति मल्लिनाथः व्याख्याति। पश्यत तस्य वाक्यानि-अभिप्रयुक्तं देशभाषापदमित्यत्र सूत्रे हालेति देशभाषापदमप्यतीव कविप्रयोगात् साधु इत्युदाजहार वामनः इति।

'देवपूर्वं गिरिं ते' इत्ययमन्यः कालिदासीयः प्रयोगः। देवगिरिमिति वक्तव्ये कालिदासेन देवपूर्वं गिरिमित्युक्तम्, अत्र देवपूर्वत्वं गिरिशब्दस्य न तु संज्ञिनः पर्वतस्य, तदर्थस्य संज्ञायाः संज्ञित्वाभावादवाच्यवचनं दोषमाहुरालङ्कारिकाः। 'यदवाच्यस्य वचनं अवाच्यवचनं हि तत्' इति अवाच्यवचनस्य स्वरूपम्। अत्र मल्लिनाथेन देवशब्दविशेषितेन गिरिशब्देन शब्दपरेण अर्थो मेघोपगमनयोग्यो देवगिरिर्लक्ष्यते इति कथंचित् संज्ञायाम् इति अस्य प्रयोगस्य समर्थनं कृतम्।

अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कप्रारम्भे 'ततः प्रविशति कुसुमावचयं नाटयन्त्यौ सख्यौ' इति वाक्यं दृश्यते यत्र 'कुसुमावचय' इति शब्दो विवेचनीयो वर्तते। 'हस्तादाने चेरस्तेये' इति पाणिनिसूत्रानुसारेण आदेयस्य अस्तेये हस्तादाने सति चिधातोर्घञ्प्रत्यये आदिवृद्धौ च कुसुमावचाय इति

In Public domain. Digitization Muthulakshmi Research Academy

रूपेण भवितव्यम्। आदेयस्य हस्तानादाने स्तेयत्वे च अवचय इति रूपेण च भाव्यम्। अत्र कालिदासप्रयोगे आदेयस्य हस्तादानत्वेन कुसुमावचय इति प्रयोगः अपाणिनीयो भवति। राघवभट्टः स्वीये शाकुन्तलव्याख्याने कुसुमानां वृक्षाग्रस्थितत्वेन यष्ट्यादिकेन वा, वृक्षाग्रे आरोहणेन वा प्राप्यत्वेन हस्तादाना भावात् घञ्प्राप्तेरभावेन अच्प्रत्ययेनैव कुसुमावचय इति रूपं साधु इति समर्थ यति। इदं च समर्थनं न स्वाभाविकं दृश्यते यतोहि कालिदासः कुसुमावचायमिति पदं च अन्यत्र प्रयुङ्क्ते

अन्यत्र यूयं कुसुमावचायं
कुरुध्वमत्रास्मि करोमि सख्यः।
नाहं हि दूरं भ्रमितुं समर्था
प्रसीदतायं रचितोऽयमञ्जलिः॥

अतः कालिदासप्रयुक्तं कुसुमावचयमिति पदं निरङ्कुशाः कवयः इति न्यायेन समर्थनीयं भवति। कुसुमावचय इति पदं नैकैः कविभिः प्रयुक्तो दृश्यते। पश्यत

a) "तेन हि अस्मिन् शिलापट्टके मुहूर्तमुपविशतु भर्तृदारिका, यावदहमपि कुसुमावचयं करोमि" (स्वप्न IV,50,51)

b) ततः प्रविशति पुष्पावचयव्यग्रा सकरुणौत्सुक्यमाकर्णयन्ती सीता (उत्तर. 3)

कालिदासः मालविकाग्निमित्रेऽपि कुसुमावचयशब्दप्रयोगं करोति।

'वयस्य, एषा कुसुमावचयव्यग्रहस्ता सख्यस्ते इरावत्याः परिचारिका चन्द्रिका समागच्छति' (4 अङ्क.)

वामनस्तु अवतरावचायशब्दयोः दीर्घह्रस्वव्यत्यासो बालानामिति वदन् अवचयशब्दस्य बालप्रयोगत्वेन दूष्यत्वमेव प्रतिपादितवान्।

कुमारसम्भवे पुष्पोच्चयः पल्लवभङ्गभिन्नः (3-61) इति श्लोकपादे प्रयुक्तः पुष्पोच्चय शब्दोऽपि ईदृश एव पुष्पाणां सखीभ्यां स्वहस्तलूनत्वेन निर्देशात् अवश्यं अत्र वृद्ध्या पुष्पोच्चाय इत्येव भाव्यत्वात्। तत्र मल्लिनाथः

 In Public domain. Digitization Muthulakshmi Research Academy

अस्य प्रयोगस्य प्रामादिकत्वमेव भावयति 'हस्तादाने चेरस्तेये' इति घञ्विषयत्वात् कवीनामयं प्रामादिकः प्रयोग इति वल्लभः इत्यादिवाक्येन।

कुमारसम्भवे 'रतिदूतिपदेषु कोकिलान्मधुरालापनिसर्गपण्डिताम्' (4-16) इत्यस्मिन् श्लोकपादे 'रतिदूतिपदेषु' इति समासपदे ईकारान्त दूतीशब्दस्य दूति इति ह्रस्वान्तत्वेन प्रयोगः अपाणिनीयः। दूती इति ईकारान्तत्वेन प्रयोगे तु छन्दोभङ्गः। मल्लिनाथः अमुं प्रयोगमेवं समर्थयति – "ङीबन्तस्यापि दूतीशब्दस्य छन्दोभङ्गभयात् ह्रस्वः। 'अपि माषं मषं कुर्याच्छन्दोभङ्गं त्यजेद्गिरम्' इति केचित्। 'उणादयो बहुलम्' इति बहुलग्रहणात् ह्रस्व इति वल्लभः।"

अभिज्ञानशाकुन्तलस्य षष्ठाङ्के 'दत्तः कामाय गृहीतधनुषे' इति श्लोकपादे (6-4) गृहीतधनुषे इति पदं दृश्यते। धनुषश्च इति पाणिनीयसूत्रानुसारं धनुरन्तस्य बहुव्रीहेः अनङादेशे गृहीतधन्वने इति रूपं भवेत्, नतु गृहीतधनुषे इति। समासान्तविधेरनित्येन अयं कालिदासप्रयोगः व्याख्यातृभिः साधुप्रयोगत्वेन साधितः। तत्वबोधिनीकार इदं सूत्रं व्याकुर्वन् कथं तर्हि 'स्वलावण्याशंसा धृतधनुषमह्नाय तृणवत्' (महिम्नस्तोत्रम्) इति पुष्पदन्तप्रयोग इति चेत् अत्राहुः – समासान्तविधेरनित्यत्वात् नात्रानुपपतिः इति अनङ्राहित्यं समर्थितवान्।

अभिज्ञानशाकुन्तले षष्ठाङ्के 'बिम्बाधरं स्पृशसि चेद् भ्रमर प्रियायाः' (6-20) इति श्लोकपादे प्रयुक्तं बिम्बाधरमिति पदं पाणिनीयनियमविरुद्धमिव प्रतिभाति। अधरः बिम्बमिव इति 'उपमितं व्याघ्रादिभिः' इति सूत्रेण उपमितसमासे अधरशब्दस्यैव उपमितवाचकस्य पूर्वनिपाते अधरबिम्बमित्येव स्यान्नतु बिंबशब्दस्य पूर्वनिपातेन बिम्बाधरमिति। किन्तु बिम्बाकारः अधरः इति विशेषणसमासे मध्यमपदलोपे बिम्बाधर इति पदं साध्वेव भवति। वामनश्च 'बिम्बाधर इति वृत्तौ मध्यमपदलोपिन्याम्' इत्यादिना अस्य मध्यमंपदलोपिसमासत्वं अङ्गीकरोत्येव।

कालिदासशाकुन्तले सप्तमाङ्के "सुतनु हृदयात् प्रत्यादेश व्यलीकमपैतु" इति श्लोकपादे, 'मोहान्मया सुतनु पूर्वमुपेक्षितस्ते' इति श्लोकपादे 'सुतनु'

 In Public domain. Digitization Muthulakshmi Research Academy

इति पदं प्रयुक्तं दृश्यते। बहुव्रीहिसमासरूप सुतनुशब्दस्य सम्बोधनैकवचनमिदम्। किन्त्वत्रेयमाशङ्का सञ्जायते यत् सुष्ठु तनुर्यस्याः सा इति विग्रहवाक्यात् सम्भूतस्य सुतनु शब्दस्य सम्बुद्धौ सुतनो इति रूपं भवेदिति। किन्तु कालिदासेन सुतनु इति प्रयुक्तम्। सुष्ठु तनूः यस्याः सा इति तनूशब्दाश्रयणे बहुव्रीहौ 'नद्यृतश्च' इति सूत्रेण कप्प्रत्यये सुतनूका इति भवति तस्य सम्बुद्धौ सुतनूके इति भवति। अनयोर्द्वयोरपि रूपयोः द्वितीयरूपस्य ग्रहणे कालिदासस्य प्रयोगः सुसमर्थो भवेत्। तथाहि 'समासान्तविधेरनित्यत्वमिति न्यायाश्रयणेन कप् प्रत्ययाभावे सुतनूशब्दस्य सम्बुद्धौ सुतनु इति रूपं निर्बाधमेव।

In Public domain. Digitization Muthulakshmi Research Academy

सारस्वतव्याकरणे संक्षेपसारल्ये

संस्कृतव्याकरणसम्प्रदायः अतिप्राचीनः अति विस्तृतश्च। प्राचीन काले अस्माकं देशे यथा व्याकरणशास्त्रस्य समग्रतया दीक्षया च अध्ययनं भवति स्म न तथा अन्यदेशेषु तत्तद्देशीयभाषाव्याकरणानामध्ययनं भवति स्म इत्युक्तौ न काचिदतिशयोक्तिः। प्रथमं पाश्चात्यदेशेषु अधुना भारतदेशे च व्याप्तिमधिगतस्य भाषाशास्त्रस्य मूलं संस्कृतव्याकरणशास्त्रस्य अध्ययनमेवेति विदुषामभिप्रायः।

अद्यत्वे उपलभमानानां विविधसंस्कृतव्याकरणग्रन्थानां, विविध व्याकरणव्याख्यातॄणां च नाम्नां पट्टिकैव संस्कृतव्याकरणशास्त्रस्य महत्त्वं, एवं तस्य महतीं विस्तृतिं च प्रकटीकरोति। संस्कृतव्याकरणशास्त्रे नैके सम्प्रदायाः, नैके सम्प्रदायप्रवर्तकाः वर्तन्ते। प्रसिद्धश्चैष श्लोकः श्रूयत एव।

> इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
> पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥

अस्मिन् श्लोके वोपदेवः अष्टौ आदिशाब्दिकान् इन्द्र, चन्द्र, काश कृत्स्न, आपिशलि, शाकटायन, पाणिनि, अमर, जैनेन्द्रान् स्मरति। न केवलमेत एव अन्ये च बहवो व्याकर्तारः स्वस्व व्याकरणसम्प्रदायप्रवर्तकाः दृश्यन्ते, तेषु चान्द्रव्याकरणस्य प्रवर्तकः चन्द्रगोमी (650 AD) जैनेन्द्रव्याकरणस्य प्रवक्ता देवनन्दी (6th Cent) शाकटायनशब्दानुशासनस्य कर्ता शाकटायनः (अयं च पाणिनीये स्मृतादन्यः नवमशताब्दीयः) सिद्धहेमचन्द्रशब्दानुशासनस्य कर्ता हेमचन्द्रः, कातन्त्रव्याकरणप्रवक्ता शर्ववर्मा, मुग्धबोधव्याकरणकर्ता बोपदेवः, सौपद्मव्याकरणप्रवक्ता पद्मनाभदत्तः, एवं सारस्वतव्याकरणप्रवक्ता अनुभूतिस्वरूपाचार्यः इति बहवो निर्देष्टुं शक्यन्ते। एतेषु अनुभूति स्वरूपाचार्येण लिखितं सारस्वतव्याकरणमधिकृत्य किञ्चिदिव अत्र प्रस्तूयते।

अस्य च व्याकरणस्य रचनाकालो यद्यपि निश्चयेन वक्तुं न शक्यते तथापीदं न त्रयोदशशतकात् प्राग्भावीति विदुषामभिप्रायः। त्रयोदशशतकीयः बोपदेवः स्वीयमुग्धबोधव्याकरणे बहूनि स्वपूर्ववर्तीनि व्याकरणानि स्मरन् न

 In Public domain. Digitization Muthulakshmi Research Academy

सारस्वतं स्मरति। हेमचन्द्रेणापीदं न स्मृतम्। एवं सारस्वतव्याख्यातारः सर्वेऽपि पञ्चदशशतकस्य उत्तरार्धात् प्राग्भाविन एव। अत इदं सारस्वत व्याकरणं त्रयोदशशतकस्य उत्तरार्धे वा, चतुर्दशशतकस्य पूर्वार्धे वा रचितमासीदिति अनुमातुं शक्यते।

अस्य व्याकरणस्य उद्भवविषये काचन कथा वर्तते। अनुभूति स्वरूपाचार्यो नाम कश्चन पण्डितः कदाचित् विद्वत्सभायां भाषमाणः 'पुंस्सु' इति प्रयोक्तव्ये प्रमादवशात् पुंक्षु इति प्रयुञ्जमानः विद्वद्भिः परिहसितः। तस्य साधुत्वे च पृष्टः सः परेद्युस्तस्य समाधानं दास्यामीति समाधाय गृहं जगाम। रात्रौ सरस्वतीदेवीं प्रार्थयित्वा तदनुग्रहेण तस्मिन्नेव रात्रौ व्याकरणं रचयित्वा तद्व्याकरणानुसारं पुंक्षु इति प्रयोगस्य साधुत्वं समर्थयामास। अस्मिंश्च व्याकरणे पुंस्सु इतिरूपेण साकं पुंक्षु इत्यस्यापि साधुत्वं "असम्भवे पुंसः कस्नो" इति सूत्रेण पुंस् इत्यत्र सकरस्य वैकल्पिकककारादेशेन साधितं वर्तते। एतदेव मनसिकृत्वा केनापीयं कथा कल्पिता भवेदिति विदुषामभिप्रायः। अस्य सारस्वतव्याकरणस्य सरस्वत्याः सम्बन्धकल्पनार्थमपि अस्याः कथाया कल्पनं भवेत्। कल्पितया अनया कथया अनुभूतिस्वरूपाचार्याणामेव एतद्व्याकरणकर्तृत्वं सम्भाव्यते। 'संस्कृतवाङ्मयचरित्र' काराः श्रीमन्तः मल्लादि सूर्यनारायणशास्त्रिणः अपि अनुभूतिस्वरूपाचार्याणामेव अस्य कर्तृत्वं सम्भावयन्ति। सिद्धान्तचन्द्रिकानाम्नः एतद्व्याख्यानस्य कर्ता रामाश्रमी स्वव्याख्यारम्भे "वाणीप्रणीतसूत्राणां कुर्वे सिद्धान्तचन्द्रिकाम्" इति वदन् अस्य व्याकरणस्य सरस्वतीप्रणीतत्वं सूचयति। किन्तु अनुभूतिस्वरूपाचार्यः भट्टोजिदीक्षित इव सारस्वतसूत्राणां प्रक्रियानुगुणं क्रममेव निबबन्ध नतु तानि स्वयमेव रचितवानिति तस्यैव ग्रन्थस्य अयम् आरम्भश्लोकः सूचयति।

प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये।
सारस्वतीमृजुं कुर्वे प्रक्रियां नातिविस्तराम्॥

अनेन अनुभूतिस्वरूपाचार्येण निर्मितः केवलं प्रक्रियाग्रन्थ एवेति सूच्यते। एवं नरेन्द्राचार्यो नाम अस्य व्याकरणस्य रचयितेति च उह्यते कैश्चिद्विद्वद्भिः। किन्तु सारस्वतव्याकरणस्य मूलसूत्राणां कर्तृत्वविषये नैका निर्णीतिर्दृश्यते।

 In Public domain. Digitization Muthulakshmi Research Academy

सत्सु नैकेषु व्याकरणेषु का वाऽस्य व्याकरणस्य आवश्यकतेति संशीतिर्भवेत्। पूर्वव्याकरणानि भाषायाः स्वरूपं बहुषु सूत्रेषु निरूपितवन्ति जिज्ञासूनां बहुक्लेशमापादयन्ति। पाणिनीये माकिं चत्वारि सहस्राणि, कातन्त्रे चतुर्दश शतानि, जैनेन्द्रे त्रीणि सहस्राणि च सूत्राणि वर्तन्ते, सारस्वते तु माकिं भाषास्वरूपनिरूपकाणि अत्यावश्यकानि अष्टशतसूत्राण्येव वर्तन्ते। अत्र व्याकरणे प्रक्रियाया अपि अतीव संक्षिप्तता दृश्यते। संक्षिप्त संस्कृतव्याकरणेष्वस्य सारस्वतस्य अत्यन्तं प्राधान्यं वर्तते। आङ्ग्लभाषायां विल्किन्स् नाम्ना विदुषा सर्वप्रथमं विरचितस्य संस्कृतव्याकरणस्य मूलं सारस्वतव्याकरणमेवेत्युक्तौ अस्य प्रचुरतां ज्ञातुं शक्नुमः।

पाणिनीयमिव इदमपि अष्टस्वध्यायेषु विभक्तं वर्तते। एकैकः अध्यायोपि पुनः पादचतुष्टये विभक्तश्च। तत्तदध्यायेषु वर्तमानानां सूत्राणां संख्या, विषयाश्च प्रतिपादिता एवं वर्तन्ते

अध्यायः	**सूत्रसंख्या**	**विषयः**
प्रथमाध्यायः	20	संज्ञा, प्रत्याहारादिकम्
द्वितीयाध्यायः	61	सन्धिप्रक्रिया
तृतीयाध्यायः	112	
चतुर्थाध्यायः	80	सुबन्तप्रक्रिया
पञ्चमाध्यायः	37	कारकाणि
षष्ठाध्यायः	132	स्त्रीप्रत्ययाः समासाः तिङन्ताः
सप्तमाध्यायः	226	
अष्टमाध्यायः	117	कृदन्ताः
	785	

अयं विभागः भाषास्वरूपज्ञाने अत्यन्तमावश्यकाः सर्वेऽपि विषया अत्र संस्पृष्टा इति संसूचयति। रघुनाथपण्डितेन गृहीते सूत्रपाठे तु नवत्युत्तर पञ्चशतसूत्राण्येव वर्तन्त इति ज्ञायते।

In Public domain. Digitization Muthulakshmi Research Academy

पाणिनीयव्याकरणतः अत्र दृश्यमानं वैलक्षण्यं प्राधान्येन विषय विवरणे अतिसंक्षिप्ततैवेति वक्तुं शक्यते। यद्यपि जैनेन्द्र, मुग्धबोध, कातन्त्रादिव्याकरणानि संक्षेपदृष्ट्यैव लिखितानि तथापि सारस्वते दृश्यमाना संक्षिप्तता तत्र नास्त्येवेति तेषां सूत्रसंख्यैव सूचयति।

न केवलमत्र संक्षिप्ततैव अपितु सारल्यमपि दृश्यते। प्रत्याहारविधाने अस्मिन् नवीनो मार्ग आश्रितः। सारस्वतीयानि प्रत्याहारसूत्राणि एवं वर्तन्ते।

1) अ इ उ ऋ ऌ
2) ए ऐ ओ औ
3) ह य व र ल
4) ञ ण न ङ म
5) झ द ध घ भ
6) ज ड द ग ब
7) ख फ छ ठ थ
8) च ट त क प
9) श ष स

अत्र पाणिनीया इत्संज्ञापद्धतिः नाश्रिता। अतः इत्संज्ञावर्णं विना आद्यन्तवर्ण संयोजनेनैव प्रत्याहारकल्पनमत्र भवति। यथा हसः (हल्), झभः (झष्), जबः (जश्), चपः (चय्), हबः (हश्), यपः (यय्) इत्यादयः। इत्संज्ञानामभावेन अस्मिन् व्याकरणे अच् इति प्रत्याहारो न दृश्यते। अतः अच्प्रत्याहारप्रयोगावसरे सर्वत्र स्वरा इति, एच्प्रत्यय प्रयोगावसरे सन्ध्यक्षराणीति च प्रयुज्यते। हसः, जबः, चपः इत्यनेन विधानेन प्रत्याहारकल्पने इष्टवर्णानामेव अन्तर्भावे अनिष्टवर्णानां च वर्जने महानवकाशो भवति। इत्संज्ञयैव प्रत्याहारकल्पने तु कदाचिदनिष्टानामपि वर्णानां प्रत्याहारे ग्रहणं जायेत - यथा 'अट्कुप्वाङ् नुम्व्यवायेऽपि' इति णत्वविधायक सूत्रे अट्प्रत्याहारे अन्तर्गतस्य रेफस्य ग्रहणे न किञ्चित् प्रयोजनम्। इत्संज्ञयैव प्रत्याहारकल्पने एतादृशी असुविधा अनिवार्यैव। सारस्वतानुरोधेन प्रत्याहार कल्पने तु रेफस्य अन्तर्भावो न भवति। पश्यत-"अवकुप्वन्तरेऽपि" इति

In Public domain. Digitization Muthulakshmi Research Academy

सारस्वतीयं सूत्रम्। 'अव' इति वचनेन रेफस्य ग्रहणं न भवत्येव खलु। एवं प्रत्याहारकल्पने नूत्ना पद्धतिराश्रिता सारस्वतव्याकरणस्य प्रवक्त्रा।

एवं सूत्राणां लाघवविषयेऽपि इदं व्याकरणं अन्यान्यतिशेते। पश्यत–पाणिनिः प्रकृतिभावार्थं प्रगृह्यसंज्ञामुक्त्वा ततः "प्लुतप्रगृह्या अचि नित्यम्" इति प्रकृतिभावं विधत्ते। सारस्वते तु प्रगृह्यसंज्ञामनुक्त्वैव प्रकृतिभावो विधीयते। अमी+ईशाः इत्यत्र अदसो मात् इत्यनेन, हरी+एतौ इत्यत्र 'ईदूदेद्द्विवचनं प्रगृह्यम्' इति सूत्रेण च प्रगृह्यसंज्ञा विहिता। किन्तु सारस्वते अमी ईशाः इत्यत्र 'नामी' (अदसः अमी सन्धिं न प्राप्नोति) इत्यनेन सूत्रेण, अमू आसाते इत्यादौ य्वे द्वित्वे (ई च ऊ च यू-यू च ए च य्वे) इत्यनेन च सन्ध्यभावः साधितः। पाणिनीये इव अत्र प्रगृह्यसंज्ञाया आवश्यकतां विनैव सन्धिर्निवारिता। एवं "अदसो मात्" इति सूत्रापेक्षया नामी इत्यत्र, ईदूदेद्द्विवचनं प्रगृह्यम् इति सूत्रापेक्षया 'य्वे द्वित्वे' इत्यत्र लाघवं सुदर्शमेव खलु।

एवं सारस्वतव्याकरणस्य प्रवक्त्र केषांचित् पारिभाषिकपदानां कल्पने क्लेशं निवार्य प्रक्रियायां लाघवं च साधयन् व्याकरणनियमान् सुलभरीत्या बोधयति।

एवं चक्रिन्+त्रायस्व इत्यत्र पाणिनिः 'नश्छव्यप्रशान्' इति नकारस्य रुत्वे; ततः रोः पूर्वस्य अनुस्वारे, पक्षे अनुनासिके च, ततः रोर्विसर्गे, विसर्गस्य सकारे "चक्रिंस्त्रायस्व" इति रूपं साधयति। पाणिनीयप्रक्रियानुसारं अत्र चतुर्णां सूत्राणामावश्यकता वर्तते। किन्तु सारस्वते 'न सक् छते' इति नकारस्य छते परे सगागमं विधाय पाणिनीयप्रक्रियायां विद्यमानं गौरवं लघूकृतवान्।

किन्तु तत्र तत्र सारस्वते पाणिनीया त् गौरवमपि भासते। तथाहि पाणिनीये 'इको यणचि' इति इकः स्थाने यणादेशो विहितः। सारस्वते तु

इ यं स्वरे (2-1-1)   उ नम् (2-1-2)

ऋ रम् (2-1-3)   ऌ लम् (2-1-4)

इति चतुर्भिः सूत्रैर्यणादेशो विहितः। एवं चतुभिः सूत्रैर्यणादेशविधाने यद्यपि

 In Public domain. Digitization Muthulakshmi Research Academy

पाणिनीयादपि गौरवमस्ति तथापि 'इको यणचि' इति सूत्रे "स्थानेऽन्तरतमः" इति सूत्रेण आन्तरतम्यात् इकारादेर्यकाराद्यादेशस्य सारस्वते परिहृतत्वेन जिज्ञासूनां सुकरता आपाद्यते।

एवं सुबन्तशब्दनिरूपणेऽपि प्रक्रियासौलभ्यं प्रदर्शितं सारस्वते। द्वित्राण्युदाहरणानि परिशील्यन्ताम्।

'बहुवचने झल्येत्' इति सूत्रेण पाणिनीयेन झलादौ बहुवचने परतः प्रातिपदिकान्तस्य अकारस्य एत्वं विधीयते। अत्र झल्प्रत्याहारेण अन्तःस्थ, अनुनासिकवर्जं चतुर्विंशतिहलः गृह्यन्ते। बहुवचनप्रत्ययेषु हलादिषु सकारादिरेकः प्रत्ययः, अन्ये भकारादयश्च इति सकारभकारादय एव वर्तन्ते। एवं वर्णद्वयग्रहणार्थं झल् इति चतुर्विंशतिवर्णानां ग्राहकः प्रत्याहारः अनावश्यकः प्रतिभाति। अतः सौलभ्याय सारस्वते 'ए स्भि बहुत्वे' इति सूत्रितम्। अकारस्य एत्वं भवति सकारे भकारे च परे बहुत्वे सति इत्यस्य अर्थः।

एवं राम शब्दस्य चतुर्थीविभक्त्येकवचने राम+ङे इति स्थिते 'ङेर्यः' इति सूत्रेण ङेर्यादेशे 'सुपि च' इत्यनेन दीर्घे 'रामाय' इति रूपं साधितं पाणिनीये। सारस्वते तु राम+ए इति स्थिते ङेरक् (अकारात्परस्य ङे इत्यस्य अगागमो भवति) इति सूत्रेण अगागमे (राम+ए+अ), अयादेशे (राम+अय), सवर्णदीर्घे च रामाय इति रूपं निष्पादितम्।

'अदेङ्गुणः', 'वृद्धिरादैच्' इति गुणवृद्धिसंज्ञासूत्रयोः ह्रस्व अकारः गुणत्वेन, दीर्घ आकारः वृद्धित्वेन संज्ञितौ। ऋकारस्थाने विधीयमानौ एतौ 'उरण् रपरः' इति परिभाषासूत्रेण रपरौ भवतः अर् आर् इति। इयं पाणिनीय पद्धतिः। किन्तु सारस्वते 'अरेदो नामिनो गुणाः' इति, 'आरै औ वृद्धिः' इति सूत्राभ्यां अर् आर् इत्यनयोः रपरयोरेव क्रमशः गुणवृद्धिसंज्ञे विहिते। अत्र 'उरण् रपर' इति परिभाषासूत्रस्य आवश्यकता परिहृता।

एवं तिङन्तप्रक्रियायां "तिप्तस्झि" इति सूत्रेण पाणिनीयं तिङ उक्त्वा दशस्वपि लकारेषु तानेव संयोज्य तेषामादेशविधानेन तत्तल्लकारेषु रूपाणि

 In Public domain. Digitization Muthulakshmi Research Academy

साधयति। अस्मिन् विधाने यद्यपि लाघवं वर्तते तथापि जिज्ञासूनां प्रक्रियायां महान् क्लेशो भवति। अतः सौलभ्याय सारस्वतं व्याकरणं तत्तल्लकारेषु भिन्नानेव प्रत्ययान् विधाय प्रक्रियां निर्वहति। पश्यत–

लट्			**लिट्**			**लङ्**		
तिप्	तस्	अन्ति	णप्	अतुस्	उस्	तिप्	ताम्	अन्
सिप्	थस्	थ	थप्	अथुस्	अ	सिप्	तम्	त
मिप्	वस्	मस्	णप्	व	म	अमिप्	व	म

एवमात्मनेपदिनामपि तत्तल्लकारेषु प्रत्येकं प्रत्यया उक्ताः। अत्र लट्, लिट्, लुट् इत्यादिना पाणिनीयोक्तानां लकाराणां कल्पनं नास्ति। अतो लडादीनां स्थाने तिबादीनामादेशत्ववचनं अत्र न दृश्यते।

पाणिनीयादपि सारस्वतीयप्रक्रियाया लाघवं एकेन उदाहरणेन प्रदर्श्यते।

पाणिनीयप्रक्रिया	**सारस्वतप्रक्रिया**	
भू+लिट्	भू+णप्	द्विश्च
भू+तिप्	भू+भू+अ	आभ्वोर्णादौ
भू+णल्	भा+भू+अ	ह्रस्वः
भू+व्+अ	भ+भू+अ	झपानां जबचपः
भूव्+भूव्+अ	ब+भू+अ	भुवो वुक्
भू+भूव्+अ	ब+भू+व्+अ	बभूव
भु+भूव्+अ		
भ+भूव्+अ		
ब+भूव्+अ		
=बभूव		

एवमेव बहुषु स्थलेषु प्रक्रियायां लाघवं सारल्यं च साधितं सारस्वतव्याकरणेन।

सारस्वतव्याकरणे यद्यपि बह्व्यः पाणिनीया एव संज्ञाः–उपधा, टि, गुणः, वृद्धिः, संयोगः, पदम्, निपातः, उपसर्गः, इत्यादयो गृहीतास्तथापि

In Public domain. Digitization Muthulakshmi Research Academy

काश्चन नवीना अपि संज्ञाः दृश्यन्ते। एतासु काश्चन अन्य व्याकरणेभ्यो गृहीता अपि स्युः।

सारस्वते दृश्यमाना अपाणिनीयाः काश्चन संज्ञा एवं वर्तन्ते।

समानाः	–	अ इ उ ऋ लृ वर्णाः समानाः
सन्ध्यक्षराणि	–	ए ऐ ओ औ सन्ध्यक्षराणि
स्वराः	–	उभये स्वराः
नामिनः	–	अवर्जाः (स्वराः) नामिनः
वर्गाः	–	कु चु टु तु पु वर्गाः
नाम	–	अविभक्ति नाम (प्रातिपदिकं) इत्यादयः।

पाणिनीयेऽपि वर्तमानाः संज्ञाः सर्वा अपि न पाणिनिनैव कल्पिताः अपितु काश्चन पूर्वाचार्येभ्योऽपि गृहीताः वर्तन्ते। 'आङो नास्त्रियाम्' इति सूत्रे 'आङिति टासंज्ञा प्राचा' मिति वचनेन आङ् इति संज्ञायाः पाणिनेः पूर्ववर्तित्वं स्पष्टमेव।

पाणिनीयव्याकरणापेक्षया संक्षिप्तता, सरलता च सारस्वते प्रधानगुणावित्युक्तौ नैतत् पाणिनीयमतिशेते इति मम अभिप्रायः। सारस्वत व्याकरणं सम्पूर्णतया पाणिनीयमेव अनुसरतीत्यस्मिन् विषये पाणिनीयादत्र यथातथं गृहीतानि बहूनि सूत्राण्येव प्रमाणम्। तेषु कानि चन अत्र उदाह्रियन्ते।

मोऽनुस्वारः; विसर्जनीयस्य सः; नामि; अतोऽम्; जश्शसोः शिः; हो ढः; मितां ह्रस्वः; यूनस्तिः; चार्थे द्वन्द्वः; इरितो वा; कुहोश्चुः; युवोरनाकौ इत्यादयः।

सारस्वताष्टाध्याय्या मूलसूत्राणां एवं सारस्वतप्रक्रियाग्रन्थानां च बहूनि व्याख्यानानि विरचितानि। मूलसूत्राणां व्याख्यानेषु–रामचन्द्राश्रमस्य (17th Cent) सिद्धान्तचन्द्रिका, तस्यैव लघुसिद्धान्तचन्द्रिका; तर्कतिलक भट्टाचार्यस्य (17th Cent) व्याख्या; जिनरत्नस्य सिद्धान्तरत्नम्, भट्टोजि दीक्षितशिष्यस्य रघुनाथस्य (17th Cent) लघुभाष्यम् इत्येतानि पञ्च उपलभ्यन्ते। प्रक्रियाग्रन्थानां व्याख्यानेषु अमृतभारतेः (15th Cent)

In Public domain. Digitization Muthulakshmi Research Academy

सुबोधिका, क्षेमेन्द्रस्य (16th Cent) क्षेमेन्द्रटिप्पणम्, चन्द्रकीर्तेः दीपिका (सुबोधिका इत्यस्या नामान्तरम्) माधवस्य व्याख्या, वासुदेवभट्टस्य सारस्वतप्रसादः, मण्डनस्य व्याख्या, मेघरत्नस्य (17th Cent) सारस्वत व्याकरणढुण्ढिका (सारस्वतदीपिका) धनेश्वरस्य क्षेमेन्द्रटिप्पणखण्डनम्, जगन्नाथस्य सारप्रदीपिका, काशीनाथस्य सारस्वतभाष्यम्, रामभट्टस्य विद्वत्प्रबोधिनी इत्यादीनि व्याख्यानानि लभ्यन्ते। विद्वत्प्रबोधिनीकारो रामभट्टः आन्ध्रदेशान्तर्गत ओरुगल्लु प्रान्तीय इति प्रतापरुद्रमहाराजस्य समकालिक इति च ज्ञायते।

एवं संस्कृतव्याकरणवाङ्मये सारस्वतव्याकरणस्य प्रक्रियायाः संक्षिप्तता विषये सारल्यविषये च विलक्षणं स्थानं वर्तते इत्यत्र न कापि संशीतिः।

शाकटायनव्याकरणस्य वैलक्षण्यम्

विदितमेवेदं समेषामपि व्याकरणविदुषां यत् भारतीयव्याकरण सम्प्रदायः अतिप्राचीनः, अतिविशालः नैकाचार्यपरम्पराविलसितश्चेति। वोपदेवकृतकविकल्पद्रुमस्थात्

"इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः" इत्येतस्मात् श्लोकात् इन्द्रादयः अष्टौ आदिशाब्दिका ज्ञायन्ते येषु शाकटायनाचार्यः अन्यतमः। शाकटायनप्रणीत शब्दानुशासनसूत्रेषु केवलं अष्टादिशाब्दिकेष्वन्यतमस्य इन्द्रस्य नाम, तथा सिद्धान्तनन्दिनः[1], आर्यवज्रस्य च नामनी इति पूर्वाचार्याणां त्रयाणामेव नामानि उपलभ्यन्ते। अयं च शाकटायनाचार्यो जैनमतावलम्बी चतुरध्यायात्मकं शब्दानुशासननामकं गैर्वाण्या व्याकरणं विरच्य भाषास्वरूपजिज्ञासून् परमनुजग्राह। अयं च ग्रन्थः सूत्रपाठ, धातुपाठ, गणपाठ, लिङ्गानुशासन, उणादिपाठात्मकैः पञ्चभिर्विभागैर्विराजते। शाकटायन शब्दानुशासनस्य यक्षवर्मणा रचितस्य चिन्तामणिनामकस्य स्वटीकाग्रन्थस्य मङ्गलाचरणप्रस्तावे शाकटायनं तत्कृतं शब्दानुशासनं च अधिकृत्य एवमुक्त वान्–

स्वस्तिश्रीसकलज्ञानसाम्राज्यपदमाप्तवान्
महाश्रमणसंघाधिपतिर्यः शाकटायनः
एकः शब्दाम्बुधिं बुद्धिमन्थरेण प्रमथ्य यः
सयशःश्रि समुद्दध्रे विश्वं व्याकरणामृतम्
स्वल्पग्रन्थं सुखोपायं सम्पूर्णं यदुपक्रमम्
शब्दानुशासनं सर्वमार्हच्छासनवत्परम्
इष्टिर्नेष्टा न वक्तव्यं वक्तव्यं सूत्रतः पृथक्
संख्यातं नोपसंख्यातं यस्य शब्दानुशासने
तस्यातिमहतीं वृत्तिं संहृत्येयं लघीयसी
सम्पूर्णलक्षणावृत्तिर्वक्ष्यते यक्षवर्मणा

---

1. शेषात् सिद्धनन्दिनः (2-1-229)

 Public domain. Digitization Muthulakshmi Research Academy

इन्द्रचन्द्रादिभिः शाब्दैर्यदुक्तं शब्दलक्षणम्
तदिहास्ति समस्तं च यन्नेहास्ति न तत् क्वचित्

एतच्छ्लोकानुरोधं शाकटायनो जैन इति, महाश्रमणसङ्घाधिपतिरिति, तन्निर्मितं च व्याकरणं स्वल्पग्रन्थ इति, सुलभावगाह इति, सूत्रतः पृथक् इष्टिरिति वा वक्तव्यमिति वा, असंख्यातमिति वा वक्तव्यस्य अत्र अभाव इति च जानीमः। पूर्ववैयाकरणैरिन्द्रचन्द्रादिभिर्यच्छब्दलक्षणमुक्तं तत् समस्तमत्र व्याकरणे वर्तत इति, यदिह नास्ति तत् न कुत्रापि वर्तत इति च उक्तौ अस्य व्याकरणस्य महत्त्वं सुज्ञमेव। पाणिन्याचार्येणापि स्वीयव्याकरणे सूत्रद्वये अस्य आचार्यस्य मतमुट्टङ्कितं दृश्यते।

लङः शाकटायनस्यैव 3.4.11
व्योर्लघुप्रयत्नतरः शाकटायनस्य 8.3.18

अनयोः प्रथमेन सूत्रेण शाकटायनव्याकरणस्य "आद्विषो झेर्जुस्वा" (3.4.11) इति सूत्रविषयः, द्वितीयेन सूत्रेण 'वा नुज्यात्' (1-1-155) इति सूत्रविषयश्च प्रस्तुतौ दृश्येते। एवं ऋग्वेद, शुक्लयजुर्वेदप्रातिशाख्ययोः, यास्काचार्यस्य निरुक्ते शाकटायनस्य मतमुद्धृतं दृश्यते। एवं भगवत्पतञ्जलिकृते पाणिनीयमहाभाष्ये च 'उणादयो बहुलम्' (3-3-1) इति सूत्रव्याख्यावसरे सर्वमपि शब्दजातं धातुजमेवेति शाकटायनस्य अभिप्रायः प्रकटीकृतः।

नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्।
वैयाकरणानां च शाकटायन आह धातुजं नाम इति॥

एवं शाकटायनाचार्येण रचितान्यपि उणादिसूत्राणि सर्वैरप्याचार्यैरङ्गीकृतानि। पाणिन्याचार्योऽपि 'उणादयो बहुलम्' इति संसूत्र्य शाकटायनस्यैव उणादिसूत्रपाठं स्वीचकार – इत्येतत्सर्वमपि शाकटायनस्य महत्त्वं तद्विरचितस्य व्याकरणस्य अप्रतिहतं प्राधान्यं च प्रख्यापयति। अत्र व्याकरणे पाणिनीय इव वैदिकी प्रक्रिया, स्वरप्रक्रिया च न दृश्येते इति तयोरभावः शाकटायनस्य जैनमतावलम्बित्वमेव कारणं संसूचयति।

अत्र च व्याकरणे शाकटायनाचार्येण चतुरध्यायेषु प्रतिपादं च चतुर्षु

In Public domain. Digitization Muthulakshmi Research Academy

पादेषु आहत्य 3236 सूत्रेषु लौकिकसंस्कृतभाषायाः स्वरूपं सुष्ठु व्यवर्णि। शाकटायनीयव्याकरणस्य विविधा व्याख्याः, श्रीमदभयचन्द्राचार्या दिर्भिर्विरचिताः प्रक्रियासङ्ग्रहादयः शाकटायनव्याकरणस्य पठनपाठनादिषु स्थितां प्रतिपत्तिं व्यञ्जयन्ति।

अथास्य व्याकरणस्य पाणिनीयव्याकरणेन साकं तुलनात्मकरूपेण परिशील्य तत्तदंशेषु परिदृश्यमानाः केचिदंशा अत्र प्रदर्श्यन्ते।

प्रत्याहारसूत्राणि

पाणिनीयव्याकरणम्	**शाकटायनव्याकरणम्**
प्रत्याहारसूत्राणि चतुर्दश	त्रयोदशैव
ऋलृक् इति सूत्रे लृकारो वर्तते	नास्ति-ऋक् इत्येव सूत्रम्
हयवरट्-लण् इति सूत्रद्वयम्	हयवरलञ् इत्येकं सूत्रम्
लण् इत्यत्र णकारः इत्	लञ् इत्यत्र ञकारः इत्
झभञ्, घढधष् इति सूत्रद्वयम्	झभघढधष् इत्येकं सूत्रम्
झभघढध इति वर्णानां जबगडदेति वर्णानां अपेक्षया पूर्वं निर्देशः	पश्चात् निर्देशः
खफछठथ चटतव् इत्येकं सूत्रम्	खफछठथट्, चटतव् इति सूत्रद्वयम्
शषसर् इति सूत्रम्	शषस अं, अः, क, प, र् इति सूत्रम्

अत्र ऋक् इति शाकटायने सूत्रे ऋवर्णेन लृवर्णस्यापि ग्रहणेन लृवर्णस्य सूत्रे अनावश्यकता समर्थनीया। पाणिनीय इव अत्र णकारद्वयस्य इद्वर्णत्वाभावेन प्रत्याहारः पूर्वेण णकारेण वा परेण णकारेण वेति संशयस्य अवकाश एव न। अण्, अञ् इति णकारञकाराभ्यां प्रत्याहारश्च सुलभो भवति।

एवमत्र 'हयवरलञ्' इति सूत्रकरणेन अट्प्रत्ययस्य दुष्करत्वेन 'अड्व्यवायेऽपि' रेफषकाराभ्यां परस्य णत्वं भवतीति यद्यपि पाणिनीय इव अत्र वक्तुं न शक्यते तथापि "श्चुलट्स्तौ नान्तरे" (1-2-51) इति सूत्रेण शे, चवर्गे, ले, टवर्गे, से, तवर्गे च परे स्थानिनिमित्तयोरन्तरे मध्ये सति नस्य णो न भवति इति निषेधेन अत्र साधितं दृश्यते।

In Public domain. Digitization Muthulakshmi Research Academy

पाणिनीये तत्र तत्र सूत्रैः रूपसिद्धेरभावे वार्तिककारेण रूपाणां साधनं दृश्यते। किन्त्वत्र व्याकरणे वार्तिकानामभावेन वार्तिकोक्तोऽपि विषयः सूत्रे एव सङ्गृहीत इति ज्ञायते। उक्तं च शाकटायनस्य व्याख्याकारेण यक्षवर्माचार्येण – "इष्टिर्नेष्टा न वक्तव्यं वक्तव्यं सूत्रतः पृथक्, संख्यातं नोपसंख्यातं यस्य शब्दानुशासने" इति। द्वित्राणि उदाहरणानि परिशीलयामः। पाणिनीये 'शश्छोऽटि' (8-4-63) इति सूत्रेण अटि परतः शस्य स्थाने छत्वं विहितम्। एवं सति तत्+श्लोकेन इत्यत्र लकारस्य अट्प्रत्याहारे अनन्तर्भूतत्वेन छत्वादेशाभावे वार्तिककारेण अस्य पूरकतया "छत्वममीति वाच्यम्" इति वार्तिकेन अमि परेऽपि छत्वं विधाय तच्छ्लोकेन इत्यादीनि रूपाणि साधितानि। किन्तु शाकटायनः 'शश्छोऽटि' इत्यनुक्तवा 'शश्छोऽमि' इत्येव सूत्रयित्वा वार्तिकस्य आवश्यकतामपनयति।

एवं पाणिनीये 'ओमाङोश्च' (6-1-95) इति सूत्रेण विहितस्य पररूपस्य 'ओत्वोष्ठयोः समासे वा' इति वार्तिकेन समासे ओत्वोष्ठयोः परयोः वैकल्पिकत्वमुक्तम्। अत्र तु शाकटायने 'ओमाङि परः' (1-1-87) 'वौष्ठौतौ समासे' (1-1-88) इति सूत्राभ्यां वार्तिकस्य आवश्यकतां विनैव पररूपस्य वैकल्पिकत्वं साधितम्। एवमत्र इष्टीनां, वक्तव्यानां, उपसंख्यानानां च अनाश्रयणेन सूत्रैरेव तत्तद्विषयाणां सङ्ग्रहो दृश्यते।

शाकटायनव्याकरणे रूपाणां प्रक्रियोक्तौ पाणिनीयतोऽपि लाघवं दृश्यते। पश्यत–उत्थानमिति रूपस्य साधनावसरे पाणिनीयानुसारं उद्+स्थानमित्यत्र 'उदः स्थास्तम्भ्वोः पूर्वस्य' (8-4-61) इति सूत्रेण सकारस्य स्थाने पूर्वसवर्णत्वेन थकारादेशो विहितः। किन्तु शाकटायन व्याकरणे उदः स्थास्तम्भः (1-1-134) इति सूत्रेण उदःपरस्य स्थास्तम्भधात्वोः सकारस्य लोपो विहितः (उद्+स्थानम् > उद्+थानम्) अस्यां तु प्रक्रियायां उत्थानम्, उत्तम्भनम् इति रूपयोः साधने लाघवं दृश्यते। पाणिनीये इव सकारस्य स्थाने पूर्वसवर्णादेशत्वेन थकारः, तस्य पाक्षिको लोपः, लोपाभावपक्षे थकारस्य श्रवणम् इत्यादिप्रक्रियाया गौरवं विदितमेव।

एवं पाणिनीये 'अदेङ्गुणः' (1-1-2) इति सूत्रेण अ, ए, ओ

In Public domain. Digitization Muthulakshmi Research Academy

वर्णानां गुणसंज्ञां विधाय ऋकारस्थानिकस्य अकारस्य 'उरण् रपरः' (1-1-51) इति सूत्रेण रपरत्वं विहितम्। किन्तु शाकटायनीये 'इक्येङर्' (1-1-82) इति सूत्रेण अरादेशमेव विधाय रपरत्वविधानावश्यकता निरस्ता। एवमेव वृद्धिविधानमपि। अत्र गुणवृद्धिसंज्ञा अपि न स्वीकृताः।

पाणिनीयं तु वैदिकस्वरप्रक्रियामपि वर्णयतीति हेतोः पाणिन्याचार्येण तत्तत्प्रत्यया इत्संज्ञाविशेषयुक्ता विहिता दृश्यन्ते इति ज्ञातमेव यथा ङीप् इत्यादिषु प्रत्ययेषु पकारादय इत्संज्ञकाः स्वरविशेषार्थाः। शाकटायने तु 'ङी' इत्येव प्रत्ययो विहितो यतस्तद्व्याकरणं केवलं लौकिकसंस्कृत भाषापरम्। शाकटायने ङीप्, ङीष्, ङीनां त्रयाणामपि 'ङी' इत्येक एव प्रत्ययो विहितः।

पाणिनीये तत्र तत्र सूत्रद्वयेन विहितं कार्यं शाकटायने एकेनैव सूत्रेण विहितं सत् लाघवं प्रकटयति। तथा हि पाणिनीये ढो ढे लोपः, रोरि इति सूत्रद्वयेन विहितो ढरेफयोर्लोपः 'ढ्रो ढ्रिः' (1-1-131) इति शाकटायनीये एकेनैव सूत्रेण सङ्गृहीतो दृश्यते।

पाणिनीये नन्द्यादिभ्यो धातुभ्यः कर्त्रर्थे ल्युट्प्रत्ययं विधाय युवोरनाकौ (7-1-1) इति सूत्रेण यो रनादेशो विहितः, किन्तु शाकटायनीये ल्युप्रत्ययं विनैव साक्षात् धातोः अन प्रत्यय एव विहितः-यथा 'नन्द्या दिभ्योऽनः' (4.3.86) इति।

शाकटायनव्याकरणे घि, घु, पद, वृद्ध इत्यादीनां संज्ञानां सत्वेऽपि गुणवृद्ध्यादीनां पाणिनीये परिदृश्यमानानां बहूनां संज्ञानामभाव एव दृश्यते। 'दु' इति नाम्नो नूतना संज्ञा परिकल्पिता। पाणिनीये अदृष्टा वाक्यसंज्ञा अस्मिन्व्याकरणे निर्दिष्टा 'तिङ वाक्यम्' इति सूत्रेण। तिङन्तस्य विशेषणं तेन सह वाक्यसंज्ञं भवति इति तस्य सूत्रस्य अर्थः।

पाणिनीयसूत्राणां शाकटायनसूत्राणां च केषांचित् ऐकरूप्यं, केषाञ्चित् किञ्चिदिव विपरिणामश्च दृश्येते। अधोनिर्दिष्टानि सूत्राणि कानिचन उभयोरपि व्याकरणयोः ऐकरूप्येण वर्तन्ते।

अतोऽम्	षष्ठी चानादरे
चोः कुः	अत इञ्
नहो धः	आशिषि नाथः

In Public domain. Digitization Muthulakshmi Research Academy

अभिनिविशश्च	किमः क्षेपे
ऋत्यकः	उपसर्गादध्वनः
प्रशस्यस्य श्रः	अनद्यतने लङ्
त्रेस्त्रयः	कर्तरि शप्
मध्यान्मः	प्रावृष एण्यः
किमः कः	
झोऽन्तः	

विपरिणतरूपेण वर्तमानानि कानिचन सूत्राणि उदाह्रियन्ते।

आद् गुणः	इक्येङर्
वृद्धिरेचि	एजूच्यैच्
एङि पररूपम्	पदान्ते त्सेङः
इको यणचि	अस्वे
जश्शसोः शिः	जश्शसः शिः
क्षय्यजय्यौ शक्यार्थे	क्षय्यजय्यौ शक्तौ
ह्रस्वस्य पिति कृति तुक्	ह्रस्वस्य तक् पिति कृति

एवं केवलं वैदिक, स्वरप्रक्रियावर्जं पाणिनीयमिव भाषासम्बन्धिनो नैकान् विषयान् विपुलं वर्णयत् शाकटायनं व्याकरणं प्राचीन भारतीय संस्कृतव्याकरणेषु अतीव प्रधानं वर्तते। तत्रभवतः पाणिन्याचार्यस्य अष्टाध्यायी व्याकरणग्रन्थस्य अवतरणेन पूर्ववर्तीनि व्याकरणानि इव शाकटायनव्याकरणमपि अध्ययनाध्यापनादिभ्यो दूरीभूतमित्यनुमातुं शक्यते। जैनमतस्य ह्रासीभावोऽपि कारणान्तरं भवेत्।

विदितमेवेदमस्माकं समेषां यदिदानीं सर्वत्रापि विद्यालयेषु पाणिनीयस्यैव अध्ययनाध्यापनेषु महान् प्रचारो वर्तते नान्येषां व्याकरणानामिति। किन्तु पाणिनीयेन साकं अन्येषामपि व्याकरणानां च अध्ययनं यदा भवति तदैव भारतदेशे या प्राचीनव्याकरणपरम्परा सुविशाला प्रवृत्ता तस्याः समीचनः समग्रश्च आविष्कारो भवेत्। व्याकरणानां तुलनात्मकाध्ययनेनैव व्याकरणस्य अध्येतारः नूत्नदृष्टिकोणेन भाषास्वरूपविषये आलोचनं कर्तुं शक्नुवन्तीत्यत्र नास्ति सन्देहः।

In Public domain. Digitization Muthulakshmi Research Academy

माधवीया धातुवृत्तिः - एको विमर्शः

अष्टकं गणपाठश्च धातुपाठस्तथैव च
लिङ्गानुशासनं शिक्षा पाणिनीया अमी क्रमात्

इत्ययं श्रोकः अष्टाध्यायी, गणपाठः, धातुपाठः, लिङ्गानुशासनम्, शिक्षा इत्येते पञ्च पाणिनीया इति ज्ञापयति। एतेषु अष्टाध्यायीग्रन्थः अतीव प्रधानः। गणपाठः, धातुपाठः, लिङ्गानुशासनं, शिक्षा इत्येते अष्टाध्यायीग्रन्थस्य अनुबन्धग्रन्थाः। एतेष्वपि धातुपाठः अन्येभ्योऽपि प्रधानः।

संस्कृतभाषायां माकिं सर्वेऽपि शब्दाः व्युत्पन्नाः - नाम सर्वेऽपि शब्दाः धातुभ्य उत्पन्नाः। उक्तं च अभियुक्तैर्यत् 'सर्वं धातुजमाह शकटस्य च तोकम्' इति । अतः संस्कृतभाषायां शब्दानां ये ये अर्था अस्माभिरुच्यन्ते ते सर्वेऽपि अन्वर्था एव नतु केवलं सङ्केतिताः। इतरभाषासु एतादृशी स्थितिः न दृश्यते । तत्र अव्युत्पन्नाः शब्दा एव भूयांसो वर्तन्ते । तत्र अस्य शब्दस्य अयमेव अर्थः किमर्थः, अर्थान्तरं किमर्थं न भवेदित्यस्य समाधानं न भवेत् । किन्तु संस्कृतभाषायां भूयसां शब्दानां व्युत्पत्तिः सुवचैव यतो हि ते धातुजन्या एव भवन्ति । अतः संस्कृतभाषायां शब्दस्वरूपनिर्णये, शब्दार्थनिणये च धातूनामत्यधिकं प्राधान्यं वर्तत इत्यत्र न कापि विप्रतिपत्तिः। इमे च धातवः पाणिनिना माकिं द्विसहस्रसंख्याकाः पठिताः। तेषां स्वरूपमनुसृत्य ते एवं दशगणत्वेन च विभक्ताः वर्तन्ते।

गणः	धातुसंख्या
भ्वादिगणः	1010
अदादिगणः	72
जुहोत्यादिगणः	24
दिवादिगणः	141
स्वादिगणः	34
तुदादिगणः	157
रुधादिगणः	24

 Public domain. Digitization Muthulakshmi Research Academy

तनादिगणः	10
क्र्यादिगणः	61
चुरादिगणः	410
	1944

अयं च धातुपाठः भगवत्पाणिनिना भ्वेधस्पर्धगाधृबाधृ इत्यादि रूपेण अर्थनिर्देशरहितः, भू सत्तायाम्, एध वृद्धौ, स्पर्ध सङ्घर्षे इत्यादिरूपेण अर्थनिर्देशसहितश्चेत्युभयथा धातुपाठः पठित इति, अर्थनिर्देशरहितो लघुपाठ इति, अर्थनिर्देशसहितो गुरुपाठश्चेति च व्यवह्रियते इति विदुषामभिप्रायः। गुरुपाठस्यैवाधुना विद्वल्लोके व्यवहारो वर्तते।

भट्टोजिदीक्षितविरचित सिद्धान्तकौमुद्याः पठनपाठनेषु प्रचारावाप्तेः पूर्वं धातूनामध्ययने धातुपाठस्य विविधा वृत्तय एव उपयुक्त्र आसन्। बहवो व्याकरणाचार्याः पाणिनीयधातुपाठस्य विविधा वृत्तीर्विरच्य धातूनामध्ययनं सुलभमकार्षुः। धातुपाठस्य वृत्तिकारेषु सुनागः, भीमसेनः, क्षीरस्वामी, मैत्रेयः, दैवः, चरकः, कृष्णलीलाशुकमुनिः, सायणः, काश्यपः, गुप्तः, श्रीभद्र इत्येताषां नामानि श्रूयन्ते। एतासु च वृत्तिषु क्षीरस्वामिनः क्षीरतरङ्गिणी, मैत्रेयस्य धातुप्रदीपः, सायणमाधवस्य माधवीय धातुवृत्तिः - इत्येतद् वृत्तित्रयमुपलभ्यते। अन्याश्च वृत्तयः काश्चन माधवीयधातुवृत्तौ उट्टङ्किता दृश्यन्ते। मैत्रेयस्य धातुप्रदीपः, क्षीरस्वामिनः क्षीरतरङ्गिणी च अतीव संक्षिप्ते वृत्ती। समग्रा च धातुवृत्तिर्माधवीयधातुवृत्तिरेवेति विदुषामभिप्रायः।

माधवीया धातुवृत्तिर्यद्यपि माधवोपज्ञत्वेन प्रसिद्धा तथाप्यस्या वृत्ते रचयिता सायणाचार्य एवेति अस्या अवतारिकाश्लोको ज्ञापयति।

तेन मायणपुत्रेण सायणेन मनीषिणा
आख्यया माधवीयेयं धातुवृत्तिर्विरच्यते (13 श्लोकः)

एवं "पूर्वदक्षिणपश्चिमसमुद्राधीश्वर कम्पराजपुत्र सङ्गमराजमहा मन्त्रिणा मायणपुत्रेण माधवसहोदरेण सायणेन विरचितायां धातुवृत्तौ शब्विकरणे भ्वादयः" - इत्यादिप्रकरणान्तगद्यमपि सायण एव एतद्वृत्तेः कर्तेति ख्यापयति।

In Public domain. Digitization Muthulakshmi Research Academy

अस्यां च वृत्तौ तत्तद्धातुव्याख्यानसन्दर्भे यज्ञनारायणदीक्षित एतद्वृत्तेः कर्तेत्युट्टङ्कितं दृश्यते।

यज्ञनारायणार्येण प्रक्रियेयं प्रपञ्चिता।
अस्या विशेषतः सन्तु बोद्धारो भाष्यपारगाः॥
(क्रमु पादविक्षेपे - धातुव्याख्या)

अथापि शिष्यबोधाय प्रक्रियेयं प्रपञ्चिता
यज्ञनारायणार्येण बुद्ध्यन्तां भाष्यपारगाः
(मत्य बन्धने धातुव्याख्या)

एवं "वदते यज्ञनारायणार्यः जानाति वदितुं इत्यर्थः"
(वद व्यक्तायां वाचि धातुव्याख्या)

ग्रन्थादौ मङ्गलश्लोकेषु अन्तिमे श्लोके कुण्डिनार्योऽस्या धातुवृत्तेः कर्तेति उक्तम्

"सुधातुवृत्तिर्विहिता बुधानां
श्रीकुण्डिनार्येण कलावपीह"

यज्ञनारायणः एवं कुण्डिनार्यश्च इत्येतौ कौ? किमेते सायणस्यैव नामान्तरे? इति संन्देहो भवति। अस्मिन्विषये विद्वांसः एवमभिप्रयन्ति। भारतीयानां व्यावहारिकं नाम एवं नाक्षत्रं नाम इति नामद्वयं भवति। तत्र व्यावहारिकं नाम नित्यव्यवहारे, एवं नाक्षत्रं नाम नित्य, नैमित्तिक, काम्यकर्मणामनुष्ठाने च उपयुक्तं भवति। सायण इति व्यावहारिकं, यज्ञनारायण इति नाक्षत्रं च नाम भवेत्। कुण्डिनार्य इति नाम यस्मिन् श्लोके वर्तते स श्लोकः नैकेषु तालपत्रेषु न दृश्यते इति हेतोः स प्रक्षिप्तो भवेत् इति। अयं त्वभिप्रायः समुचितः प्रतिभाति। सायणस्त्विमां धातुवृत्तिं सोदरस्य माधवस्य प्रेरणया वा, तस्य साहाय्येन वा रचितवान् स्यात्। अत इयं वृत्तिः माधवीयधातुवृत्तिरिति माधवनाम्ना प्रसिद्धा भवेत्। अयं च सायणाचार्यः प्रख्यातो वेदभाष्यकर्ता। पाणिनीयव्याकरणे, मीमांसायां, वेदेषु च अयं निष्णात आसीदिति तद्ग्रन्थ पर्यालोचनेन ज्ञायते। अयं च 1372 विक्रमाब्दे सम्भूतः। अस्य च विद्यागुरवः श्रीविद्यातीर्थ श्रीकण्ठनामानः।

In Public domain. Digitization Muthulakshmi Research Academy

धातुपाठे च पाणिनिना पठिताः 1944 धातवः अत्र वृत्तौ व्याख्याताः। इयं वृत्तिः पाणिनीयधातुपाठस्य समग्रं विपुलं च व्याख्यानं चकास्ते। तत्तद्धातूनां दशलकारेषु निष्पन्नानां रूपाणां केवलं निर्देशनमस्या व्याख्याया उद्देशो न। परन्तु धातूनां सम्बन्धिनां सर्वेषामप्यंशानां समग्रा चर्चा अत्र विधीयते इत्ययमस्या व्याख्याया विशेषः। अपि च सिद्धान्तकौमुद्यामुत्तरार्धे चर्चिता अंशाः सर्वेऽपि अत्र चर्चिता इतीयं व्याख्या तया समनेति वक्तुं शक्यते। न केवलं तत्तद्धातूनां कर्त्रर्थकरूपाणां अपितु भावकर्मार्थयोर्यङ् णिच्यङ्लुगाद्यर्थेषु च निष्पन्नानां रूपाणां, कृदन्तरूपाणां च आवश्यकप्रक्रियानिर्देशानुसारं निरूपणं अस्या धातुवृत्तेः समग्रताया प्रत्यक्षं निदर्शनम्। भट्टोजिदीक्षितस्य सिद्धान्तकौमुद्यामेतेषां धातुरूपाणां प्रक्रियापूर्वकनिर्देशे सत्यपि तेषां भिन्नभिन्नप्रकरणेषु वर्तमानत्वेन एकस्य धातोः सर्वेषामपि रूपाणामेकत्रैव निरूपणं न लभ्यते। तत्तद्विषयाणां निरूपणाय भिन्नभिन्नप्रकरणानां प्रकल्पनं तत्र हेतुः। माधवीयधातुवृत्तौ तु एकैकं धातुं गृहीत्वा तस्य भिन्नभिन्नप्रत्ययेषु अर्थेषु च रूपाणामेकत्रैव निरूपणं कृतमित्यत्र सौलभ्यं सुवचमेव। यङ्णिच्सनाद्यन्त धातुरूपाणामपि तत्तल्लकारेषु रूपाणि अत्र प्रदर्शितानि। उपसर्गयोजनेन धातूनां भिन्नार्थत्वं, आत्मनेपदपरस्मैपदविधानं इत्यादिकमत्र वृत्तौ प्रदर्शितम्। माधवीयधातुवृत्ता वयमपरो विशेषो यदत्र णिच्, सन्, यङाद्यन्त धातुरूपाणामपि भावकर्मादिष्वर्थेषु तत्तल्लकाररूपाणि प्रदर्शितानि। भूधातोर्निष्पन्नानां विविधरूपाणां विवृतिरीतिं यदि परिशीलयामस्तर्हि विविधधातूनां तत्तद्रूपनिष्पादनरीतिरत्र कथं वा वर्तते इति स्पष्टमवगन्तुं शक्यते। अस्यां च वृत्तौ भूधातोर्निष्पन्नानि विविधरूपाणि एवं वर्तन्ते।

1. कर्त्रर्थे दशलकाराणां प्रधानरूपाणि
2. आत्मनेपदपरस्मैपदप्रक्रियारूपाणि–व्यतिभवते इत्यादिकम्। तस्य सर्वलकारेषु प्रधानरूपाणि
3. भावकर्मार्थयोः सर्वलकाराणां प्रधानरूपाणि
4. शतृशानजन्तरूपाणि
5. सन्नन्तरूपाणि–बुभूषति इत्यादिकम्

In Public domain. Digitization Muthulakshmi Research Academy

6. सन्नन्तरूपाणां भावकर्मार्थयोः रूपाणि–बुभूष्यते इत्यादिकम्
7. यङ्प्रत्ययान्तरूपाणि–बोभूयते इत्यादि।
8. यङ्लुङन्तरूपाणि–बोभवीति, बोभोति इत्यादि।
9. यङ्लुङन्तरूपाणां आत्मनेपदप्रक्रियायां सर्वलकारेषु रूपाणि।
10. यङ्लुङन्तरूपाणां सत् (शतृशानच्) प्रत्ययान्तरूपाणि–बोभुवत् इत्यादि।
11. णिजन्तरूपाणि–भावयति भावयते इत्यादि।
12. णिजन्तरूपाणां कर्मार्थकरूपाणि–भावयते इत्यादि।

एवं विविधक्रियारूपभेदानां तथा शत्राद्यन्तरूपाणां च निर्देशानन्तरं तत्तद्धातूनां कृदन्तरूपाणि, उणादिरूपाणि च प्रदर्शितानि। न केवलमेतेषां निर्देशनमात्रमेव अपि तु तेषां प्रक्रियापि यथावश्यकतां प्रदर्शिता। भूधातोरेकस्यैव अस्यां पञ्चचत्वारिंशत्पृष्ठपरिमिता व्याख्या कृतेत्ययं धातुरूपाणां समग्रनिरूपणे माधवीयधातुवृत्तेर्वैशिष्ट्यं सुष्ठु प्रतिपादयति।

अत्र च वृत्तौ तत्तद्धातुरूपाणां निर्देशः, तेषां प्रक्रियाया निर्देशः इत्याद्यंशैः साकं तेषां प्रयोगे ये कारकविशेषा भवन्ति तेषामपि निर्देशः अत्र कृत इत्ययमपरो विशेषः। कानिचिदुदाहरणानि परिशील्यन्ताम्।

1. ञि भी भये–चोरात् बिभेति, भीत्रार्थानां भयहेतुः इति भयहेतोः कारकस्य अपादानत्वम्।
2. अत सातत्यगमने–सातत्यगमनं–सन्ततगमनम्–ग्राममतति–ग्रामाय अतति–गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ इति द्वितीयाचतुर्थ्यौ।
3. रुच दीप्तावभिप्रीतौ च–रोचते देवदत्ताय मोदकः–'रुच्यर्थानां प्रीयमाणः' इति प्रीयमाणस्य सम्प्रदानत्वात् चतुर्थी।
4. स्मृ चिन्तायाम्–मातुः स्मरति इत्यादि हरतिवत् अधीगर्थ इति कर्मणि शेषे षष्ठी।

तत्तद्धातूनामर्थविषयकसन्देहेषु सत्सु विवृतिरियं जिज्ञासूनां महदुपकरोतीति अधोनिर्दिष्टैरुदाहरणैः स्पष्टं भवति।

In Public domain. Digitization Muthulakshmi Research Academy

1. भू सत्तायाम्-सत्ता इह आत्मधारणम्।
2. शुच अभिषवे-अवयवानां शिथिलीकरणम्, सुरायाः सन्धानं वा अभिषवः, अभिषवः स्नानमिति चन्द्रः।
3. उबिन्दुर् निशामने-निशामनं चक्षुर्विज्ञानम्।
4. कृष विलेखने-विलेखनमिहाकर्षणम्।
5. म्लेच्छ अव्यक्ते शब्दे-इह अव्यक्तः शब्दः अस्फुटशब्दः अपशब्दः।
6. शुभ सञ्चलने-सञ्चलनं प्रकृतिविपर्यासो मथनं च।
7. लष कान्तौ-कान्तिरिच्छा।
8. हेठ विबाधायाम्-विबाधनं शाठ्यम्।
9. वठि एकचर्यायाम्-एकचर्या सहायगमनम्।
10. अच्छी विवासे-समाप्तिर्विवास इति तरङ्गिण्याम्, विपूर्वश्चायं प्रायः प्रयुज्यते इति पुरुषकारे।
11. मुडि मार्जने-शुद्धिन्यग्भावौ मार्जनम्।
12. अञ्चु विशेषणे-विशेषणं व्यावर्तनम्।

एवमेव तत्तल्लकाररूपाणां निर्देशावसरे तेषामर्थविवरणमपि अस्यां धातुवृत्तौ कृतं दृश्यते। जिज्ञासूनामिदं महदुपकरोति। 'विधिनिमन्त्रणामन्त्रणाधीष्ट संप्रश्नप्रार्थनेषु लिङ्' इति सूत्रे विध्यादिशब्दानामर्थविवरणं, 'लिङ् निमित्ते लृङ् क्रियातिपत्तौ' इति सूत्रे क्रियातिपत्तिशब्दविवरणं चेत्यादिकमत्र उदाहरणम्।

न केवलं धातूनामर्थविषये अपितु धातुस्वरूपविषयेऽपि सन्देहे तन्निवारणाय आवश्यकविवृतिरत्र कृता दृश्यते। कानिचन उदाहरणानि दृश्यन्ताम्।

रोसि चुम्बने - इदुदित् दन्त्यान्त्यः

वृजी वर्जने - दन्त्योष्ठ्यादिः

पृजी सम्पर्जने - ओष्ठ्यादिरीदित्

In Public domain. Digitization Muthulakshmi Research Academy

व्युष दाहे - दन्त्योष्ठ्यादिः, मूर्धन्यान्त्यश्च

शिञ् निशाने - तालव्यादिरयम्

उज्झ उत्सर्गे - अयमपि दोपधः (उद्+झ)

तत्तत्सन्दर्भेषु भगवत्पतञ्जलिः, भर्तृहरिः, हेलाराजः, कैयटः, जिनेन्द्रबुद्धिः, हरदत्तः, चन्द्रः, क्षीरस्वामी, शाकटायनः, आपिशलिः इत्यादयः सार्धशतं शास्त्रकारा उट्टङ्किता इतीदमस्या माधवीयधातुवृत्तेः प्रामाणिकतां सायणाचार्यस्य व्याकरणशास्त्रे अकुण्ठितं वैदुष्यं च प्रकटयति।

भट्टोजिदीक्षितस्य सिद्धान्तकौमुद्या आविर्भावात् प्राक् माधवीयधातुवृत्तेः पठनपाठनेषु प्रचुरः प्रचार आसीत्। अधुनातनकाले यद्यप्यस्या वृत्तेः प्रचारो नास्ति तथापि धातुसम्बन्धिनामंशानां प्रतिपादकेषु पाणिनीय धातुपाठ व्याख्यानग्रन्थेषु माधवीयधातुवृत्तेः समो ग्रन्थो नास्तीत्युक्ते न काप्यतिशयोक्ति र्वर्तते।

In Public domain. Digitization Muthulakshmi Research Academy

पाणिनीयादिषु आधुनिकभाषाशास्त्रविषयाः

व्याक्रियन्ते शब्दा अनेनेति व्याकरणम् इति व्युत्पत्त्यनुसारेण प्रकृति प्रत्यय विभागपूर्वकं यत् शब्दस्वरूपं प्रदर्शयत् शब्दानां साधुत्वज्ञानं च जनयति तत् व्याकरणशास्त्रम्। उक्तंच भर्तृहरिणा वाक्यपदीये 'साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः' इति। यद्यपि नैकासां भाषाणां प्रत्येकं व्याकरणं भवत्येव तथापि संस्कृतभाषाया यावद्विस्तृतं व्याकरणं वर्तते तावत् न कस्या अपि भाषाया वर्तते इत्यत्र न कस्यापि संशीतिः। अद्यापि भारतदेशे प्रायः पञ्चदश व्याकरणसम्प्रदाया व्यवहारे सन्ति, प्रायः त्रिशतं व्याकरणाचार्याणां नामानि, सहस्राधिकं व्याकरणग्रन्थाः, तद्व्याख्यानग्रन्थाश्च ज्ञायन्ते इत्यहो संस्कृत व्याकरणशास्त्रस्य महती विस्तृतिः। अत एव भारतदेशे अस्य शास्त्रस्य प्रत्येकविषयतया च अध्ययनं प्रवृत्तं वर्तते।

अधुनातने काले भाषाशास्त्रं, भाषाविज्ञानं इत्यादिर्भिर्नामभिः प्रसिद्धं शास्त्रमेकं पाश्चात्यदेशेषु जन्म लब्ध्वा क्रमशः अस्माकं देशेऽपि पदमाधाय बहुलप्रचारं अधिगच्छदस्ति। भाषासम्बन्धिनां विषयाणां चर्चा यत्र भवति तत् भाषाशास्त्रमिति सुज्ञेयमेव। व्याकरणमपि भाषासम्बन्धिनीमेव चर्चां करोतीति स्पष्टमेव। तर्हि व्याकरणस्य भाषाशास्त्रस्य च को वा भेद इति संशीतिर्जायते। भाषासम्बन्धिन एव विषयस्य विमर्शनमितीदं लक्षणं शास्त्र द्वयस्यापि समानमेव। तथापि भाषाशास्त्रं नैकेषु विषयेषु व्याकरणाद्भिद्यते। तथाहि भाषाशास्त्रापेक्षया व्याकरणस्य क्षेत्रं परिमितं वर्तते। भाषाशास्त्रे प्रतिपाद्यमानाः भाषोत्पत्तिः, भाषाकुटुम्बविभागः, लिपिः, माण्डलिकभाषा इत्यादयो बहवो विषयाः प्रतिपाद्या भवन्ति। व्याकरणे तु ध्वनिसन्धिवाक्य विज्ञानादिकं यद्यपि प्रतिपाद्यते तथापि भाषोत्पत्त्यादिकं तु तत्र न प्रतिपाद्यो विषयः।

व्याकरणं तु भाषाया नियमान् तद्द्वारा साधुरूपाणि च प्रदर्शयत् वर्णनप्रधानमेव दृश्यते। भाषाया व्यवहारः कथं कर्तव्यः इत्यस्मिन्नेव विषये व्याकरणस्य आदरः नतु भाषायाश्चरित्रादिनिरूपणे। भाषाशास्त्रं भाषायाः

In Public domain. Digitization Muthulakshmi Research Academy

व्यावहारिकप्रयोगविषये न बद्धादरम्। यदि कश्चन एकादश इति प्रयोक्तव्ये केवलं एकदश इति रूपं प्रयुङ्क्ते तर्हि व्याकरणं तदसाधु इति वदति। भाषाशास्त्रं तु एकदशशब्दोऽपि कदाचिद् व्यवहृतो भवेत् अनन्तरकाले द्वादशशब्दसादृश्येन एकादश इति परिणत इति निरूपयति। अतो व्याकरणेन निरूपितानामंशानामपि निदानं विवेचयति भाषाशास्त्रम्।

भाषाविषयकमध्ययनं अस्माकं भारतदेशे अतिप्राचीनकालादेव प्रवृत्तं क्रमशो विकसितं च दृश्यते। आधुनिक भाषाशास्त्राध्ययनस्य मूलं प्रेरकं च संस्कृतव्याकरणाध्ययनमेवेति विशिष्य पाणिनीयाध्ययनमेवेति विपश्चितः अभिप्रयन्ति। जान्.बि.केरोल्नामा पाश्चात्यो भाषाशास्त्रविद्वान् आधुनिक वर्णनात्मकभाषाध्ययनस्य चारित्रकभाषाध्ययनस्य च पाणिनीयाष्टाध्यायी एव प्रेरिका इत्यङ्गीकरोति। पश्यत तस्य वाक्यानि।

Western were for the first time exposed to the descriptive methods of the Hindu Grammarian Panini influenced directly or indirectly by Panini began to produce descriptive and historical studies.

आधुनिकभाषाशास्त्रे ध्वनिः, पदं, सन्धिः, वाक्यम्, अर्थः इत्यादिविषयाः प्राधान्येन, एवं भाषाणामुत्पत्तिः तासां वर्गीकरणं, लिपिः, माण्डलिकभाषाः इत्यादिविषयाः गौणत्वेन च विविच्यमानाः अंशा वर्तन्ते। यद्यपि संस्कृतव्याकरणशास्त्रे भाषोत्पत्त्यादिकस्य विषयजातस्य विवेचनं न भवति तथापि ध्वनि, पद, वाक्य, अर्थादीनां तु विवेचनं भवत्येव।

अमुमेव विषयं किञ्चिदिव परिशीलयामः। भाषासम्बन्धी विषयो न केवलं व्याकरणे अपि तु सर्वस्मिन्नपि वाङ्मये न्यूनाधिकः प्रसक्तो विमृष्टश्च दृश्यते। भारतीयसाहित्ये वैदिकसाहित्यं अतिप्राचीनतमं वर्तते। तत्र विशिष्य ऋग्वेदे भाषासम्बन्धिविषयाणां बीजावापो दृश्यते। 'चत्वारि शृङ्गा त्रयो अस्य पादाः', 'सक्तुमिव तितउना पुनन्तः', 'उत त्वः पश्यन्न ददर्श वाचम्' इत्यादिषु ऋग्वेदमन्त्रेषु भाषासम्बन्धिनो व्याकरणस्य प्रसक्तिर्दृश्यते। एवं बाह्मणारण्यकेष्वपि शब्दानां प्रकृतिप्रत्ययविभागपूर्वके अर्थविचारे

In Public domain. Digitization Muthulakshmi Research Academy

आनुषङ्गिकतया कृतः प्रयत्नो दृश्यते। पदपाठे भाषाया वैज्ञानिकं अध्ययनं महत्तरं संदृश्यते। सन्धिसमासानाधारीकृत्य वाक्यस्थानां शब्दानां विश्लेषणं, स्वराघातस्य विचारः इत्यादिकं पदपाठे कृतं भाषासम्बन्धिविमर्शमेव स्मारयति।

कालक्रमेण वैदिकभाषायां सञ्जातैर्विविधपरिणामैः वेदमन्त्राणा मुच्चारणं विपर्यस्तं भवेदिति कृत्वा ऋषयः मुखयन्त्रे वर्णानामुत्पत्तिः कथं वा भवति? वर्णानां स्थानकरणप्रयत्नाश्च के? इत्यादीनां ध्वनिसम्बन्धिविषयाणां प्रतिपादकान् शिक्षाप्रातिशाख्याख्यग्रन्थान् रचयामासुः। आधुनिकभाषाशास्त्रे phonetics इति शब्देन यदुच्यते तदेव शिक्षाप्रातिशाख्यग्रन्थेषु प्रतिपादितं वर्तते। चतुर्णामपि वेदानां प्रत्येकं प्रातिशाख्यग्रन्थाः विभिन्नाः वर्तन्ते। शिक्षाग्रन्थेषु केचन वेदविशेषसम्बन्धिनः, केचन वेदसामान्यसम्बन्धिनः। विविधऋषिभिः प्रणीताः शिक्षाग्रन्थाः प्रायः पञ्चषष्टिः ज्ञायन्ते। प्रातिशाख्येषु कृतया ध्वन्युत्पत्तिचर्चया साकं अन्येषामपि विषयाणां शिक्षाग्रन्थेषु प्रतिपादनं दृश्यते। अतः शिक्षाग्रन्थानां प्रातिशाख्यानुबन्धिता भाव्यते।

वर्णानां स्थानकरणप्रयत्नभेदानां एवं तेषां परस्परं भेदजनकानामंशानाञ्च परिगणने प्राचीनभारतीयविदुषां महती सूक्ष्मेक्षिका दृश्यते।

अनुप्रदानात् संसर्गात् स्थानात् करणविन्ययात्।
जायते वर्णवैशेष्यं परिमाणाच्च पञ्चमात् ॥

इतीदं तैत्तिरीयप्रातिशाख्यवचनं अनुप्रदानं, संसर्गः, स्थानं, करणविन्ययः, परिमाणम् – इत्येतत् हेतुपञ्चकं वर्णभेदे समर्थमिति निरूपयति। अत्र अनुप्रदानेन श्वासनाद धर्मः, संसर्गेण महाप्राणतादिधर्मः, स्थानेन ताल्वादि, करणविन्ययेन स्पृष्टप्रयत्नादि भेदः, परिमाणेन ह्रस्वदीर्घादिभेदश्च ज्ञेयः। कायाग्निना प्रेरितो वायुः कथं वा वर्णत्वं भजते इति स्पष्टमेवं पाणिनीयशिक्षायां वर्णितम्।

"आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्
मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्

In Public domain. Digitization Muthulakshmi Research Academy

सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः
वर्णान् जनयते

मारुतस्य उरोजातत्वात् पूर्वं या प्रक्रिया पाणिनिना प्रदर्शिता सा तु आधुनिकभाषाशास्त्रे नैव दृश्यते।

शिक्षाप्रातिशाख्यग्रन्थेषु ये ध्वनिसिद्धान्ताः प्रतिपादितास्तानेव आधुनिक ध्वनिशास्त्रविद्वांसः प्रातिपदिकतया गृहीत्वा परिशोधनं कुर्वन्ति। अतो ध्वनिशास्त्रविषये शिक्षाप्रातिशाख्यग्रन्थानां वैषिष्ट्यमनुपममिति जानीमः।

वैदिकभाषायां व्यवहृतानां तदनन्तरकाले च व्यवहाराद् भ्रष्टानां अत एव दुर्ज्ञेयार्थानां वैदिकपदानां अर्थदृष्ट्या विवेचनं आवश्यकं सञ्जातम्। अतो वैदिकपदानां संग्रहग्रन्थाः निघण्टुनाम्ना प्रसिद्धाः निर्मिताः। एते वैदिकपदकोशा इति वक्तुं शक्यन्ते। यद्यप्यत्र शब्दानामाधुनिककोशेष्विव अर्थनिर्देशो न दृश्यते तथापि शब्दानां पर्यायपदनिर्देशेन अर्थः सुगम एवेति एतेषां वैदिक शब्दकोशशब्देन व्यवहारः समुचित एव।

यास्केन निर्मितं निरुक्तं निघण्टोरेव व्याख्यारूपो ग्रन्थः। निघण्टौ निर्दिष्टानामेव शब्दानां एकैकस्य व्युत्पत्तिनिर्देशपूर्वकः अर्थविचारः अत्र निरुक्ते कृतः। अर्थविषयकविचारं कृतवत्सु भारतीयशास्त्रकारेषु यास्कस्य सर्वप्रथमं स्थानं वर्तते।

न केवलं संस्कृतभाषाव्याकरणेषु अपितु संसारे वर्तमानानां सर्वासामपि भाषाणां व्याकरणेषु पाणिनीयव्याकरणं मूर्धन्यं वर्तते इति प्राच्य पाश्चात्यविदुषां निर्णयः। पाणिनिना निर्मितं व्याकरणं अष्टाध्यायीति नाम्ना प्रसिद्धम्। अष्टाध्याय्यां न केवलं लौकिक संस्कृतभाषायाः अपितु वैदिक संस्कृतभाषाया अपि विवेचनं कृतम्। अतः लौकिकवैदिक भाषयोरिदं तुलनात्मकव्याकरणमित्यपि वक्तुं सुशकम्। पाश्चात्यदेशेषु आधुनिकभाषा शास्त्रविभवस्य संस्कृतव्याकरणाध्ययनमेव तत्रापि विशिष्य पाणिनीयाया अष्टाध्याय्या अध्ययनमेव निदानमिति भाषाशास्त्रविदुषामभिप्रायः।

In Public domain. Digitization Muthulakshmi Research Academy

आधुनिकभाषाशास्त्रविषयाः पाणिनीयव्याकरणे दृश्यन्ते वा? यदि दृश्यन्ते तर्हि तेषां परस्परं को वा सम्बन्धः? इत्यमुं विषयं विचारयामः।

अष्याध्याय्यां प्रायश्चतुस्सहस्रमेव सूत्राणि वर्तन्ते। परिमाणे अल्पीयस्यप्यस्मिन् व्याकरणे लौकिकवैदिक संस्कृतभाषयोः स्वरूपं सम्यक् समग्रतया वर्णितं वर्तते। सर्वाण्यपि पाणिनीयानि सूत्राणि संज्ञा, परिभाषा, विधि, नियम, प्रतिषेध, अधिकारसूत्रेषु अन्तर्भवन्ति। शब्दस्वरूपविवेचनपराः सर्वेऽपि अंशाः विधिनियमप्रतिषेधात्मकेन सूत्रत्रयेणैव निरूपिता भवन्ति। शिष्टं संज्ञादिसूत्रत्रयं यद्यपि व्याकरणनिर्माणे लाघवाय आश्रितमिति बहुभिरभिप्रीयते तथापि सम्यक् विविच्यमाने इदं भाषातत्त्वं निरूपयितुमेव स्वव्याकरणे पाणिनिना प्रयुक्तमिति वक्तुं शक्यते। तथाहि 'तरप्तमपौ घः' इति सूत्रेण तरप्तमप्प्रत्यययोः घसंज्ञा कृता। भाषायामस्य तुल्यकार्यप्रवर्तनेन एकसंज्ञाकरणं युक्तमेव। एवं 'समर्थः पदविधिः' इत्यादिकं परिभाषासूत्रजालमपि पदानां सम्बन्धी विधिः समर्थाश्रितो भवति इत्यादिभाषातत्वसम्बन्धिविषयं स्पष्टीकरोति। एवं तद्धिताः, प्राक्कडारात्समासः इत्यादिकं अधिकारसूत्रजालं तत्तद्विषयाणामादौ वर्तमानं सत् अनन्तरसूत्रेषु अधिकृतं विषयविभागनिर्णायकं भवति।

प्रातिशाख्यादिषु स्वपूर्ववर्तिषु वर्णोत्पत्तिविधानस्य स्थानकरणप्रयत्नादिकस्य च प्रतिपादितत्वेन व्याकरणे अनयोरानुषङ्गिकत्वेन च पाणिनीये ध्वनिशास्त्रसम्बन्धि सूत्रं 'मुखनासिकावचनोऽनुनासिकः' इत्येकमेव ग्रथितमिति विदुषामभिप्रायः। किन्तु बहुषु सन्धिनिरूपकेषु स्थलेषु ध्वनिशास्त्रसिद्धान्तानामनुसरणं अकारि पाणिनिना इति स्पष्टं ज्ञायते। तुल्यास्यप्रयत्नं सवर्णम्, स्थानेन्तरतमः इत्यादिके सूत्रजाले सवर्णतानिर्णये आन्तरतम्यनिर्णये च ध्वनिशास्त्रमेव मूलमिति निश्चप्रचमेव खलु।

आधुनिकभाषाशास्त्रे Morpheme, Allomorph इत्येतदंशद्वयस्य बहु प्राधान्यं वर्तते, अर्थवदंशरहितत्वे सति अर्थवानंशः 'मार्फीम्' इति, सन्ध्यादिभिरादेशादिभिर्वा परिणतस्य रूपान्तरं 'अल्लोमार्फ्' इति च कथ्यते। 'भूवादयो धातवः' अर्थवदधातुरप्रत्ययः प्रातिपदिकम्, कृत्तद्धितसमासाश्च,

In Public domain. Digitization Muthulakshmi Research Academy

प्रत्ययः इत्यादिसूत्रैः निर्दिष्टा धातुप्रातिपदिकप्रत्यया 'मार्फीम्' पदवाच्याः। एवं 'पा' इत्यादीनां आदेशभूताः पिबादयश्च अलोमार्फ् पदवाच्या एव भवन्ति। पाणिनिस्तु एतत्पदद्वयस्य समानार्थकं पदद्वयं यद्यपि न प्रायुङ्क तथापि तस्य अनयोरंशयोः भाषासम्बन्धिनोर्भावना तु वर्तत एव इत्यत्र न संशयः। परिसरानुगुणं भिन्नरूपत्वे सति ये समानार्थका वर्तन्ते तानेकांशत्वेनैव पाणिनिर्भावयामासेति हनो वध लिङि, डेर्यः इत्यादिषु सूत्रेषु ज्ञायते।

एवं वर्णानामर्थवत्त्वं वर्तते वा न वा इत्ययमंशः महाभाष्ये वर्णानामर्थ वत्वाधिकरणे चर्चितो दृश्यते। वर्णानामर्थवत्वं भगवत्पतञ्जलिना एवं निर्धारितम् "अर्थवन्तो वर्णाः धातुप्रातिपदिक प्रत्यय निपाताना मेकवर्णानामर्थवत्त्वात् - एति, आभ्याम्, औपगव, उ उत्तिष्ठ वर्ण व्यत्यये च अर्थान्तरगमनात् - कूपः, सूपो यूप इति। कूप इति सककारेण कश्चिदर्थो गम्यते - सूप इति ककारापाये सकारोपजने चार्थान्तरं गम्यते" इति। प्रातिपदिकेभ्यो विहितानां विभक्तिप्रत्ययानां ये अर्था वर्तन्ते तेषां वर्गीकरणायैव पाणिनीये कारकप्रक्रिया उद्दिष्टा। वाक्ये वर्तमानानां सुबन्तानां, तिङन्तानाञ्च वर्तमान एव सम्बन्धः कारकशब्देन उच्यते, कर्तृकर्मादीनि षट् कारकाणि प्रतिपादितानि पाणिनिना। कारकाणां विभक्तीनां च नियतसम्बन्धो नास्ति यतोहि एकस्यैव कारकस्य भिन्नविभक्तिभिर्व्यक्तीकरणं दृश्यते। तथाहि

"रामः बाणेन वालिनं हतवान्"

"रामेण वाली हतः" - इत्यस्मिन् वाक्यद्वये रामवालिशब्दौ भिन्नविभक्त्योर्वर्तमानावपि न तौ वाक्यद्वयस्य अर्थे भेदं जनयतः। द्वयोरपि वाक्ययोरेक एव अर्थः। उभयत्र रामः कर्ता, वाली च कर्म, अतः कारकाणि अन्तर्निर्माणसम्बन्धीनीति, कारकाभिव्यञ्जिका विभक्तयः बहिरङ्गनिर्माण सम्बन्धिन्य इति च पाणिनिना भावितमिति ज्ञायते। एवं भाषाशास्त्रज्ञाः पाणिनीयकारकसिद्धान्तं प्रशस्य तं स्वशास्त्रे परिशोधनांशत्वेन गृहीतवन्तः।

संस्कृतव्याकरणे वाक्यनिर्माणमधिकृत्य विचारो न प्रवृत्त इति बहूनां विपश्चितामभिप्रायः। आङ्ग्लादिषु भाषास्विव संस्कृतभाषायां वाक्ये स्थितानां शब्दानां क्रमस्य अनिश्चितत्वं, अस्थिरत्वं च अस्य हेतू भवतः। किन्तु

In Public domain. Digitization Muthulakshmi Research Academy

अष्टाध्याय्यामपि तत्र तत्र वाक्यस्थानां पदानां क्रमविषयकः प्रसङ्गो दृश्यत एव। तथा हि 'ते प्राग्धातोः' इति सूत्रेण लौकिकवाक्ये उपसर्गाणां धातोः पूर्वत्वं, वैदिकवाङ्मये तेषां 'छन्दसि परेऽपि, व्यवहिताश्च' इति सूत्राभ्यां धातोः परत्वं, व्यवहितत्वञ्च विहिते। 'आयातमुप' इत्यत्र उपसर्गस्य धातोः परत्वेन, उपप्रयोभिरागतम् इत्यत्र उप-आगतम् इति उपसर्गस्य धातोश्च प्रयोभिरिति शब्देन व्यवहितत्वं दृश्यते।

संस्कृतभाषायां अल्पीयसैव शब्देन अनेकशब्दैर्बोद्ध्यमानमर्थं प्रकटीकर्तुमवकाशो वर्तते। पुत्रमात्मन इच्छति, अन्यं पुत्रमिव पश्यति इत्यर्थद्वये पुत्रीयति इति, माता-पितरावित्यर्थे पितराविति, दशरथस्य अपत्यमित्यर्थे दाशरथिरिति - एवंविधाः प्रयोगा अस्य उदाहरणानि। अस्मिन् सन्दर्भे संस्कृतव्याकरणे व्यवह्रियमाणौ वृत्तिविग्रहशब्दौ विचारणीयौ। परार्थाभिधानं वृत्तिरिति, वृत्त्यर्थावबोधकं वाक्यं विग्रह इति तयोर्निरुक्तिः। कृत्तद्धितैकशेषसनाद्यन्त धातुनामिकाः पञ्च वृत्तयः। पाणिनिर्विग्रहवाक्यमेव मौलिकत्वेन सम्भाव्य तत्समानार्थिकीं वृत्तिं साधितवान्। अतः पाणिनिना विग्रहवाक्यम् अन्तरङ्गनिर्माणरूपतया, वृत्तिं बहिरङ्गनिर्माणरूपत्वेन च परिगणितवानिति सूहम्। इदञ्च निर्माणद्वयं आधुनिकभाषाशास्त्रे क्रमशः Deep structure, Surface structure इति नामद्वयेन व्यवह्रियते।

एवं संस्कृतव्याकरणे आधुनिकभाषाशास्त्रसम्प्रदायाः, सिद्धान्ताश्च बहवो दृश्यन्ते। अष्टाध्याय्या विविधविषयानधिकृत्य बहवो भारतीयाः पाश्चात्याश्च विद्वांसः भाषाशास्त्रदृष्टया परिशीलनं कृत्वा शोधग्रन्थान् लिखन्तीत्यहो पाणिनीयव्याकरणस्य आधुनिकभाषाशास्त्रदृष्ट्या वैशिष्ट्यम्।

In Public domain. Digitization Muthulakshmi Research Academy

आन्ध्रभाषायां प्रयुज्यमाना: केचन संस्कृतशब्दा: - तेषामर्थविपरिणाम:

विदितमेवेदं भाषातत्त्वविदां विदुषां यत् शब्दस्वरूपे यथा कालक्रमेण विपरिणामो भवति तथा शब्दानामर्थेष्वपि विपरिणाम: साधारणतया सर्वास्वपि भाषासु भवत्येवेति। अयमेव भाषाशास्त्रे अर्थविपरिणाम: (semantic change) इति व्यवह्रियते। शब्दविपरिणामे शब्दस्य स्वरूपं तु कालक्रमेण परिणतं भवति अर्थस्तु अभिन्न: स एव भवति। अर्थविपरिणामे कालक्रमेण अर्थो विपरिणतो भवति किन्तु शब्दस्वरूपं तु यथापूर्वमेव भवति। शब्दस्वरूपविपरिणामे उच्चारणे त्वरा, आनुकूल्यञ्चेत्यादय: कारणानि भवन्ति। अर्थविपरिणामे तु स्पष्टं कारणानि निर्णेतुं न शक्यन्ते। परन्तु तत्र सम्भवन्ती विविधा रीतीस्तु अवगन्तुं शक्यते। Breal नामा फ्रेञ्च्भाषाशास्त्रवेत्ता (1900) भाषायां सम्पद्यमानस्य अर्थविपरिणामस्य अर्थव्याकोच, अर्थसङ्कोच, अर्थगौरव, अर्थापकर्षादिरूपेण विभागं चकार। कस्यचन शब्दस्य पूर्वं सङ्कुचितस्य अर्थस्य अनन्तरकाले यदि व्याकोचो भवति तर्हि स अर्थव्याकोच:। विस्तृतार्थस्य कस्यचन शब्दस्य अर्थ: अनन्तरकाले यदि सङ्कुचितो भवति तर्हि अर्थसङ्कोच:। कदाचिन्निन्दार्थे प्रयुज्यमानस्य कस्यचन साधारणशब्दस्य अनन्तरकाले यदि विशिष्टार्थे प्रयोग: तर्हि अर्थगौरवम्। एवं कदाचिद्विशिष्टार्थे प्रयुज्यमानस्य कस्यचन शब्दस्य अनन्तरकाले यदि निन्दार्थे प्रयोगस्तर्हि अर्थापकर्ष: इत्यादीनि तेषां निर्वचनान्युक्तानि। एतादृशा अर्थविपरिणामा: तत्तद्भाषापदानां उत्तरकाले तत्तद्भाषासु भवितुं शक्यन्ते। एवं निर्दिष्टभाषा सम्बन्धिशब्दानां तस्यामेव भाषायां न अपितु अन्य भाषास्वपि भवितुं शक्यन्ते। एवं आन्ध्रभाषायामपि प्रयुज्यमानानां संस्कृतशब्दानां अर्थेषु बहवो विपरिणामा दृश्यन्ते। तेषामेव विवेचनमत्र पत्रे प्रधानो विषय:।

संस्कृतभाषापदानां, तेषां तद्भाषायां वर्तमानानामर्थानां, एवमान्ध्रभाषा व्यवहारे वर्तमानानाञ्च अर्थानां अधोविवरणेन अयं विषय: प्रतिपाद्यते।

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतशब्दः	संस्कृतशब्दस्य तद्भाषायामर्थः	संस्कृतशब्दस्य आन्ध्रभाषायामर्थः
अंशः	भागः	विषयः
अङ्कितम्	चिह्नितम्	कस्यचिन्नाम्रा ग्रंन्थस्य अर्पणम्
अतिशयः	आधिक्यम्	गर्वः
अनुमानम्	प्रमाणविशेषः	सन्देहः
अनुवादः	अनुपठनम्	भाषान्तरीकरणम्
अनूचानः	षडङ्गयुक्तवेदस्य अध्येता	बहोः कालादागतः
अन्योन्यता	परस्परसम्बन्धः	प्रेमभावः / स्नेहभावः
अपराधः	आगः	दण्डः
अबद्धम्	अनर्थकम्	असत्यम्
अभिमानः	अहङ्कारः	गौरवभावः
अभ्यन्तरम्	अन्तरालम्	आतङ्कः
अमोघम्	सफलम्	अतीव समीचीनम्
अमेध्यम्	अपवित्रम्	शकृत्
अयोमयम्	अयसो विकारः	सन्दिग्धम्
अलक्ष्यम्	न दृश्यम्	अगणनम् (not caring)
अल्पम्	स्तोकम्	गर्वः
अवशिष्टानि	शिष्टाः पदार्थाः	कालकृत्यानि
असाध्यः	साधितुमशक्यः	अतीव समर्थः
असह्यम्	सोढुं न शक्यम्	अशुद्धम् / मलिनम्
अशुद्धम्	न शुद्धम्	शकृत्
अदृष्टम्	1) वह्नितोयादिजं भयम् 2) न दृष्टम्	भाग्यम्
अधमम्	नीचम्	न्यूनातिन्यूनतः

In Public domain. Digitization Muthulakshmi Research Academy

अधिगमनम्	प्राप्तिः	अतिक्रमणम्
अवधानम्	श्रद्धा	आशुकवितारूपसाहित्य प्रक्रियाविशेषः
अवसरः	कार्यप्रसक्तिः	आवश्यकः
अवस्था	कालिको विशेषः	बाधा
अविनीतिः	विनयाभावः	भ्रष्टाचारादिकम् (corruption)
आत्मीयः	स्वीयः	मित्रम्, आदरपात्रम्
आत्मीयता	स्वीयता	मित्रता, आदरपात्रता
आदर्शः	दर्पणम्	अनुसरणीयः (model)
आमोदः	सुगन्धः सन्तोषः }	अङ्गीकारः, सम्मतिः
आराध्यः	पूजनीयः	शैवब्राह्मण शाखाविशेषसम्बन्धी
आर्भाटः (आर्भटः)	ध्वानः	पटाटोपः
आवेदना	अभ्यर्थना	बाधा, चिन्ता
आलस्यम्	अलसत्वम्	विलम्बः
इन्द्राणी	इन्द्रस्य भार्या शची	विधवा
उचितम्	योग्यम्	निःशुल्कम्
उत्तरम्	समाधानम्	लेखः
उदाहरणम्	दृष्टान्तः	उदाहरणं नाम काव्यप्रक्रियाभेदः
उद्यमः	प्रयत्नः	कार्यसिद्ध्यै क्रियमाणः सामूहिकः प्रयत्नः
उद्योगः	प्रयत्नः	जीविकायै आश्रियमाणा वृत्तिः
उद्योगी	प्रयत्नवान्	जीविकायै कस्यांचन संस्थायां काञ्चन वृत्तिमाश्रितः
उद्देशः	प्रान्तः	मनोगतः अभिप्रायः

In Public domain. Digitization Muthulakshmi Research Academy

उद्रेक:	अतिशय:	कोपातिशय:
उपाधि:	धर्मचिन्ता	1) जीवनाधारभूता वृत्ति: 2) Degree
उपन्यास:	1) वाक्यारम्भ: 2) समीपे न्यास:	कंचन विषयमधिकृत्य सभादिषु भाषणम् (Lecture)
उपसम्मति:	अङ्गीकार:	प्रीति:
उभयम्	द्वयम्	देवालये उत्सवनिर्वहणभार:
कटाक्ष:	अपाङ्गदर्शनम्	अनुग्रह:
कर्म	कार्यम्	उत्तरकर्म
कल्याणम्	शुभम्, उत्सव:	विवाह:
कार्मिक:	कर्मकर:	कर्मागारेषु कर्मकर:
कार्यम्	कर्म	1) गर्भाधानम् 2) शुभकर्म
काष्ठम्	दण्ड:, दारु	चिति:
कुम्भकोणम्	क्षेत्रविशेष:	वञ्चनम्
कृति:	कार्यम्	त्यागराजादीनां सङ्कीर्तनम्, ग्रन्थ:, काव्यादिकम्
कैङ्कर्यम्	सेवकत्वम्	चौर्यम्
ग्रहचार:	ग्रहाणां चार:	दुर्भागधेयम्
घट:	मृण्मयं पात्रम्	शठो मानव:
ग्रन्थकर्ता	ग्रन्थनिर्माता	व्यभिचारी
घटिक: (घटक:)	घटनकर्ता	सर्वधा समर्थ:
घण्टापथ:	राजमार्ग: संसारणम् }	सुदृढं (वक्ति)
घर्षणम्	कषणम्	कोपपूरितं परस्परं विवादादिकम्

In Public domain. Digitization Muthulakshmi Research Academy

छान्दसः	वेदस्य अध्येता	अलौकिकः, लोकिकव्यवहारशून्यः
जातीयम्	जातिसम्बन्धि	1) राष्ट्रसम्बन्धि 2) पदबन्धः (idiom)
जातीयता	जातिसम्बन्धः	राष्ट्रियता (Nationality)
जिह्वाः	रसनाः	मत्स्याः
ज्ञापकम्	यत् ज्ञापयति तत्	स्मरणम्
ज्ञापकानि	यानि ज्ञापयन्ति तानि	पूर्वस्मृतयः
तद्दिनम्	स दिवसः	श्राद्धम्
तन्मयः	तस्य विकारः	लीनः
तत्क्षणः	स एव क्षणः	झटिति
तपनम्	ज्वलनम्	अत्युत्कण्ठा
दाहः	ज्वलनम्	पिपासा
दिव्यम्	दिवि भवम्	अतीव प्रशस्तम्
देवदासी	देवालयेषु पूजादिसन्दर्भेषु नृत्यगानादीनां कृते नियुक्ता भक्ता	वेश्या
देहशुद्धिः	देहस्य निर्मलता	अतीव ताडनम्
दोहदम्	वृक्षादीनां दोहदक्रिया	प्रोत्साहनम्
धर्मः	पुण्यकार्यम्	दानम्
ध्येयम्	ध्यातुं योग्यम्	गम्यम् (aim)
धर्मसत्रम्	धर्मार्थं निर्मितं सत्रम्	अन्नसत्रम्
निदानम्	आदिकारणम्	त्वरारहितम्
निक्षेपः	निधिः	निर्बाधम् निरातङ्कम्

In Public domain. Digitization Muthulakshmi Research Academy

नियोगी	अधिकृतः	नियोगिनामकशाखा-विशेषसम्बन्धी ब्राह्मणः
निर्माता	निर्माणकर्ता	चलनचित्रनिर्माणाय आवश्यकस्य धनस्य दाता
निर्लक्ष्यम्	लक्ष्यादपेतम्	उदासीनता श्रद्धाहीनता गौरवभावहीनता
परिश्रमः	श्रमः	यन्त्रादिभिर्विविधवस्तूनां निर्माणकेन्द्रम्
परिधिः	परिवेषः	सीमा
पत्रम्	पर्णम्, गरुत् गजादिवाहनम्	ऋणपत्रम् लेखपत्रम्
पथ्यम्	हितम्	रोगिणे दीयमानः आहारः
परिष्कारः	आभरणम्	विवादनिर्मुक्तिः (settlement)
पर्यवसानम्	अवसानम्	फलितम्
पापम्	किल्बिषम्	दयासूचकं पदम्
पूज्यम्	पूजनीयम्	शून्यम्, बिन्दुः
पूर्णम्	समग्रम्	मधुरपदार्थविशेषः
प्रधानी (प्रधानः)	प्रमुखः	प्रधानमन्त्री
प्रातिपदिकम्	व्याकरणसंज्ञाविशेषः	मूलम्
प्रियम्	इष्टम्	अतिमूल्यवत्
पञ्चमः	पञ्चसंख्येयः	चण्डालः
पौरुषम्	1) पुरुषसम्बन्धि 2) पराक्रमः	अभिमानः
प्रभुत्वम्	प्रभुता	सर्वकारः (Government)

In Public domain. Digitization Muthulakshmi Research Academy

प्रचारः	अतीव भ्रमणम्	लोके व्याप्तिः
प्रमाणम्	प्रमाकरणम्	देवादिसन्निधौ सत्यप्रकटनम्
प्रसङ्गः	प्रसक्तिः	भाषणम्
प्रसादः	प्रसन्नता	देवालये भगवदनुग्रहरूपेण दीयमानं भक्ष्यवस्तुविशेषः
प्रस्तुतम्	प्रारब्धम्	आधुनिकम्, अधुना
प्राप्तम्	लब्धम्	भाग्यम्
प्रारब्धम्	आरब्धम्	दुर्भागधेयम्
बहुमतिः बहुमानम्	गौरवम्	पुरस्कारः पारितोषिकम्
बाध्यः	बाधितुं योग्यः	उत्तरदायी (responsible)
बाध्यता	बाध्यस्य भावः	उत्तरदायिता (responsibility)
ब्रह्माण्डम्	सर्वं जगत्	अत्यन्तं विशिष्टम्
भद्रता	मङ्गलता	आरक्षणम् (security)
भद्रम्	मङ्गलम्	क्षेमम्
भरणम्	वेतनम्	पूर्वराजादिभ्यः सर्वकारेण दीयमाना भृतिः
भक्ष्यम्	भक्षणीयम्	मधुरः अपूपविशेषः
भेषजम्	औषधम्	गर्वः, गर्वोक्तिः
मुहूर्तम्	द्वादशक्षणकालः	पाणिग्रहणादिकालः शुभकार्याय निर्णीतः
मान (भङ्गः)	गौरवभावः	शील (भङ्गः) (rape)
मर्यादा	सीमा	गौरवभावः
मान्यम्	माननीयम्	ब्राह्मणादिभ्यो अनुभवाय दत्ता भूमिः

In Public domain. Digitization Muthulakshmi Research Academy

मुष्टिः	सङ्ग्राहः	भिक्षा
यजमानः	यष्टा	अधिकृतः
यन्त्राङ्गम्	यन्त्रस्य अङ्गम्	अङ्गबलम्
राज्याङ्गम्	राज्यस्य अङ्गं सेनादिकम्	राज्यनिर्वहणनियमावलिः (constitution)
लक्षणम्	निर्वचनम्, चिह्नम्	समीचीनम्
वर्धन्ती	जन्मदिवसे अनुष्ठितव्यो वर्धापनोत्सवः	मरणदिवसः
वाचकम्	यद् वक्ति तत्	भाषासम्बन्धि पाठ्यपुस्तकम् (Reader)
विचारः	आलोचनम्, निर्णयः	मनोबाधा
विधानम्	करणम्	रीतिः, पद्धतिः
विपरीतम्	विरुद्धम्	अत्यधिकम्, भूरि
विश्वासः	विस्रम्भः	कृतज्ञता
वृत्तिः	वर्तनम्	जीविकायै आश्रियमाणं कर्म
वैदिकः	वेदाध्यायी	ब्राह्मणेषु शाखाविशेषानुयायी
व्यक्तिः	स्पष्टता	स्त्रीपुरुषयोरन्यतमः, अन्यतमा
व्यवसायः	उत्साहः	कृषिः (Agriculture)
व्यापारः	क्रियाकलापः	वाणिज्यम् (Business)
व्यासः	विस्तारः	निबन्धः (Essay)
व्यवसायः	उत्साहः, प्रयत्नः	कृषिः (Agriculture)
शरीरयात्रा	जीवनम्	भोजनम्
शासनम्	आज्ञापनम्, आज्ञा	शिलालेखादिकम्
शिवपूजा	शिवस्य अर्चनम्	भोजनम्

In Public domain. Digitization Muthulakshmi Research Academy

शुभ्रम्	श्वेतम्, निर्मलम्	1) समीचीनम् 2) रूप्यकम् (वैदिकानां भाषणे)
शोभनम्	चारु, सुन्दरम्	गर्भाधानम्
शैत्यम्	शीतत्वम्	विरोधः
श्रद्धाञ्जलिः	श्रद्धया दीयमाना अञ्जलिः	निवापाञ्जलिः
श्रीमती	शोभावती	भार्या
सदुपायाः	समीचीना उपायाः	अनुकूलविधानानि
सभ्यता	सभास्तारता	मर्यादा
समाधिः	अङ्गीकारः	हृदयैकाग्र्यम्
साहित्यम्	वाङ्मयम्	ब्राह्मणेभ्यो दीयमाना स्वयम्पाकसामग्री तण्डुलादिका
शास्त्रम्	व्याकरणादिशास्त्रम्	प्रहेलिका
शिक्षा	शिक्षणम्, अभ्यासः	दण्डः (Punishment)
श्रोत्रियः	वेदस्य अध्येता	आचारवान्
सङ्गतिः	साङ्गत्यम्, मेलनम्	विशेषसमाचारः विशेषविषयः
सदस्यम्	सदसि भवम्	विवाहसन्दर्भे दम्पतिभ्यो दत्ताशिषां पण्डितानां सत्कारः
सम्पादकः	समीकर्ता	पत्रिकायाः प्रधानरचयिता (Editor)
सम्पुटः	समुद्गकः	ग्रन्थभागः (Volume)
संसारः	जगत्	पत्नीपुत्रादिसहितकुटुम्बम्
संस्था	मर्यादा	निर्दिष्टकार्यनिर्वहणाय स्थापिता विद्यालयादयः
संस्थानम्	संस्थितिः	स्वल्पप्रान्तं राज्यम्
सम्भावना	गौरवम्, प्रेम	ब्राह्मणाय दीयमाना दक्षिणा

In Public domain. Digitization Muthulakshmi Research Academy

सन्न्यासी	यतिः	अप्रयोजकः
सिद्धान्ती	सिद्धान्तकर्ता	ज्यौतिषिकः
सन्तर्पणा	समीचीनं तर्पणम्	कस्मिंश्चित् शुभसन्दर्भे क्रियमाणं भोजनसन्तर्पणम्
समाराधना	समीचीना आराधना	कस्मिंश्चित् शुभसन्दर्भे क्रियमाणं भोजनसन्तर्पणम्
समुद्रः	उदधिः	महान् तडागः
सर्वमङ्गलम्	सर्वं मङ्गलम्	शून्यम्
सूतकम्	जाताशौचम्	आशौचमात्रम्
सङ्कोचः	सङ्कुचितता	सन्देहः
सञ्चलनम्	चलनम्	उद्विग्नता भावः
सोऽहम्	सःअहम्	रक्षणार्थं दीयमानं धनम्
स्थायी	स्थिरः	उन्नतंस्थानम् (Status)
स्थितिः	स्थानम्	सम्पन्नता
स्पृहा	ईहा	चैतन्यम्
स्थितिमान्	स्थानवान्	सम्पन्नः

एवं संस्कृतभाषापदानामान्ध्रभाषायां प्रयोगसमये अर्थवैचित्री महती दृश्यते। एवमन्यभाषासु एतानां शब्दानां प्रयोगे अयमेव अर्थविपरिणामो भवेदिति न नियमः। तत्रापि भाषासु परिशीलने महती अर्थविपरिणामवैचित्री सुदर्शा। संस्कृतशब्दानां तत्तद्देशीयभाषासु सम्पद्यमानानर्थविपरिणामान् भाषापरिशोधकाः समग्रतया परिशील्य विशेषान् प्रकटयन्त्विति मे अभ्यर्थनम्।

In Public domain. Digitization Muthulakshmi Research Academy

जायसेनापतेः नृत्तरत्नावली

आन्ध्रदेशं परिपालितवत्सु राजवंशेषु काकतीयवंशः अतीव विश्रुतः। काकतीयचक्रवर्तिनः समस्तमप्यान्ध्रदेशं एकच्छत्रं कृत्वा प्रजासंक्षेमैकदृष्टयो माकिं त्रिशतवर्षान् पर्यपालयन्। प्रथमप्रतापरुद्रः (1140-1196) गणपतिदेवः (1199-1261), रुद्रमदेवी (1261-1296), द्वितीयप्रतापरुद्रः (1296-1323) इत्येते प्रथितयशस्काः काकतिचक्रवर्तिनो न केवलं सुविशालतटाकादिनिर्माणरूपेषु प्रजासंक्षेमकार्यक्रमेषु अपि तु नृत्यशिल्पसङ्गीतादीनां ललितकलानां तथा कविपण्डितानां च पोषणे अत्यन्तं बद्धादराः प्रजानामत्यन्तं गौरवपात्रं, प्रेमपात्रं च अभवन्। रामप्पदेवालयः, सहस्रस्तम्भदेवालयः, अन्ये च देवालयाः काकतीयप्रभूणां शिल्पकलाभिमानं स्पष्टीकुर्वन्ति। द्वितीयप्रतापरुद्रस्तु स्वयं सङ्गीतसाहित्यादिषु कोविद इति, तस्य आस्थाने माकिं द्विशतं कविपण्डिता आसन्निति च ज्ञायते। गणपतिदेवो नृत्यगीतवाद्यकलातत्त्वविशारदः, मार्ग-देशि विवेचनविचक्षणश्च आसीत् (नृत्तरत्नावली.5-9,10)। न केवलमेत एव चक्रवर्तिनः अपितु तेषां सामन्तराजाः, अमात्याः, सेनापतयश्च स्वयं विविधकलावेत्तारः, कलापोषकाश्च व्यराजिषतेति तैः प्रतिष्ठापिताः शिलालेखाः ख्यापयन्ति। गणपतिदेवस्य गजसाधनिको जायनामा नृत्यगीतवाद्यरूपे तौर्यत्रिके पारदृश्वा। अस्य च गणपतिदेवचक्रवर्तिनो गजसेनाधिपतित्वेन तत्समकालिकत्वं (1199-1261) स्पष्टमेव। तेन नृत्तरत्नावली, गीतरत्नावली, वाद्यरत्नावलीति ग्रन्थत्रयं नृत्यगीतवाद्यसम्बन्धि विरचितमिति यद्यपि ज्ञायते तथाप्यस्मिन् ग्रन्थत्रये 'नृत्तरत्नावली'नामकः एक एव ग्रन्थ इदानीमुपलभ्यते। अन्यौ च नाममात्रावशिष्टौ। जायसेनापतेर्नृत्तशास्त्रवैदुष्यप्रख्यापिकामिमां 'नृत्तरत्नावली' मधिकृत्य अस्मिन्निबन्धे किञ्चिदिव विविच्यते।

नृत्तरत्नावलेः कर्ता काकतीयचक्रवर्तिनो गणपतिदेवस्य सेनानीर्जायनामा। अस्य जायनेति जायपेत्यपि व्यवहारो वर्तते। अयमय्यनवंशसञ्जातः। पिन्नचोडस्य पुत्रः। अस्य च पितृपितामहादयः आन्ध्रदेशीयचन्दवोलुनगरं राजधानीं कृत्वा परिपालितवतां वेलनाटि चोलराजाना

In Public domain. Digitization Muthulakshmi Research Academy

माश्रये आसन्। जायनस्य पितामहो नारायणनायकः कृष्णानद्याः समुद्रसङ्गमस्थले विद्यमाने द्वीपे नगरमेकं निर्माय परिपालयन्नास्त। 1203 क्रिस्त्वब्दे काकतिगणपतिचक्रवर्ती जायनस्य पितरं पिनचोडनायकं विजित्य तस्य नगरं वशीचकार। किन्तु गणपतिदेवः अय्यकुलजानां पिनचोडनायकादीनां पराक्रमेण सन्तुष्टस्तैः सख्यमकार्षीत्। एवं जायनस्य द्वे अग्रजे नारम, पेरमाख्ये परिणीय जायनस्य विनयेन शौर्यधैर्यादिभिश्च आकृष्टो गणपतिदेवः तं सम्मान्य गजसैन्याध्यक्षं कृत्वा 1213 तमे क्रिस्त्वब्दे ताम्रपुर्याः (आन्ध्रदेशीय चेब्रोलुनामकं नगरम्) परिपालकमकार्षीत्। बाल्यादेव जायनस्य प्रज्ञातिशयं ज्ञातवान् गणपतिदेवो गुण्डामात्येन तं नृत्यकलामध्यापयामासेति च नृत्तरत्नावलीतः (1-3) ज्ञायते। अनन्तरं गणपतिदेवचक्रवर्तिनः आज्ञानुसारं जयसेनान्या नृत्तरत्नावलीनामको नृत्यशास्त्रग्रन्थो व्यरचि। अनेन ग्रन्थेन जायनसेनान्यः अपारं नृत्यशास्त्रवैदुष्यं ज्ञातुं शक्यते। नृत्तशास्त्रकोविदो जायन सेनानीर्भरतमुनेरभिप्रायान् सम्यगधीत्य नृत्तरत्नावल्यां सर्वत्रापि तान् व्याचख्याविति अधोनिर्दिष्टेन श्लोकेन ज्ञातुं शक्यते।

आगत्य ब्रह्मलोकादिह भरतमुनिः शास्त्रमेतन्मदीयं
दृष्ट्वा भूयः कृतादौ प्रसृमरपुलकव्यञ्जितान्तःप्रमोदः।
आश्चर्यं पश्यतेदं कथमधिगतवानाशयं मे समग्रं
स श्रीमान् 'जायसेनापति' रिति नियतं वक्ष्यतेऽग्रे मुनीनाम्॥ (1-16)

न केवलं भरतमुनेरपितु नैकेषां नृत्तशास्त्राचार्याणामभिप्राया जायसेनान्या अत्र परामृष्टा दृश्यन्ते। ते च आचार्याः कोहलः, तुम्बुरुः, मतङ्गः, भट्टतण्डुः, कीर्तिधरः, शङ्कुकः, अभिनवगुप्तः, सोमेश्वर इत्यादयः।

नृत्ते तावत् मार्गदेशिभेदौ दृश्येते। इदं भेदद्वयं शिल्पे, सङ्गीते, साहित्ये, इतरकलासु च प्रसिद्धमेव। सम्प्रदायरीतिमनुसरद्यन्नाट्यादिकं वर्तते तन्मार्ग इति, तत्तद्देशजनानुसारं यत् स्थानिकं भवति तद्देशीति च उच्यते।

नाट्यवेदप्रवृत्तत्वात् मार्गित्वाच्च महर्षिभिः।
सद्भिः सञ्चारितत्वाच्च मार्गमाहुरिदं बुधाः॥ (नृ.र.1-52)

एतद्देशीति विख्यातं तत्तद्देशजनेच्छया। (नृ.र.1-54)

In Public domain. Digitization Muthulakshmi Research Academy

अष्टाध्यायपरिमितेऽस्मिन् ग्रन्थे अयं विशेषः यदत्र भरतादिभिः पूर्वैर्नृत्ताचार्यैः प्रतिपादितेन मार्गनृत्यभेदेन साकं देशिनृत्यभेदोऽपि प्रतिपादितो वर्तते। पञ्चम, षष्ठ, सप्तमाध्येषु देशिनृत्यसम्बन्धिनो नैके विशेषा विवृताः। "भूपालैरुपलालिता बहुकलैः प्रौढेव वाराङ्गना, देशी सम्प्रति दन्तिसैन्यपतिना सान्द्रादरं वर्ण्यते" (नृ.र.5-2) इति देशिनृत्तं प्रौढवाराङ्गनया उपमितम्।

साधारण्येन राज्ञामभिनवप्रियत्वेन तेषां प्रीत्यै नूत्नतया तत्तद्देशेषु यानि नृत्तानि कल्प्यन्ते तानि देशिनाम्ना व्यवह्रियन्ते इति, पूर्वं यद्देशिनृत्तमासीत् तदद्य मार्गनृत्तं भवतीति हेतोः तत् शास्त्रमुखेनैव अवगन्तव्यमिति, समकाले यत् नृत्तं भवति तदेव देशीति च विस्पष्टं निरूपितं जायसेनान्या (5-3,4)

नृत्तरत्नावल्यां जायसेनान्या स्वसमकाले कल्पितानि नवीनानि नैकानि देशिनृत्तानि प्रेरणी, प्रेक्कण, रासक, चर्चरी, नाट्यरासक, दण्डरासक, शिवप्रिय, चिन्तु, खण्डक, भाण्डिक, घटिसणी, चारण, बहुरूप, कोल्लाटरूपाणि बहूनि वर्णितानि (7 अध्यायः) एते सर्वेऽपि नृत्तभेदा आन्ध्रदेशीया एव भवेयुः। एतेषु चिन्तु (चिन्दु) बहुरूप, कोल्लाट (कोलाट) इतीमे नृत्यभेदा अद्यापि आन्ध्रदेशे प्रयुज्यमाना दृश्यन्ते। इमे च देशिनृत्यभेदा बहुष्वान्ध्रग्रन्थेषु वर्णिता दृश्यन्ते। अद्यत्वे प्रेरणीनामा नृत्यभेदः प्रख्यातनृत्तशास्त्रविदुषा प्रयोगकर्त्रा च श्री नटराजरामकृष्णमहाभागेन पुनःप्रयोगे आनीतः। प्रथमेषु चतुर्ष्वप्यध्यायेषु भरतादिप्राचीनाचार्यैः प्रतिपादिता मार्गनृत्तविशेषाः, पञ्चम, षष्ठ, सप्तमाध्येषु च देशिनृत्तविशेषाः, अष्टमे च अध्याये प्रेक्षावारे सभापतेः, सभ्यानाञ्च विन्यासः - इत्येते विवृताः सन्ति।

नृत्तसम्बन्धिभिः प्रधानांशैः साकं अन्येप्यनुबन्धविषया नैके सन्दर्भानुसारमत्र जायसेनापतिना प्रतिपादिताः। तत्र नृत्तसमयः, रङ्गमण्डपस्वरूपम्, यवनिकाः नर्तकीनर्तकलक्षणम्, सम्प्रदायः - इत्यादयः प्रधाना वर्तन्ते।

नृत्तसमयः : नृत्तं तावत् याग, विवाह, पट्टाभिषेक, देवपूजा, नगरप्रवेशादिसन्दर्भेषु अभ्युदयाय निरुह्यमिति निर्दिष्टम्।

In Public domain. Digitization Muthulakshmi Research Academy

यागोद्वाहमहाभिषेकनगरीवेश्मप्रवेशोदक
क्रीडासु प्रियसङ्गमव्रतमहादानात्मजोत्पत्तिषु।
यात्रापर्वपरीक्षणोत्सवजयानन्दप्रतिष्ठे हित
प्राप्तिष्वभ्युदयाय नृत्तमुचितं स्याद्देवपूजादिषु (नृ.र.1-18)

मण्डपस्वरूपम् : रङ्गमण्डपं तावत् ज्येष्ठं, मध्यमं, कनिष्ठम् इति त्रिविधं भवति। तत्र अष्टोत्तरशतहस्तपरिमितं ज्येष्ठमिति, चतुष्षष्टिहस्तपरिमितं मध्यममिति, द्वात्रिंशद्धस्तपरिमितं कनिष्ठमिति निरुक्तम्। प्रेक्षणीयानां व्यक्तौ, ध्वनिग्रहणे च अनुकूलं भवेदिति सर्वधा मध्यममेव मण्डपं उचितमिति सूचितम्। एवं मण्डपे रङ्गशीर्षकं कथं वा भवेत्, तस्य अलङ्कारविधिश्च कथं वा भवेदिति विषये नृत्तरत्नावली एवं निर्दिशति।

शुद्धादर्शतलाकाररङ्गशीर्षोपशोभितः
स्तम्भैरुत्कीर्णसिंहाद्यैर्विलसत्सालभञ्जिकैः
प्रत्युप्तानेकरत्नांशुचयध्वस्ततमोभरैः
विचित्रचित्रभङ्गीकैः प्रेक्षणीयैरलङ्कृतः
हेमाचलगुहाकारस्वर्णकुम्भैर्विराजितः
यन्त्रनारीजनालापसङ्गीतादिविचेष्टितैः
सम्पादितचमत्कारः.............. ॥ (नृ.र.7,220-228)

यवनिका : प्रधाननर्तक्याः पुरतः प्रतिपार्श्वं द्वे स्त्रियौ यवनिकानामञ्चलानि धृत्वा तिष्ठेताम्। एताश्च यवनिकास्तिस्रो वा ततो ऽप्यधिका वा यथारुचि भवेयुः। यवनिकाश्च अष्टारत्निविशालाः चतुररत्निदीर्घाश्च चित्रा भवेयुः (नृ.र.8-71) प्रथमं नर्तक्याः पुरतः स्थितां यवनिकां विना यवनिकाद्वयमपसार्य अनन्तरमातोद्यनिनादेषु तृतीया यवनिका अपसार्या इति सूचितम्।

नर्तकी : रूप, यौवन, लावण्य, नृत्तविधानामाश्रयत्वेन, नेत्रानन्दामृत पानस्य भाजनत्वेन च नर्तकी पात्रमित्यप्यभिधीयते। नृत्तरत्नावल्यां नर्तक्या लक्षणमेवं निर्दिष्टम्-

In Public domain. Digitization Muthulakshmi Research Academy

तन्वी तारुण्यलावण्यभाग्यसौभाग्यसौधभूः
कुलीना रूपवत्याढ्या ग्रहणे धारणे क्षमा
प्रगल्भा रसभावज्ञा सोत्साहा सकुतूहला
कलाभिज्ञा विधेयाङ्गी सुसत्वा मधुरस्वरा
स्मितपूर्वकृतालापा सुमनाः शुद्धलक्षणा
सुताराऽनामया श्यामा गौरीवा लाघवान्विता
जितश्रमा सभाधीरा चतुरा त्रिविधे ग्रहे
अवधानवती ख्याता गीतवाद्यविशारदा
नातिस्थूला नातिकृशा नात्युच्चा नातिवामनी
विनयौदार्यलज्जादि गुणरत्नैरलङ्कृता (नृ.र.7,154-158)

रूपयौवनयुक्तानां मृगीदृशां सहस्रेऽपि उत्तमा नर्तकी एकापि न भवतीति उत्तमनर्तक्या वैरल्यं सूचितम्।

रूपयौवनयुक्तानां सहस्रेऽपि मृगीदृशाम्
कलागुणसमेतानां नर्तकी नैव लभ्यते (नृ.र.7-161)

सभापतेः सभ्यानाञ्च विन्यासः : नाट्यशालायां सभापतेस्तथा सभ्यानाञ्च विन्यासविधानमपि जायनसेनान्या सम्यग्वर्णितमस्ति। सभापतिः सार्वभौमो मणिस्रगावेष्टितस्य मुक्तावितानस्य तले सिंहासनमधिष्ठितो भवति। तस्य वामभागे च महादेवी आसीना भवति। सार्वभौमस्य पृष्ठे च चामरधारिण्यः भवेयुः। रूपशालिनी सुवेषमधुरालापा ताम्बूलकरण्डवाहिनी नानारत्नविभूषितां हैमीं मञ्जूषां दधती सभापतेर्दक्षिणे भागे उपविशेत्। एवं प्रभोर्दक्षिणभागे मन्त्रिणः, पुरोहिताश्च सगौरवं वेत्रासनेषु उपविष्टा भवेयुः। तेषां मध्ये युवराजः, तस्य च दक्षिणभागे सेनापतयश्च उपविशेयुः। सेनानायकानां पृष्ठतश्च क्रमेण मण्डलाधिपतयः, सामन्तराजाः, दैवज्ञपतयः, वैद्यशेखराः, आयुधाधिपतयः, करणाधिपतयः, हस्त्यश्वरथनेतारः, कोशाधिपतिः, गोष्ठाधिपतिः, गृहाधिपतिः, नृत्तगीतवाद्यतत्वज्ञाः, मल्लशेखराः - इत्यादयो राजवल्लभा यथास्थानमधिकारिभिर्निवेशनीयाः। प्रभोर्वामभागे च गायकाः, नटाः, नर्तकाः, पुण्यपाठकाः, कथकाः, वाग्मिनः, विविधातोद्यवादकाश्च भवेयुः। मान्यामान्यविचारज्ञश्च वेत्रधरो द्वारपालः प्रभोर्नातिदूरे तिष्ठेत्।

In Public domain. Digitization Muthulakshmi Research Academy

करवालधरा आप्ता अङ्गरक्षका अपि जागरूकाः सभायाः समन्ततः भवेयुः। एवं जायसेनान्या नाट्यशालायां सभापतेः, इतरेषां सभ्यानाञ्च निवेशनविधानं वर्णितम् (7,13-31)

सम्प्रदायः : प्रधाननर्तक्या ये अनुजीविनो वर्तन्ते तेषां बृन्दं समुदाय इति, सम्प्रदाय इति च कथ्यते। विद्यावद्भिश्चतुरशीतिसभ्यैर्युतः उत्तमोत्तम इति, द्वात्रिंशत्सभ्ययुतो मध्यम इति, चतुर्विंशतिसभ्ययुतः अपर इति, षोडशसभ्ययुतः कनिष्ठ इति अयं सम्प्रदायः पञ्चधा निर्दिष्टः। मार्दङ्गिकादयोऽत्र सभ्याः।

जायसेनानीर्न केवलं नृत्तशास्त्रकर्ता अपितु कवितल्लजोऽपीति नृत्तरत्नावलीस्थाः श्लोका निरूपयन्ति। एतेषु श्लोकेषु तस्य कविता सालङ्कारा, चमत्कारपूर्णा सती शास्त्रग्रन्थस्य काव्यगन्धमादधती सहृदयान् परमानन्दयति। द्वित्राण्युदाहरणानि परिशीलयामः।

लीलोल्लसच्चाषगतिप्रबन्ध
मृगीप्लुतोद्यद्भ्रमरीमनोज्ञाम्।
सस्यन्दिताब्जां जनितोरुशोभां
वक्ष्यामि चारीं वनराजितुल्याम् (नृ.र.3.1)

अयं तृतीयाध्यायस्य प्रथमः श्लोकः। नृत्ते प्रयुज्यमानानां चारीणां निरूपणं नृत्तरत्नावल्यां तृतीयाध्यायस्य विषयः। प्रतिपाद्यविषयभूतायाः चार्याः परिचयः अस्मिन् श्लोके कृतः। 'वक्ष्यामि चारीं वनराजितुल्याम्' इति चार्या वनराजिरुपमानतया उक्ता। चार्याश्च लीलोल्लसच्चाषगतिप्रबन्धमृगीप्लुतोद्यद्भ्रमरीमनोज्ञाम्, सस्यन्दिताब्जां, जनितोरुशोभाम् इति विशेषणत्रयं प्रयुक्तम्। अत्र चाषगति, मृगप्लुति, भ्रमरी, स्यन्दित, जनित इतीमानि पदानि श्लिष्टान्युपयुक्तानि। चाषगतिः (मण्डलविशेषः) मृगप्लुतम् (आकाशचारीविशेषः) भ्रमरी, जनितस्यन्दिते (भूचारिविशेषौ) इत्येतै र्नृत्ताङ्गविशेषैर्युक्ता इति चारीपक्षे अन्वयः। एवं वनराजिपक्षे चाषगतिरित्यस्य चाषपक्षीणां गतिरिति, मृगीप्लुतमित्यस्य हरिणीनां प्लुतमिति, भ्रमरी इत्यस्य द्विरेफ इति, स्यन्दिते इत्यस्य नद्य इति च अर्थसमन्वयः।

In Public domain. Digitization Muthulakshmi Research Academy

श्लेषालङ्कारनिबन्धस्य अन्यदप्युदाहरणं पश्यन्तु।

"सूचीमुखगतिस्यूतगुणा शिखरशोभिनी
जायसेनाधिनाथेन नृत्तरत्नावली कृता" (नृ.र.8-81)

नृत्तरत्नावल्यामयमन्तिमः श्लोकः। अत्र रत्नावलीशब्दो नृत्तरत्नावली ग्रन्थ इति, रत्नहार इति अर्थद्वये प्रयुक्तः। 'नृत्तरत्नावली' इत्यस्य सूचीमुखगतिस्यूतगुणा, शिखरशोभिनी इति श्लिष्टं विशेषणद्वयं प्रयुक्तम्। सूचीमुख, गति, गुण, शिखरनामक नृत्याङ्गैः सहित इति ग्रन्थपरत्वेन समन्वयः। एवं सूचीमुखस्य - सूच्या अग्रभागस्य; गत्या - गममनेन; स्थूलगुणा - स्थूलसूत्रा इति, शिखरेण शोभिनी इति च रत्नहारपक्षे अन्वयः।

एवमत्र श्लोकद्वयेऽपि निबद्धः श्लेषालङ्कारः अतीव मनोज्ञः सहृदय हृदयान्यावर्जयति।

प्रधाननर्तक्या नैपथ्यवर्णनसन्दर्भे जायसेनान्या निबद्धौ श्लोकौ न तस्य लाक्षणिकहृदयमेव अपितु कविहृदयमपि आविष्कुरुतः। पश्यतेमं श्लोकद्वयम्।

अङ्कारोपितस्वातिशशिबिम्बविडम्बिना।
आननेन विराजन्ती नासामौक्तिकशोभिनी॥
कस्तूरीतिलकाङ्केन वदनेनानुकुर्वती।
प्रान्तस्थितकुरङ्गस्य पूर्णस्यामृतदीधितेः॥ (नृ.र.8-37,38)

नासामौक्तिकशोभिना आननेन विराजमाना प्रधाननर्तकी अङ्कारोपितस्वातिशशिबिम्बं विडम्बयतीति, कस्तूरीतिलकेन विराजमानं मुखं कुरङ्गसहितं पूर्णचन्द्रमनुकरोतीति च श्लोकद्वये उपनिबद्ध उपमालङ्कारः जायसेनान्यः कवितानिर्माणचणतां द्योतयति।

आन्ध्रदेशीयेन जायसेनापतिना निबद्धेयं नृत्तरत्नावली मार्गदेशि नृत्तशास्त्रग्रन्थेषु शिखरायमाणा काकतीयप्रभूणां कलाप्रोत्साहकत्वं, आन्ध्राणां नृत्तशास्त्रे प्रवणतां, गाढं वैदुष्यं च प्रकटयतीत्यत्र नास्ति सन्देहलेशः।

In Public domain. Digitization Muthulakshmi Research Academy

गणपतिदेवचक्रवर्त्तिनः आस्थानकविना कविचक्रवर्तिनाम्ना रचिते शिलालेखे दृश्यमानेन जायसेनानीमहत्वप्रतिपादकेन श्लोकद्वयेन अयं निबन्धः समाप्यते।

वर्धते खलु वसुन्धराधिपते -
स्तस्य सिन्धुरचमूधुरन्धरः।
जायनः सकलनाट्यवैदिक -
ग्रामणीः कविसखाशिखामणिः॥

मन्त्री कार्यनिरूपणे प्रियसुहृद् विस्रम्भसम्भाषणे
काव्यारम्भविधौ कविः सहचरः सङ्गीतसम्पादने।
कर्ता शिल्पकलापविषये सम्प्रेषणे किङ्करो
युद्धे यश्चलमत्तिगण्डनृपतेरग्रेसरो वर्तते॥

In Public domain. Digitization Muthulakshmi Research Academy

Sl.No.	TITLE	Year	Revised Rates
1.	Jnanchturvimsi	1956	20.00
2.	Rigarthasara Part-I	1959	25.00
3.	Stories from the Kathasaritsagara	1960	20.00
4.	Sitaramavihara Kavya	1962	25.00
5.	Danavivekodyota - Part-I	1964	25.00
6.	Catalogue of Skt. Mss. in O.U. Library	1964	150.00
7.	Stories from the Kathasaritsagara Part-II	1965	25.00
8.	Aryasaptasati	1966	50.00
9.	Vikramorvasiyam	1966	30.00
10.	Danavivekodyota Part-II	1966	30.00
11.	Danavivekodyota Part-III	1967	35.00
12.	Sahityaratnakara Part-I	1972	50.00
13.	Sahityaratnakara Part-II	1974	50.00
14.	Kasika Part-III (Indices) Vol.I	1976	70.00
15.	Journal of Skt Academy Vol.I	1979	25.00
16.	Journal of Skt Academy Vol.II	1980	25.00
17.	Koudinya siksha	1980	5.00
18.	Sahityaratnakara Part-III	1981	50.00
19.	Padamanjari Part-I	1981	120.00
20.	Journal of Skt Academy Vol.III	1981	25.00
21.	Padamanjari Part-II	1981	120.00
22.	Journal of Skt Academy Vol.IV	1982	25.00
23.	Samskrita Kavijivitam Part-II	1982	90.00
24.	Sangitachandra	1982	75.00
25.	Kriyasvaralakshnam	1983	50.00
26.	Parasika Lokoktayah	1983	20.00
27.	Journal of Skt Academy Vol.V	1983	25.00
28.	Minor works of Nellakantha Deekshita	1984	25.00
29.	Journal of Skt Academy Vol.VI	1984	25.00
30.	Journal of Skt Academy Vol.VII	1985	25.00
31.	Kasika Vivarana Panjika (Nyasa-I)	1985	120.00
32.	Kasika Part-III (Indices) Vol.II	1985	75.00
33.	Mahisasatakam	1985	30.00
34.	Kasika Vivarana Panjika (Nyasa-II	1986	120.00
35.	Katha in Sanskrit Poetics	1986	40.00
36.	Journal of Skt Academy Vol.VIII	1986	25.00
37.	Paribhashendushekhara	1987	90.00
38.	Journal of Skt Academy Vol.IX	1988	25.00
39.	Journal of Skt Academy Vol.X	1988	25.00

In Public domain. Digitization Muthulakshmi Research Academy

40.	Kadambarikathasara	1988	30.00
66.	Sri Ramakarnamritam	2005	40.00
41.	Ayurvedabdhisara Part-I	1988	100.00
42.	Journal of Skt Academy Vol.XI	1989	25.00
43.	Suryadandaka	1989	20.00
44.	Kavyalakshanavada	1989	20.00
45.	Journal of Skt Academy Vol.XII	1990	25.00
46.	Abhinavavasavadatta	1990	20.00
47.	Ayurvedabdhisara Part-II	1990	125.00
48.	Journal of Skt Academy Vol.XIII	1991	25.00
49.	Prakritasabdapradipika	1991	40.00
50.	Journal of Skt Academy Vol.XIV	1992	25.00
51.	Harivayustutih	1992	30.00
52.	Samskrita Kavijivitam Part-I (re-print)	1993	90.00
53.	Journal of Skt Academy Vol.XV	1993	25.00
54.	Journal of Skt Academy Vol.XVI	1994	25.00
55.	Journal of Skt Academy Vol.XVII	1995	25.00
56.	Yogasutrasara	1996	15.00
57.	Dhatukarika	1996	25.00
58.	First Book of Sanskrit (Telugu)	2001	50.00
59.	Panditarajakavyasamgraha (re-print)	2002	150.00
60.	Selection from Prakrit Literature (Telugu)	2003	20.00
61.	Gitagovindamahakavyam (re-print)	2003	200.00
62.	Hariharatattva Bhumika	2004	25.00
63.	Amrutavarshini	2004	50.00
64.	संस्कृतपथप्रदर्शिनी (Intermediate IIyrs Sanskrit text eng.tr)	2005	50.00
65.	संस्कृतपथप्रदर्शिनी (Intermediate IIyrs Sanskrit text tel.tr)	2005	50.00
66.	Sri Ramakarnamritam	2005	40.00
67.	Manishapanchakam	2005	40.00
68.	Astrology – An Authentic Science	2006	15.00
69.	सदाशिवब्रह्मेन्द्रसरस्वतीविरचितानि गीतानि	2006	30.00

BOOKS OUT OF PRINT

1. Gems from Sanskrit Literature; 2. Kasika – Part-I; 3. Kasika – Part-II; 4. Kshemendra's Laghukavyasangraha; 5. Narakasuravijayavyayoga.

Note : Contribution of Andhra to Sanskrit Literature, Rs.112.00, This books is available at Sanskrit Academy.

Sanskrit Academy, O.U. Campus,
Phone: 040-27070281, Hyd - 500 007

In Public domain. Digitization Muthulakshmi Research Academy